211

ॐ नमः परमात्मने ।

भक्तिसागरः ।

श्रीनारायणभट्टविरचितः ।

अस्ति ब्रह्म चिदानन्दं स्वयं ज्योतिर्निरञ्जनम् ।
ईश्वरो लिङ्गमित्युक्तमद्वितीयमजं विभु ॥
निर्विकारं निराकारं सर्वेश्वरमनीश्वरम् ।
सर्वशक्ति च सर्वज्ञं तदंशा जीवसंज्ञिताः ॥
अनाद्यविद्योपहिता यथाग्नेर्विस्फुलिङ्गकाः ।
दार्वाद्युपाधिसम्भिन्नास्ते कर्मभिरनादिभिः ॥
सुखदुःखयुतैः पुण्यपापरूपैर्नियन्त्रिताः ।
तत्तज्जातियुतं देहमायुर्भोगं च कर्मजम् ॥
प्रतिजन्म प्रपद्यन्ते तेषामस्त्यपरं पुनः ।
सूक्ष्मं लिङ्गशरीरं तदा मोक्षादक्षयं मतम् ॥
सूक्ष्मं भूतेन्द्रियप्राणावस्थात्मकमिदं जगुः ।
जीवानामुपभोगाय जगदेतत्सृजत्यतः ॥
स आत्मा परमात्मा च विश्रान्त्यै संहरत्यथ ।
तदेतत्सृष्टिसंहारप्रवाहोऽनादिसम्मतः ॥
ते जीवा नात्मनो भिन्ना भिन्नया चात्मनो जगत् ।
सृजत्यविद्ययाऽन्योऽयं यथा रज्जुर्भुजङ्गमात् ॥
आत्मनः पूर्वमाकाशस्ततो वायुस्ततोऽनलः ।

अनलाज्जलमेतस्मात् पृथिवी समजायत ।
महाभूतान्यमून्येषा विराजो ब्रह्मणस्तनुः ॥
ब्रह्मा ब्राह्मणमसृजत् तस्मै वेदान् प्रदाय च ।
भौतिकं वेदशब्देभ्यः सर्जयामास तेन तत् ॥
तदाज्ञयाऽसृजद् ब्रह्मा मनसैव प्रजापतीन् ।
तेभ्यस्तु तैजसी सृष्टिः शरीराणां निरूपिता ॥
विष्णुपुराणे पराशरमैत्रेयसंवादे पराशर उवाच ॥
आत्यन्तिकमतो ब्रह्मन्निबोध प्रतिसञ्चरम् ।
आध्यात्मिकादि मैत्रेय ज्ञात्वा तापत्रयं बुधः ॥
उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयम् ।
आध्यात्मिको वै द्विविधः शारीरो मानसस्तथा ॥
शारीरो बहुभिर्भेदैर्भिद्यते श्रूयतां च सः ।
शिरोरोगप्रतिश्यायज्वरशूलभगन्दरैः ॥
गुल्मार्शःश्वयथुश्वासच्छर्द्यादिभिरनेकधा ।
तथाऽक्षिरोगातीसारकुष्ठाद्यामयसंज्ञकैः ॥
भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि ।
कामक्रोधभयद्वेषलोभमोहविषादजः ॥
शोकासूयाऽपमानेर्ष्यामात्सर्यादिभवस्तथा ।
मानसोऽपि द्विजश्रेष्ठ तापो भवति नैकधा ॥
इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः ।
मृगपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः ॥
सरीसृपाद्यैश्च नृणां जायते चाधिभौतिकः ।
शीतोष्णवातवर्षाम्बु वैद्युतादिसमुद्भवः ॥
तापो द्विजवरश्रेष्ठ कथ्यते चाधिदैविकः ।

अनिशं त्रिभिरत्यर्थं बध्यमानाभिवेदनः।
प्रसारणाकुञ्चनादौ नाङ्गवान् प्रभुरात्मनः॥
शकृन्मूत्रमहापङ्कशायी सर्वत्र पीडितः।
निरुच्छ्वासः सचैतन्यः स्मरन् जन्मशतान्यथ॥
आस्ते गर्भेऽतिदुःखेन निजकर्मनिबन्धनः।
अधोमुखो वै क्रियते प्रबलैः सूतिमारुतैः॥
क्लेशैर्निष्क्रान्तिमाप्नोति जठरान्मातुरातुरः।
मूर्च्छामवाप्य महतीं संस्पृष्टो बाह्यवायुना॥
विज्ञानभ्रंशमाप्नोति जातश्च मुनिसत्तम।
कण्टकैरिव पुन्नागः क्रकचैरिव दारितः॥
पूतिव्रणो निष्पतति धरण्यां क्रमिको यथा।
कण्डूयने चाप्यशक्तः परिवर्त्तेऽप्यनीश्वरः॥
स्नानपानादिकाहारमवाप्नोति न चेच्छया।
अशुचिः संस्तरे सुप्तः कीटदंशादिभिस्तथा॥
भक्ष्यमाणोऽपि नैवेषां समर्थो विनिवारणे।
जन्मदुःखान्यनेकानि जन्मनोऽनन्तराणि च॥
बालभावे यदाप्नोति आधिभूतादिकानि च।
अज्ञानतमसाऽऽच्छन्नो मूढान्तःकरणो नरः॥
न जानाति कुतः कोऽहं क्वाहं गन्तुं किमात्मकः।
केन बन्धेन बद्धोऽहं कारणं किमकारणम्॥
किं कार्यं किमकार्यं च किं वाच्यं किं च नोच्यते।
को ऽधर्मः कश्च धर्मो ऽथ कस्मिन् वर्त्तेत वा कथम्॥
किं कर्तव्यमकर्तव्यं किं वा किं गुणदोषवत्।
एवं पशुसमैर्मूढैरज्ञानप्रभवं महत्॥

अवाप्यते नरैर्दुःखं शिश्नोदरपरायणैः।
अज्ञानं तामसो भावः कार्यारम्भप्रवृत्तिजः॥
अज्ञानिनां प्रवर्तेत कर्मलोपस्ततो द्विज।
नरकं कर्मणां लोपात् फलमाहुर्महर्षयः॥
तस्मादज्ञानिनां दुःखमिह चामुत्र चोत्तमम्।
जराजर्जरदेहस्य शिथिलावयवः पुमान्॥
विचलच्छीर्णदशनो वलीस्नायुशिरावृतः।
दूरप्रनष्टमनसो व्योमान्तर्गततारकः॥
नासाविवरपर्याप्तरोमपुञ्जश्चलद्वपुः।
प्रकटीभूतसर्वास्थिततपृष्ठास्थिसन्ततिः॥
उच्छिन्नजठराग्नित्वादल्पाहारोऽप्यचेष्टितः।
कष्टाच्चङ्क्रमणोत्थानशयनासनचेष्टितः॥
मन्दीभवच्छोत्रनेत्रो गलल्लालाविलाननः।
अनायत्तैः समस्तैश्च करणैर्मरणोन्मुखः॥
तत्क्षणेऽप्यनुभूतानामस्मर्ताऽखिलवस्तुनाम्।
सकृदुच्चरिते वाक्ये समुद्भूतमहाश्रमः॥
श्वासकासमहायाससमुद्भूतप्रजागरः।
अन्येनोत्थापितोऽन्येन तथा संवेश्यते जरी॥
भृत्यात्मपुत्रदाराणामवमानपदीकृतः।
प्रक्षीणाखिलशौचश्च विहाराहारसंस्पृहः॥
अनुभूतमिवान्यस्मिन् जन्मन्यात्मविचेष्टितम्।
संस्मरन् यौवने दीर्घं निश्वसित्यतितापितः॥
एवमादीनि दुःखानि प्राप्नोति शृणु तानि तु।
चलग्रीवाङ्घ्रिहस्तैश्च व्याप्तो वेपथुना नरः॥

मुहुर्ग्लानिः परवशो मुहुर्जीवबलान्वितः ।
हिरण्यधान्यतनयभार्याभृत्यगृहादिषु ॥
एते कथं भविष्यन्तीत्येतावन्ममताकुलः ।
कर्मभिश्च महारोगैः क्रकचैरिव दारुणैः ॥
शरैरिवान्तकस्योग्रैश्छिद्यमानास्थिबन्धनः ।
निवर्त्तमानताराक्षि हस्तं पादं मुहुः क्षिपन् ॥
संशुष्कतालुशुष्कोष्ठपुटो घुरघुरायते ।
निरुद्धकण्ठो दोषाद्यैरुदानश्वासपीडितः ॥
तापेन महता व्याप्तस्तृषार्तः क्षुधया तथा ।
क्लेशादुत्क्रान्तिमाप्नोति याम्यकिङ्करपीडितः ॥
शृणुष्व नरके यानि प्राप्यन्ते पुरुषैर्मृतैः ।
याम्यकिङ्करपाशादिग्रहणं दण्डताडनम् ॥
यामस्य दर्शने चोग्रदुःखमार्गविलोकनम् ।
करम्भवालुकाकुम्भयन्त्रशस्त्राग्निभीषणम् ॥
प्रत्येकं नरके याश्च यातना द्विज दुःसहाः ।
क्रकचैः पोथ्यमानानामूखायाश्चापि धम्यताम् ॥
कुठारैः पोथ्यमानानां भूमौ वाऽपि निखन्यताम् ।
शूलेष्वारोप्यमानानां व्याघ्रवक्त्रे प्रवेश्यताम् ॥
गृध्रैः सम्भक्ष्यमाणानां क्षिप्यतां क्षेप्ययन्त्रकैः ।
ततश्च यानि दुःखानि पापहेतूद्भवानि च ॥
प्राप्यन्ते नारकैर्विप्र तेषां संख्या न विद्यते ।
न केवलं द्विजश्रेष्ठ नरके दुःखपद्धतिः ॥
स्वर्गेऽपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृतिः ।
पुनश्च गर्भे भवति जायते च पुनर्नरः ॥

१

गर्भे विलीयते भूयो जायमानो ऽस्तमेति च।
जातमात्रश्च म्रियते बालभावे ऽथ यौवने॥
मध्यमं वा पदं प्राप्य वार्द्धके च ध्रुवा मृतिः।
यावज्जीवति यावच्च दुःखैर्नानाविधैः प्लुतः॥
तन्तुकारणपक्ष्मौघैरास्ते कर्पासबीजवत्।
द्रव्यनाशे तथोत्पत्तौ पालने च तथा नृणाम्॥
भवन्त्यनेकदुःखानि तथैवेष्टविपत्तिषु।
यद्यत्प्रीतिकरं पुंसां वस्तु मैत्रेय जायते॥
तदेव दुःखवृक्षस्य बीजत्वमुपगच्छति।
कलत्रमित्रपुत्रार्थगृहक्षेत्रधनादिकैः॥
क्रियते न तथा भूरि सुखं पुंसां यथा सुखम्।
इति संसारदुःखार्कतापतापितचेतसाम्॥
विमुक्तिपादपच्छायामृते कुत्र सुखं नृणाम्।
इति जीवस्य शरीरसम्बन्धानरकस्वर्गादिकर्मफलनिरूपणम्॥
तदस्य त्रिविधस्यापि दुःखजातस्य पण्डितः।
गर्भजन्मजराद्येषु स्थानेषु प्रभविष्यतः॥
निरस्तातिशयाह्लादसुखभावैकलक्षणा।
भेषजम्भगवत्प्राप्तिरेकान्तात्यन्तिकी मता॥
तस्मात्तत्प्राप्तये यत्नः कर्तव्यः पण्डितैर्नरैः।
तत्प्राप्तिहेतुर्ज्ञानं च कर्म चोक्तं महामुने॥
आगमोत्थं विवेकाच्च द्विधा ज्ञानं तथोच्यते।
शब्दब्रह्मागममयं परं ब्रह्म विवेकजम्॥
अन्धतम इवाज्ञानं दीपवच्चेन्द्रियोद्भवम्।
यथा सूर्यस्तथा ज्ञानं यद्विप्रर्षे विवेकजम्।

मनुरप्याह वेदार्थं स्मृत्वा यन्मुनिसत्तम ॥
तदेतच्छ्रूयतामत्र सम्बन्धाद्वदतो मम ।
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ॥
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ।
द्वे विद्ये वेदितव्ये च इति चाथर्वणी श्रुतिः ॥
परया त्वक्षरप्राप्तिऋग्वेदादिमयापरा ।
यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम् ॥
अनिर्देश्यमरूपं च पाणिपादाद्यसंयुतम् ।
विभु सर्वगतं नित्यम्भूतयोनिमकारणम् ॥
व्याप्यं व्याप्तं यतः सर्वं तद्वै पश्यन्ति सूरयः ।
तद्ब्रह्म तत्परं धाम तद्ध्येयं मोक्षकाङ्क्षिभिः ॥
श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम् ।
तदेव भगवद्वाच्यं स्वरूपं परमात्मनः ॥
वाचको भगवच्छब्दस्तस्याद्यस्याक्षयात्मनः ॥
एवं निगदितार्थस्य सत्तत्त्वन्तस्य तत्त्वतः ।
ज्ञायते येन तज्ज्ञानं परमन्यत्त्रयीमयम् ।
अशब्दगोचरस्यापि तस्य वै ब्रह्मणो द्विज ॥
पूजायां भगवच्छब्दो व्रते वै ह्यौपचारिकः ।
शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्तते ॥
मैत्रेय भगवच्छब्दः सर्वकारणकारणे ।
सम्भर्तेति यथा भर्ता भकारोऽर्थद्वयान्वितः ॥
नेता गमयिता वस्तून् भकारार्थो महामुने ।
ऐश्वर्यस्य समस्तस्य वीर्यस्य यशसः श्रियः ॥
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ।

वसन्ति सर्वभूतानि सर्वभूतेऽखिलात्मनि ॥
सर्वभूतेष्वशेषेषु वकारोऽर्थस्ततोऽव्ययः।
एवमेव महाशब्दो भगवानिति स स्मृतः॥
परस्य ब्रह्मभूतस्य वासुदेवस्य वान्यतः।
तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः॥
शब्दोऽयं नोपचारेण अन्यत्र ह्युपचारतः।
उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ॥
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति।
ज्ञानशक्तिबलैश्वर्यवीर्यतेजांसि सेश्वरः।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः॥
सर्वाणि तव भूतानि वसन्ति परमात्मनि।
भूतेषु च स सर्वात्मा वासुदेवस्ततः स्मृतः॥

स सर्वभूतप्रकृतिं विकारं गुणादिदोषांश्च मुने व्यतीतः।
अतीतसर्वावरणोऽखिलात्मा तेनास्तृतं यद् भुवनान्तराले ॥
समस्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशावृतभूतसर्गः।
इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगत्कृतार्थः॥
तेजोबलैश्वर्यमहावबोधः स्ववीर्यशक्त्यादिगुणैकराशिः।
परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे ॥
स ईश्वरो व्यस्तसमस्तरूपोऽव्यक्तस्वरूपः प्रकटस्वरूपः।
सर्वेश्वरः सर्वगतश्च वेत्ता समस्तशक्तिः परमेश्वराख्यः॥
स ज्ञायते येन तदस्तदोषं शुद्धं परं निर्मलरूपमेकम्।
संदृश्यते वाऽप्यथ गम्यते वा तद्ज्ञानमज्ञानमतोऽन्यदुक्तम् ॥

पराशर उवाच।

स्वाध्यायसंयमाभ्यासा दृश्यते मुनिसत्तम।

तत्प्राप्तिकारणं ब्रह्मन् तदेतदिति पठ्यते ॥
स्वाध्यायाद्योगमासीत योगात् स्वाध्यायमात्मनि ।
स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते ॥
न मां स चक्षुषा द्रष्टुं ब्रह्मभूतः स शक्यते ।
इति भगवच्छब्दस्वरूपकथनम् ॥

मैत्रेय उवाच ।

भगवंस्तं महायोगं ज्ञातुमिच्छामि तद्वद ।
ज्ञाते यत्राखिलाधारं पश्येयं परमेश्वरम् ॥

पराशर उवाच ।

यथा केशिध्वजः प्राह खाण्डिक्याय महात्मने ।
जनकाय पुरा योगं तमहं कथयामि ते ॥

मैत्रेय उवाच ।

खाण्डिक्यः कोऽभवद्ब्रह्मन् को वा केशिध्वजोऽभवत् ।
कथं तयोश्च संवादो योगसबन्धवानभूत् ॥

पराशर उवाच ।

धर्मध्वजो वै जनकस्तस्य पुत्रो मितध्वजः ।
कृतध्वजश्च नामासीत्सदाचाररतिर्नृपः ॥
कृतध्वजस्य पुत्रोऽभूद्धन्यः केशिध्वजो द्विज ।
पुत्रो मितध्वजस्याऽपि खाण्डिक्यो जनको ऽभवत् ॥
कर्ममार्गे च खाण्डिक्यः पृथिव्यामभवत्कृती ।
केशिध्वजोऽप्यतीवासीदात्मविद्याविशारदः ॥
तावुभावपि चैवास्तां वितिगी(?) परस्परम् ।
केशिध्वजेन खाण्डिक्यः स्वराज्यादवरोपितः ॥
पुरोधसा मन्त्रिभिश्च समवेतोऽल्पसाधनः ।
राज्यान्निराकृतः सोऽथ दुर्गावासकरो ऽभवत् ॥

इयाज सोऽपि सुबहून् यज्ञान् यज्ञव्यपाश्रयः ।
ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमविद्यया ॥
एकदा वर्तमानस्य योगे योगविदां वर ।
धर्मधेनुं जघानोग्रः शार्दूलो विजिने वने ॥
ततो राजा हतां ज्ञात्वा धेनुं व्याघ्रेण ऋत्विजः ।
प्रायश्चित्तं स पप्रच्छ किमत्रेति विधीयते ॥
ते चोचुर्न वयं विद्मः कसेरुः पृच्छ्यतामिति ।
कसेरुरपि तेनोक्तस्तथेति प्राह भार्गवम् ॥
शुनकं पृच्छ राजेन्द्र नाहं वेद्मि स वेत्स्यति ।
स गत्वा तमपृच्छच्च सोऽप्याह शृणु यन्मुने ॥
न कसेरुर्न चैवाहं न वाऽन्यः साम्प्रतं भुवि ।
वेत्त्येक एव त्वच्छत्रुः खाण्डिक्यो यो जितस्त्वया ॥
स चाह तं व्रजाम्येष प्रष्टुमात्मरिपुं मुने ।
प्राप्त एव महायज्ञो यदि मां स हनिष्यति ॥
प्रायश्चित्तं स चेत् पृष्टो वदिष्यति रिपुर्मम ।
ततश्चाविकलो योगो मुनिश्रेष्ठ भविष्यति ॥

पराशर उवाच ।

इत्युक्त्वा रथमारुह्य कृष्णाजिनधरो नृपः ।
वनं जगाम यत्रास्ते स खाण्डिक्यो महामुनिः ॥
तमायान्तं समालोक्य खाण्डिक्यो रिपुमात्मनः ।
प्रोवाच क्रोधताम्राक्षः समारोपितकार्मुकः ॥

खाण्डिक्य उवाच ।

कृष्णाजिनं त्वं कवचमाबध्यास्मान्निहंस्यसि ।
कृष्णाजिनधरे वेद्मि न चैनं प्रहरिष्यति ॥

मृगाणां वद पृष्ठेषु मूढ कृष्णाजिनेन किम् ।
ये वा मया त्वया चोग्राः प्रहिताः सितसायकाः ॥
स त्वामहं हनिष्यामि न मे जीवन् विमोचसे ।
आततायसि दुर्बुद्धे मम राज्यहरो रिपुः ॥
केशिध्वज उवाच ।
खाण्डिक्य संशयं प्रष्टुं भवन्तमहमागतः ।
न त्वां हन्तुं विचार्यैतत्कोपं बाणं विमुञ्च वै ॥
पराशर उवाच ।
ततः स मन्त्रिभिः सार्धमेकान्ते स पुरोहितैः ।
मन्त्रयामास खाण्डिक्यः सर्वैरेव महामतिः ॥
तमूचुर्मन्त्रिणो वध्यो रिपुरेष वशं गतः ।
हते तु पृथिवी सर्वा तव वश्या भविष्यति ॥
खाण्डिक्यः प्राह तान् सर्वानेवमेव न संशयः ।
हते तु पृथिवी सर्वा मम वश्या भविष्यति ॥
परलोकजयस्तस्य पृथिवी सकला मम ।
न हन्मि वै लोकजयो मम तस्य वसुन्धरा ॥
परलोकजयस्तस्य स्वल्पकालो महीजयः ।
तस्मादेनं न हनिष्ये यत्पृच्छति वदामि तत् ॥
पराशर उवाच ।
ततस्तमभ्युपेत्याह खाण्डिक्यजनको रिपुम् ।
प्रष्टव्यं यत्त्वया सर्वं तत्पृच्छस्व वदाम्यहम् ॥
ततः सर्वं यथावृत्तं धर्मधेनुवधं द्विजः ।
कथयित्वा स पप्रच्छ प्रायश्चित्तं हि तेऽरतम् ॥
स चाचष्ट यथान्यायं द्विज केशिध्वजाय वै ।
प्रायश्चित्तमशेषेण यद्वै तेन विधीयते ॥

विदितार्थः स तेनैवमनुज्ञातो महात्मना।
यागभूमिमुपागम्य चक्रे भूरिक्रियाक्रमम्॥
क्रमेण विधियागन्तु नीत्वा सोऽवभृथान्वयम्।
कृतकृत्यस्ततो भूत्वा चिन्तयामास पार्थिवः॥
पूजिता ऋत्विजः सर्वे सदस्या मानिता मया।
तथैवार्थी जनो ऽप्यर्थे योजितोऽभिमतैर्मया॥
यथार्हमत्र लोकस्य मया सर्वं विचेष्टितम्।
अनिष्पन्नक्रियं चेतस्तथापि मम किं यथा॥
इत्थं स चिन्तयन्नेव सस्मार स महीपतिः।
खाण्डिक्याय न दत्तेति मया वै गुरुदक्षिणा॥
स जगाम ततो भूयो रथमारुह्य पार्थिवः।
मैत्रेय दुर्गगहनं खाण्डिक्यो यत्र संस्थितः॥
खाण्डिक्योऽपि पुनर्दृष्ट्वा तमायान्तं धृतायुधः।
तस्थौ हन्तुं कृतमतिस्तमाह स पुनर्नृपम्॥
भो नाऽहं तेऽपकाराय प्राप्तः खाण्डिक्य मा क्रुधः।
गुरोर्निष्क्रयदानाय मामवेहि त्वमागतम्॥
निष्पादितो मया यागः सम्यक् त्वदुपदेशतः।
सोऽहं ते दातुमिच्छामि वृणीष्व गुरुदक्षिणाम्॥

पराशर उवाच।

भूयः स मन्त्रिभिः सार्द्धं मन्त्रयामास पार्थिवः।
गुरुनिष्क्रयकामोऽत्र किमयं प्रार्थ्यतामिति॥
तमूचुर्मन्त्रिणो राज्यमशेषं प्रार्थ्यतामयम्।
कृतिभिः प्राप्यते राज्यमनायासितसैनिकैः॥
प्रहस्य तानाह नृपः स खाण्डिक्यो महामतिः।
स्वल्पकालमहीराज्यं मादृशैः काङ्क्ष्यते कथम्॥

एवमेतद्भवतोऽत्र अर्थसाधनमन्त्रिणः ।
परमार्थः कथं कोऽत्र यूयं नात्र विचक्षणाः ॥

पराशर उवाच ।

इत्युक्त्वा समुपेत्यैनं प्राह केशिध्वजं नृपम् ।
उवाच किमवश्यं त्वं ददासि गुरुदक्षिणाम् ॥

पराशर उवाच ।

बाढमित्येव तेनोक्तः खाण्डिक्यस्तमथाब्रवीत् ।
भवानध्यात्मविज्ञानपरमार्थविचक्षणः ॥
यदि तद्दीयते मह्यं भवता गुरुनिष्क्रयः ।
तत्क्लेशप्रशमायालं यत्कर्म तदुदारय ॥

केशिध्वज उवाच ।

न प्रार्थितं त्वया कस्मान्मद्राज्यमपवीरकम् ।
राज्यलाभाद्विना नान्यत् क्षत्रियाणामतिप्रियम् ॥

खाण्डिक्य उवाच ।

केशिध्वज निबोध त्वं मया न प्रार्थितं यतः ।
राज्यमेतदशेषं ते यत्र गृध्नन्ति पण्डिताः ॥
क्षत्रियाणामयं धर्मो यत्प्रजापरिपालनम् ।
वधश्च धर्मयुद्धेन स्वराज्यपरिपन्थिनाम् ॥
तत्राशक्तस्य मे दोषो नैवास्त्यपहृतं त्वया ।
बन्धायैव भवत्येषा अविद्याप्यक्रमोज्झिता ॥
जन्मोपभोगलिप्सार्थमियं राज्यस्पृहा मम ।
अन्येषां दोषजा नैव धर्ममेवानुरुध्यति ॥
न याच्ञा क्षत्रबन्धूनां धर्मायैतत् सतां मतम् ।
अतो न याचितं राज्यमविद्यान्तर्गतं तव ॥

राज्यं गृहश्चान्यविद्वांसो ममत्वाहृतचेतसः ।
अहंमानमहापानमदमत्ता न मादृशः ॥
ततः प्रहृष्टः साध्वेतत् प्राह केशिध्वजो नृपः ।
खाण्डिक्यं जनकं प्रीत्या श्रूयतां वचनं मम ॥
अहं च विद्यया मृत्युं तर्तुकामः करोमि किम् ।
राज्यं यागांश्च विविधान् भोगैः पुण्यचयं तथा ॥
तदिदं ते मनो दिष्ट्या विवेकैश्वर्यतां गतम् ।
श्रूयतां चाप्यविद्यायाः स्वरूपं कुलनन्दन ॥
अनात्मन्यात्मबुद्धिर्या त्वस्वे स्वमिति या मतिः ।
अविद्यातरुसम्भूतिबीजमेतद्द्विधा स्थितम् ॥
पञ्चभूतात्मके देहे देही मोहं समाश्रितः ।
अहमेतदितीत्युच्चैः कुरुते कुमतिर्मतिम् ॥
आकाशवाय्वग्निजलपृथिवीभ्यः पृथक् स्थितः ।
नात्मन्यात्ममयं भावं यः करोति कलेवरे ॥
कलेवरेऽथ भोग्यं हि गृहक्षेत्रादिकं च यः ।
अदेहेनात्मनि प्राज्ञो ममेदमिति मंस्यते ॥
इत्थं च पुत्त्रपौत्त्रेषु तद्देहोत्पादितेषु कः ।
करोति पण्डितः स्वाम्यं तथात्मनि कलेवरे ॥
सर्वं देहोपभोगाय कुरुते कर्म मानवः ।
मृण्मयं हि यथा गेहं लिप्यते वै मृदम्भसा ॥
पार्थिवोऽयं तथा देहो मृदम्भोलेपनस्थितिः ।
पञ्चभूतात्मकैर्भोगैः पञ्चभूतात्मकं वपुः ॥
आप्याय्यते यदि ततः पुंसो गर्वोऽत्र किं कृतः ।
अनेकजन्मसाहस्रं संसारपदवीं व्रजन् ॥

मोहाश्रमं प्रयातोऽसौ वासनारेणुगुण्ठितः।
प्रक्षाल्यते यदा सोऽस्य रेणुर्ज्ञानाम्बुवारिणा॥
तदा संसारिपान्थस्य याति मोहश्रमः शमम्।
मोहश्रमे शमं याते स्वस्थान्तःकरणः पुमान्॥
अनन्यातिशयाबाधः परं निर्वाणमृच्छति।
निर्वाणमयमेवात्मा ज्ञानमयोऽमलः॥
दुःखाज्ञानमला धर्माः प्रकृतेस्ते नात्मनः।
जलस्याग्निजसंसर्गः स्थालीसंगात् तथा हि हि॥
शब्दोद्रेकादिकान् धर्मांस्तत् करोति यथा मुने।
तथात्मा प्रकृतेः सङ्गादहम्मानादिदूषितः॥
भजते प्राकृतान् धर्मानन्यस्तेभ्यो हि सोऽव्ययः।
तदेतत् कथितं बीजमविद्याया मया तव॥
क्लेशानां च क्षयकरं योगादन्यन्न विद्यते॥

खाण्डिक्य उवाच।

तद्ब्रवीहि महाभाग योगं योगविदुत्तम।
विज्ञातयोगशास्त्रार्थस्त्वमस्यां निमिसन्ततौ॥

केशिध्वज उवाच।

योगस्वरूपं खाण्डिक्य श्रूयतां गदतो मम।
यत्र स्थितो न च्यवते प्राप्य ब्रह्मलयं मुनिः॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धस्य विषयासङ्गि मुक्तेर्निर्विषयं तथा॥
विषयेभ्यः समाहृत्य विज्ञानात्मा मनो मुने।
चिन्तयेन्मुक्तये तेन ब्रह्मरूपं महेश्वरम्॥
आत्मभावं नयत्येनं तद्ब्रह्म ध्यानिनं मुने।

किं कार्यं चात्मनः शक्त्या लोहमाकर्षको यथा ॥
आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः ।
तस्यां ब्रह्मणि संयोगो योग इत्यभिधीयते ॥
योगयुक् प्रथमं योगी युञ्जमानोऽभिधीयते ।
विनिष्पन्नसमाधिस्तु परब्रह्मोपलब्धिवान् ॥
यद्यन्तरायदोषेण दुष्यते नास्य मानसम् ।
जन्मान्तरैरभ्यसतो मुक्तिः पूर्वस्य जायते ॥
विनिष्पन्नसमाधिस्तु मुक्तिं तत्रैव जन्मनि ।
प्राप्नोति योगी योगाग्निदग्धकर्मचयोऽचिरात् ॥
ब्रह्मचर्यमहिंसां च सत्यास्तेयाऽपरिग्रहान् ।
सेवेत योगी निष्कामो योग्यतां स्वमनो नयन् ॥
स्वाध्यायशौचसन्तोषतपांसि नियतात्मवान् ।
कुर्वीत ब्रह्मणि तथा यथाऽस्मिन् प्रवणं मनः ॥
एते यमाः सनियमाः पञ्च पञ्च प्रकीर्तिताः ।
विशिष्टफलदाः काम्या निःकामानां विमुक्तिदाः ॥
एवं भद्रासनादीनां समास्थाय गुणैर्युतः ।
यमाख्यैर्नियमाख्यैश्च युञ्जीत नियतो यतिः ॥
प्राणाख्यमनिलं वश्यमभ्यासात् कुरुतेऽति यत् ।
प्राणायामः स विज्ञेयः सबीजो बीज एव च ॥
परस्परेणाभिभवं प्राणायामौ यदानिलौ ।
कुरुतः सद्धितस्तेन तृतीयः संयमात् तयोः ॥
तस्य चालम्बनवतः स्थूलरूपं द्विजोत्तम ।
आलम्बनमनन्तस्य योगिनोऽभ्यसतः शतम् ॥
शब्दादिष्वनुरक्तानि निगृह्याक्षाणि योगवित् ।

कुर्य्याच्चित्तानुकारीणि प्रत्याहारपरायणः ॥
वश्यता परमा तेन जायतेऽतिचलात्मनाम् ।
इन्द्रियाणामवश्यैस्तैर्न योगी योगसाधकः ॥
प्राणायामेन पवनैः प्रत्याहारेण चेन्द्रियैः ।
वशीकृतैस्ततः कुर्यात् स्थितं चेतः शुभाश्रये ॥

इति योगस्वरूपकथनम् ॥

खाण्डिक्य उवाच ।

कथ्यतां मे महाभाग चेतसो यः शुभाश्रयः ।
यदाधारमशेषन्तु हन्ति दोषफलोद्भवम् ॥

केशिध्वज उवाच ।

आश्रयश्चेतसो ब्रह्म द्विधा तच्च स्वरूपतः ।
भूप मूर्त्तममूर्त्तञ्च परं चापरमेव च ॥
त्रिविधा भावना भूप विश्वमेतन्निबोध ताम् ।
ब्रह्माख्या कर्मसञ्ज्ञा च तथा चैवोभयात्मिका ॥
कर्मभावात्मिका चैका ब्रह्मभावात्मिका परा ।
उभयात्मिका तथैवान्या त्रिविधा भावभावना ॥
सनन्दनादयो ब्रह्मभावभावनया युताः ।
कर्मभावनया चान्ये देवाद्याः स्थावराश्चराः ॥
हिरण्यगर्भादिषु च ब्रह्मकर्मात्मिका द्विधा ।
विकारबोधयुक्तेषु भिद्यते भावभावना ॥
अक्षीणेषु समस्तेषु विशेषेषु न कर्मसु ।
विश्वमेतत् परं चान्यद्भेदभिन्नदृशां नृप ॥
प्रत्यस्तमितभेदं यत्सत्तामात्रं त्वगोचरम् ।
वचसा आत्मसंवेद्यं तज्ज्ञानं ब्रह्मसञ्ज्ञितम् ॥

तच्च विष्णोः परं रूपमरूपस्याद्यमक्षयम् ।
विश्वस्य रूपं वै रूपलक्षणं परमात्मनः ॥
न तद्योगयुजा शक्यं नृप चिन्तयितुं यतः ॥

तथा च योगवाशिष्ठे ॥

सामान्यं परमं चैव द्वे रूपे विद्धि मेऽनघ ।
यश्वादियुक्तं(?) सामान्यं भजन्ते मूढबुद्धयः ॥
शृणु ब्रह्मविदां श्रेष्ठ देवार्चनमनुत्तमम् ।
न देवः पुण्डरीकाक्षो न च देवस्त्रिलोचनः ॥
आकारादिपरिच्छिन्ने मिते वस्तुनि तत् कुतः ।
अकृत्रिममनाद्यन्तं देवं तं चिच्छिवं विदुः ॥
अज्ञानशिवतत्त्वानामाकाराद्यर्चनं कृतम् ।
योजनाध्वन्यशक्तस्य क्रोशाध्वा परिमीयते ॥
अकृत्रिममनाद्यन्तमद्वितीयमखण्डितम् ।
अबहिःसाधनासाध्यं सुखं तस्मादवाप्यते ॥
परं रूपमनाद्यन्तं यन्ममैकमनामयम् ।
शिवं चिन्मात्रसकलं पूज्यं पूजाविदो विदुः ॥
त्रयोदशनिमेषैस्तु भूमिदानफलं लभेत् ।
निमेषाणां शतेनैव अश्वमेधफलं लभेत् ॥
अश्वमेधसहस्रस्य घटिकार्द्धेन लभ्यते ।
घटिकां पूजयेद्यस्तु राजसूयं लभेत सः ॥
मध्याह्नपूजनादित्थं राजसूयैकलक्षभाक् ।
दिवा संपूजयित्वैव परे धाम्नि वसेन्नरः ॥
शमबोधादिभिः पुष्पैर्देव आत्मा यदर्च्यते ।
तत्तु देवार्चनं विद्धि नाकारार्चनमर्चनम् ॥

सति दीप इवालोकः सत्यर्क इव वासरः ।
सति पुष्प इवामोदः चिति सत्यां जगत् तथा ॥
प्रतिभासत एवायं न जगत् परमार्थतः ।
अव्युच्छिन्नचिदात्मैकः पुमानस्तीह नेतरः ॥
स्वसंकल्पवशाद्बद्धो निःसङ्कल्पश्च मुच्यते ।
तस्मिंश्च दर्पणे स्फारे समस्ता वस्तुदृष्टयः ॥
इमास्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमाः ।
ज्ञातं ज्ञातव्यमधुना दृष्टं द्रष्टव्यमक्षयम् ॥
विश्रान्तोऽस्मि चिरं श्रान्तः चिन्मात्रान्नास्मि किञ्चन ।
अविद्यां श्रेष्ठया श्रेष्ठः क्षालयन्निह तिष्ठति ॥
मलं मलेनापहरन् युक्तितो रजको यथा ।
चित्तमेव हि संसारि रागादिक्लेशदूषितम् ॥
तदेव तैर्विनिर्मुक्तं मुक्त मित्यभिधीयते ।
विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा ॥
अविद्याकर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते ।
येयं क्षेत्रज्ञशक्तिः सा चेष्टितं नृप सर्वगा ॥
संसारतापानखिलानवाप्नोत्यत्र सन्ततान् ।
तयातिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसञ्ज्ञिता ॥
सर्वभूतेषु भूपाल तारतम्येन लक्ष्यते ।
अप्राणिमत्सु स्वल्पाऽन्या स्थावरेषु ततोऽधिका ॥
सरीसृपेषु भूतेभ्योऽप्यतिशक्तिः पतत्त्रिषु ।
पतत्त्रिभ्यो मृगास्तेभ्यस्तच्छक्त्या पशवोऽधिकाः ॥
पशुभ्यो मनुजाश्चातिशक्त्या पुंसः प्रभाविताः ।
एतेभ्यो नागगन्धर्वयक्षाद्या देवता नृप ॥

शक्तः समस्तदेवेभ्यस्ततश्चाति प्रजापतिः।
हिरण्यगर्भोऽपि ततः पुंसः शक्त्युपलक्षितः॥
एतान्यशेषरूपाणि तस्य रूपाणि पार्थिव।
यतस्तच्छक्तियोगेन युक्तानि नभसा यथा॥
एतत् स्थूलं हरे रूपं चिन्तयेद्विश्वगोचरम्।
हिरण्यगर्भो भगवान् वासवोऽथ प्रजापतिः॥
मरुतो वसवो रुद्रा भास्करास्तारका ग्रहाः।
गन्धर्वयक्षदैत्याद्याः सकला देवयोनयः॥
मनुष्याः पशवः शैलाः समुद्राः सरितो द्रुमाः।
भूप भूतान्यशेषाणि भूतानां ये च हेतवः॥
प्रधानादिविशेषान्तं चेतनाचेतनात्मकम्।
एकपादं द्विपादञ्च बहुपादमपादकम्॥
मूर्तमेतद्धरे रूपं भावनात्रितयात्मकम्।
एतत्सर्वमिदं विश्वं जगदेतच्चराचरम्॥
परं ब्रह्मस्वरूपस्य विष्णोः शक्तिसमन्वितम्।
द्वितीयं विष्णुसञ्ज्ञस्य योगिध्येयं महामुने॥
अमूर्तं ब्रह्मणो रूपं यत्सदित्युच्यते बुधैः।

योगवाशिष्ठे।

शक्तिर्हि द्विविधा प्रोक्ता ऽवन्ध्यावन्ध्या च राघव।
अवन्ध्या सर्वभूतानां वन्ध्या तत्त्वविदां मता॥
आत्मतत्त्वाऽवबोधेन हीना देहादिवसुजा।
भूयः संसारदा शक्तिर्दृढा ऽवन्ध्येति कथ्यते॥
आत्मतत्त्वावबोधेन सत्यभूतविवेकजा।
वन्ध्या हि कथ्यते शक्तिर्भूयः संसारवर्जिता॥

समस्ताः शक्तयश्चैताः कामयन्त्रप्रतिष्ठिताः ।
तद्विश्वरूपं वै रूपं रूपमन्यद्धरेर्महत् ॥
समस्तशक्तिरूपाणि तत् करोति नरेश्वर ।
देवतिर्यङ्मनुष्याख्य चेष्टावन्ति स्वलीलया ॥
जगतामुपकाराय न सा कर्मनिमित्तजा ।
चेष्टा तस्याऽप्रमेयस्य व्यापिनोऽव्याहतात्मिका ॥
तद्रूपं विश्वरूपस्य तस्य योगयुजा नृप ।
चिन्त्यमानं विशुद्ध्यर्थं सर्वकिल्बिषनाशनम् ॥
यथाऽग्निरुद्धतशिखः कक्षं दहति सानिलः ।
तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिषम् ॥
तस्मात् समस्तशक्तीनामाधारे तत्र चेतसः ।
कुर्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणा ॥
शुभाश्रयः स चित्तस्य सर्वगस्य तथात्मनः ।
त्रिभावभावनातीतो मुक्तये योगिनां नृप ॥
अन्ये तु पुरुषव्याघ्र चतस्रो ये व्यपाश्रयाः ।
अशुद्धास्तु समस्तास्तु देवाद्याः कर्मयोनयः ॥

वाशिष्ठे ।

वासना द्विविधा ज्ञेया शुद्धा च मलिना तथा ।
मलिना जन्मनो हेतुः शुद्धा जन्मविनाशिनी ॥
अज्ञानसुघनाकारा घनाहङ्कारशालिनी ।
पुनर्जन्मकरी प्रोक्ता मलिना वासना बुधैः ॥
पुनर्जन्मान्तरत्यक्ता स्थिता सम्भृष्टबीजवत् ।
देहार्थं ध्रियते ज्ञातज्ञेया शुद्धेति चोच्यते ॥
मूर्त्तं भगवतो रूपं सर्वापाश्रयनिस्पृहम् ।

एषा वै धारणा ज्ञेया यच्चित्तं तत्र धार्यते ॥
तच्च मूर्त्तममनाधारा धारणा नोपपद्यते ।
प्रसन्नचारुवदनं पद्मपत्रायतेक्षणम् ॥
सुकपोलं सुविस्तीर्णललाटफलकोज्ज्वलम् ।
कर्णान्तरसुविस्तीर्णचारुकर्णविभूषितम् ॥
कम्बुग्रीवं सुविस्तीर्णश्रीवत्साङ्कितवक्षसम् ।
वलीविभङ्गिनामग्ननाभिना चोदरेण वै ॥
प्रलम्बाष्टभुजं विष्णुमथवाऽपि चतुर्भुजम् ।
समास्थितोरुजङ्घञ्च सुस्थिताङ्घ्रिकलाम्बुजम् ॥
चिन्तयेद्विष्णुरूपं तं पीतनिर्मलवाससम् ।
किरीटचारुकेयूरकटकादिविभूषितम् ॥
शार्ङ्गखड्गगदाशङ्खचक्राक्षवलयान्वितम् ।
चिन्तयेत्तं महायोगी समाधायात्ममानसम् ॥
तावद्यावद्दृढीभूता तत्रैव नृप धारणा ।
व्रजतस्तिष्ठतोऽन्यद्वा स्वेच्छया कर्म कुर्वतः ॥
नापयाति यदा चित्तात् सिद्धां मन्येत तां तदा ।
ततः शङ्खगदाचक्रशार्ङ्गादिरहितायुधम् ॥
चिन्तयेद्भगवद्रूपं प्रशान्तं साक्षसूत्रकम् ।
सा यदा धारणा तद्वदवस्थानवती ततः ॥
किरीटकेयूरमुखैर्भूषणै रहितं स्मरेत् ।
तदेकावयवं देवं चेतसा हि पुनर्बुधः ॥
कुर्यात्ततो वयमिति प्रणिधानपरो भवेत् ।
तद्रूपप्रत्यये चैकसन्ततिश्चान्यनिःस्पृहा ॥
तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप ।

तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि तत् ॥
मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते ।
विज्ञानं प्रापकं प्राप्य परे ब्रह्मणि पार्थिव ॥
प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभावनः ।
क्षेत्रज्ञः कारणं ज्ञानं करणं तस्य तेन तत् ॥
निष्पाद्यं मुक्तिकार्यञ्च कृतकृत्यं निवर्त्तते ।
तद्भावभावनापन्नस्ततोऽसौ परमात्मनि ॥
भवत्यभेदभावश्च तस्य ज्ञानकृतोऽभवत् ।
विभेदजनके ज्ञाने नाशमात्यन्तिकं गते ॥
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ।
इत्युक्तस्ते मया योगः खाण्डिक्य परिपृच्छतः ॥
संक्षेपविस्ताराभ्याञ्च किमन्यत् क्रियतां तव ।

खाण्डिक्य उवाच ।

कथितो यो हि सद्भावः सर्वमेव कृतं मम ।
तवोपदेशेनाशेषो नष्टश्चित्तमलो यतः ॥
ममेति यन्मया चोक्तमसदेतन्न चान्यथा ।
नरेन्द्र गदितुं शक्यमपि विज्ञेयवेदिभिः ॥
अहं ममेत्यविद्येयं व्यवहारस्तथाऽपरः ।
परमार्थस्त्वहंलापो गोचरे वचसां न सः ॥
तद्गच्छ श्रेयसे सर्वं ममैतद्भवता कृतम् ।
यद्विमुक्तिप्रदो योगः प्राप्तः केशिध्वजाव्ययः ॥

पराशर उवाच ।

यथार्हपूजया तेन खाण्डिक्येन स पूजितः ।
आजगाम पुरं ब्रह्मंस्ततः केशिध्वजो नृपः ॥

खाण्डिक्योऽपि सुतं कृत्वा राजानं योगसिद्धये ।
वनं जगाम गोविन्दे समावेशितमानसः ॥
तत्रैकान्तरतिर्भूत्वा यमादिगुणशोभितः ।
सत्त्वाख्ये निर्मले ब्रह्मण्यवाप नृपतिर्लयम् ॥
केशिध्वजोऽपि मुक्त्यर्थं स्वकर्मक्षयणोन्मुखः ।
बुभुजे विषयान् कर्म चक्रे चानभिसन्धितम् ॥
स कल्याणोपभोगैश्च क्षीणपापमलस्ततः ।
स चाप सिद्धिमत्यन्तं तापक्षयफलं द्विज ॥

इति श्रीनारायणभट्टविरचिते भक्तिसागरे जीवकर्मफलभगवच्छब्दस्वरूपयोगस्वरूपभावनास्वरूपदेवतार्चनविधिविष्णुशक्तिसगुणब्रह्मध्याननिरूपणं नाम प्रथमस्तरङ्गः ॥

मैत्रेय उवाच ।

यत्तु तद्भगवानाह भरतस्य महीपतेः ।
श्रोतुमिच्छामि चरितं तन्ममाख्यातुमर्हसि ॥
भरतः स महीपालः शालग्रामेऽवसत् किल ।
योगयुक्तः समाधाय वासुदेवे मनः सदा ॥
पुण्यदेशप्रभावेन स्मरतश्च सदा हरिम् ।
कथं तु नाभवन्मुक्तिर्यदभूत् स द्विजः पुनः ॥
विप्रत्वे च कृतं कर्म यद्भूयः सुमहात्मना ।
भरतेन मुनिश्रेष्ठ तत् सर्वं वक्तुमर्हसि ॥

पराशर उवाच ।

शालग्रामे महाभागो भगवन्न्यस्तमानसः ।
स उवास चिरं कालं मैत्रेय पृथिवीपतिः ॥
अहिंसादिष्वशेषेषु गुणेषु गुणिनां वरः ।

अत्राप परमां काष्ठां मनसश्चापि संयमे ॥
यज्ञेशाच्युत गोविन्द माधवानन्द केशव।
कृष्ण विष्णो हृषीकेशेत्याह राजा स केवलम् ॥
नान्यज्जगाद मैत्रेय किञ्चित् स्वप्नान्तरेषु च।
एतत् परं तदर्थञ्च विना नान्यदचिन्तयत् ॥
समित्पुष्पकुशादानं चक्रे देवक्रियाकृते।
जगाम सोऽभिषेकार्थमेकदा तु महानदीम् ॥
सस्नौ तत्र तथा चक्रे स्नानस्यानन्तराः क्रियाः।
अथाजगाम तत्तीर्थं जलं पातुं पिपासिता ॥
आसन्नप्रसवा ब्रह्मन्नेकैव हरिणी वनात्।
ततः समभवत् तत्र पीतप्राये जले तथा ॥
सिंहस्य नादः सुमहान् सर्वप्राणिभयङ्करः।
ततः सा च महात्रासादाप्लुता निम्नगातटम् ॥
अत्युच्चारोहणेनास्या नद्यां गर्भः पपात सः।
तमुत्थमानं वेगेन वीचिमालापरिप्लुतम् ॥
जग्राह स नृपो गर्भात् पतितं मृगपोतकम्।
गर्भप्रच्युतिदोषेण तुङ्गप्रक्रमणेन च ॥
मैत्रेय सापि हरिणी पपात च ममार च।
हरिणीं तां विलोक्याथ विपन्नां नृपतापसः ॥
मृगपोतं समादाय पुनराश्रममागमत्।
चकारानुदिनं चासौ मृगपोतस्य वै नृपः ॥
पोषणं पोष्यमाणश्च स तेन ववृधे मुने।
चकाराश्रमपर्यन्ते तृणानि गहनेषु सः ॥
दूरं गत्वा च शार्दूलत्रासादभ्याययौ पुनः।

२॥

प्रातर्गत्वा च दूरं च सायमायात् तथाश्रमम् ॥
पुनश्च भरतस्याभूदाश्रमस्योटजाजिरे ।
तस्य तस्मिन्महादूरे समीपपरिवर्त्तिनि ॥
आसीच्चेतः समासक्तं न यथा चान्यतो द्विज ।
विमुक्तराज्यतनयः प्रोज्झिताशेषबान्धवः ॥
ममत्वं स चकारोच्चैस्तस्मिन् हरिणबालके ।
किं वृकैर्भक्षितो व्याघ्रैः किं सिंहेन निपातितः ॥
चिरायमाने निःक्रान्ते तस्यासीदिति मानसम् ।
एषा वसुमती तस्य खुराग्रक्षतकर्बुरा ॥
प्रीतये मम तातोऽसौ क्व ममैणेयबालकः ।
विषाणाग्रेण मद्बाहुकण्डूयनपरो हि सः ॥
क्षेमेनाभ्यागतोऽरण्यादपि मां सुखयिष्यति ।
एते लूनशिखास्तस्य दशनैरचिरोद्गतैः ॥
कुशाः काशा विराजन्ते वटवः सामगा इव ।
इत्थं चिरगते तस्मिन् स चक्रे मानसं मुनिः ॥
प्रीतिप्रसन्नवदनः पार्श्वस्थे चाभवन्मृगे ।
समाधिभङ्गस्तस्यासीत् तन्मयत्वादृतात्मनः ॥
स त्यक्तराज्यभोगर्द्धिस्वजनस्यापि भूपतेः ।
चपले चपलन्तस्मिन् दूरगं दूरगामिनि ॥
मृगपोतेऽभवच्चित्तं स्थैर्य्यवत्तस्य भूपतेः ।
कालेन गच्छता सोऽपि कालं चक्रे महीपतिः ॥
पितेवासौ स पुत्त्रेण मृगपोतेन वीक्षितः ।
मृगमेव तदाऽद्राक्षीत् त्यजन् प्राणानसाविति ॥
तन्मयत्वेन मैत्रेय नान्यत् किञ्चिदचिन्तयन् ।

ततश्च तत्कालकृतां भावनां प्राप्य तादृशीम् ॥
जम्बूमार्गे महारण्ये जज्ञे जातिस्मरो मृगः ।
जातिस्मरत्वादुद्विग्नः संसारस्य द्विजोत्तम ॥
विहाय मातरं भूयः शालग्रामं तदा ययौ ।
पुष्पैस्तृणैस्तथा पर्णैस्तत् कुर्वन्नात्मपोषणम् ॥
मृगत्वहेतुभूतस्य कर्मणो निष्कृतिं ययौ ।
तत्र चोत्सृष्टदेहोऽसौ जज्ञे जातिस्मरो द्विजः ॥
सदाचारवतां शुद्धे योगिनां प्रवरे कुले ।
सर्वविज्ञानसम्पन्नः सर्वशास्त्रार्थतत्त्ववित् ॥
अपश्यत् स च मैत्रेय आत्मानं प्रकृतेः परम् ।
आत्मनोऽधिगतज्ञानी देवादीनि महामुने ॥
सर्वभूतान्यभेदेन स ददर्श महामुने ।
न पपाठ गुरुप्रोक्तां कृतोपनयनः श्रुतिम् ॥
न ददर्श च कर्माणि शास्त्राणि जगृहे न च ।
उक्तोऽपि बहुशः किञ्चिज्जडवद्वाक्यमब्रवीत् ॥
तदप्यसंस्कारयुतं ग्रामवाक्योक्तिसंयुतम् ।
अपध्वस्तवपुः सोऽथ मलिनाम्बरधृक् द्विजः ॥
क्लिन्नदन्तान्तरः सर्वैः परिभूतः स नागरैः ।
सम्माननापरां हानिं योगर्द्धेः कुरुते यतः ॥
जनेनावमतो योगी योगसिद्धिं च विन्दति ।
तस्माच्चरेत वै योगी सतां धर्ममदूषयन् ॥
जना यथावमन्येरन् गच्छेयुर्नैव सङ्गतिम् ।
हिरण्यगर्भवचनं विचिन्त्येत्थं महामतिः ॥
आत्मानं दर्शयामास जडोन्मत्ताकृतिं जने ।

भुञ्जन् कल्माषवार्त्ताकं शाकं वन्यफलं कणान् ॥
यद्यदाप्नोति स बहु तदत्ति कालसंयुतम् ।
पितर्युपरते सोऽथ भ्रातृभ्रातृव्यबान्धवैः ॥
कारितः क्षेत्रकर्माणि कुर्वन्नाहारपोषितः ।
स औक्षपीनावयवो जडकारी च कर्मणि ॥
सर्वलोकोपकरणं बभूवाहारवेतनः ।
तं तादृशमसंस्कारं विप्राकृतिमचेष्टितम् ॥
क्षत्तासौ वीरराज्यस्य विष्टियोग्यममन्यत ।
स राजा शिबिकारूढो गन्तुं कृतमतिर्द्विज ॥
बभूवेक्षुमतीतीरे कपिलर्षेर्वराश्रमम् ।
श्रेयः किमत्र संसारे दुःखप्राये नृणामिह ॥
प्रष्टुं तं मोक्षधर्मज्ञं कपिलाख्यं महामुनिम् ।
उवाह शिबिकां तस्य क्षत्तृवचननोदितः ॥
नृणां विष्टिगृहीतानामन्येषां सोऽपि मध्यगः ।
गृहीतो विष्टिना विप्रः सर्वज्ञानैकभाजनम् ॥
जातिस्मरोऽसौ पापस्य क्षयकाम उवाह ताम् ।
ययौ जडगतिः सोऽथ युगमात्रावलोकनः ॥
कुर्वन्मतिमतां श्रेष्ठस्ते त्वन्ये त्वरितं ययुः ।
विलोक्य नृपतिः सोऽथ विषमां शिबिकागतिम् ॥
किमेतदित्याह समं गम्यतां शिबिकावहाः ।
पुनस्तथैव शिबिकां विलोक्य विषमां हि सः ॥
नृपः किमेतदित्याह भवद्भिर्गम्यतेऽन्यथा ।
भूपतेर्वदतस्तस्य श्रुत्वेत्थं बहुशो वचः ॥
शिबिकोद्वाहकाः प्रोचुरयं यातीत्यसत्वरम् ।

राजोवाच ।

किं श्रान्तः स्वल्पमध्वानं त्वयोढा शिबिका मम ।
किमायाससहो न त्वं पीवानसि निरीक्ष्यते ॥

ब्राह्मण उवाच ।

नाहं पीवा न वै वोढा शिबिकामध्वनो मया ।
न श्रान्तोऽस्मि न वायासः सोढव्योऽस्ति महीपते ॥

राजोवाच ।

प्रत्यक्षं दृश्यते पीवा नाधायि शिबिका त्वयि ।
श्रमश्च भारोद्वहने भवत्येव हि देहिनाम् ॥

ब्राह्मण उवाच ।

प्रत्यक्षं भवता भूप यद् दृष्टं तद्वद् प्रभो ।
बलवानबलश्चेति वाच्यं पश्चाद्विशेषणम् ॥
त्वयोढा शिबिका चेति त्वय्यधायि च संस्थिता ।
मिथ्यैतदत्र भवान् शृणोतु वचनं मम ॥
भूमौ पादयुगस्यास्था जङ्घे पादद्वये स्थिते ।
ऊरू जङ्घाद्वयावस्थौ तदाधारं तथोदरम् ॥
वक्षःस्थलं तथा बाहू स्कन्धौ चोदरसंश्रितौ ।
स्कन्धाश्रितेयं शिबिका मम भारोऽत्र किं कृतः ॥
शिबिकायां स्थितश्चायं देहस्त्वदुपलक्षितः ।
तत्र त्वमहमप्यत्र प्रोच्यते चेदमन्यथा ॥
अहं त्वं च तथाऽन्ये च भूतैरुह्याम पार्थिव ।
गुणप्रवाहपतितो भूतवर्गोऽपि यात्ययम् ॥
कर्मवश्या गुणा ह्येते सत्त्वाद्याः पृथिवीपते ।
अविद्यासञ्चितं कर्म तथा शेषेषु जन्तुषु ॥

आत्मा शुद्धोऽक्षरः शान्तो निर्गुणः प्रकृतेः परः ।
प्रवृद्ध्यपचयौ नास्य एकस्याखिलजन्तुषु ॥
यदा नोपचयस्तस्य न चैवापचयो नृप ।
तदा पीवानसीतीत्थं कया युक्त्या त्वयेरितम् ॥
भूपादजङ्घाकट्यूरुजठरादिषु संस्थिता ।
शिबिकेयं तव स्कन्धे तथा भारः समस्त्वया ॥
तथाऽन्यैर्जन्तुभिर्भूपः शिबिकोढा न केवलम् ।
शैलद्रुमगृहोत्थोपि पृथिवीसम्भवोऽपि च ॥
यदा पुंसः पृथग्भावः प्राकृतैः कारणैर्नृप ।
सोढव्यस्तु तदायासः कतमो नृपते मया ॥
यद्द्रव्या शिबिका चेयं यद्द्रव्यो भूतसंग्रहः ।
भवतो मेऽखिलस्यापि ममत्वेनोपबृंहितः ॥

पराशर उवाच ।

एवमुक्त्वाऽभवन्मौनी स वहन् शिबिकां द्विज ।
सोऽपि राजावतीर्यैवं तत्पादौ जगृहे त्वरन् ॥

राजोवाच ।

भो भो विसृज्य शिबिकां प्रसादं कुरु मे द्विज ।
कथ्यतां को भवानत्र जाल्मरूपधरः स्थितः ॥
यो भवान् यन्निमित्तञ्च यदागमनकारणम् ।
तत् सर्वं कथ्यतां ब्रह्मन् मह्यं शुश्रूषवे यथा ॥

ब्राह्मण उवाच ।

श्रूयतां कोऽहमित्येतद्वक्तुं भूप न शक्यते ।
उपभोगनिमित्तं च सर्वत्रागमनक्रिया ॥
सुखदुःखोपभोगौ तु तौ देहाद्युपपादकौ ।

धर्माधर्मोद्भवो भोक्ता जन्तुर्देहादिमृच्छति ॥
सर्वस्यैव हि भूपाल जन्तोः सर्वस्य कारणम् ।
धर्माधर्मौ यतस्तस्मात् कारणं पृच्छ्यते कुतः ॥

राजोवाच ।

धर्माधर्मौ न सन्देहः सर्वकार्येषु कारणम् ।
उपभोगनिमित्तञ्च देहदेहान्तरागमः ॥
यत्त्वेतद्भवता प्रोक्तं कोऽहमित्येतदात्मनः ।
वक्तुं न शक्यते श्रोतुं तन्मनो मे प्रवर्त्तते ॥
योऽस्मि सोऽहमिति ब्रह्मन् कथं वक्तुं न शक्यते ।
आत्मन्येष न दोषाय शब्दोऽहमिति यो द्विज ॥

ब्राह्मण उवाच ।

शब्दोऽहमिति दोषाय नात्मन्येष तथैव तत् ।
अनात्मन्यात्मविज्ञानशब्दो वा भ्रान्तिलक्षणः ॥
जिह्वा ब्रवीत्यहमिति दन्तोष्ठौ तालुकं नृप ।
एते नाहं यतः सर्वे वाङ्निष्पादनहेतवः ॥
किं हेतुभिर्वदत्येषा वागेवाहमिति स्वयम् ।
तथापि वाग् नाहमेतद् वक्तुमित्थं न युज्यते ॥
पिण्डः पृथग् यतः पुंसः शिरःपाण्यादिलक्षणः ।
ततोऽहमिति कुत्रैतां संज्ञां राजन् करोम्यहम् ॥
यद्यन्योऽस्ति परः कोऽपि मत्तः पार्थिवसत्तम ।
तदेषोऽहमयं वाऽन्यो वक्तुमेवमपीष्यते ॥
यदा समस्तदेहेषु पुमानेको व्यवस्थितः ।
तदा हि को भवान् कोऽहमित्येतद्विफलं वचः ॥
त्वं राजा शिबिका चेयं वयं वाहाः पुरःसराः ।

अयं च भवतो लोको न सदेतन्नृपोच्यते ॥
वृक्षाद्दारु तथा चेयं शिबिका त्वदधिष्ठिता ।
क्व वृक्षसञ्ज्ञा जाताऽस्या दारुसञ्ज्ञाऽथवा नृप ॥
वृक्षारूढो महाराजो नायं वदति ते जनः ।
न च दारुणि सर्वस्त्वां ब्रवीति शिबिकागतम् ॥
शिबिका दारुसङ्घातो रचनास्थितिसंस्थितः ।
अन्विष्यतां नृपश्रेष्ठ तद्भेदे शिबिका त्वया ॥
एवं छत्रशलाकानां पृथग्भावो विमृश्यताम् ।
क्व जातं छत्रमित्येष न्यायस्त्वयि तथा मयि ॥
पुमांस्त्री गौरयं वाजी कुञ्जरो विहगस्तरुः ।
देहेषु लोकसञ्ज्ञेयं विज्ञेया कर्महेतुषु ॥
पुमान्न देवो न नरो न पशुर्न च पादपः ।
शरीराकृतिभेदास्तु भूपते कर्मयोनयः ॥
वस्तु राजेति यल्लोके यच्च राजभटात्मकम् ।
तथाऽन्यच्च नृपेत्येतदसत्सङ्कल्पमानसम् ॥
तत्तु कालान्तरेणापि नाम्यां सञ्ज्ञामुपैति वै ।
परिणामादिसम्भूतं यद्वस्तु नृप तच्च किम् ॥
त्वं राजा सर्वलोकस्य पितुः पुत्रो रिपो रिपुः ।
पत्न्याः पतिः पिता सूनोः किं त्वां भूयो वदाम्यहम् ॥
किं त्वमेतच्छिरः किन्तु शिरस्तव तथोदरम् ।
किमु पादादि किञ्चैतत् किं त्वं ब्रूहि महीपते ॥
समस्तावयवेभ्यस्त्वं पृथग्भूपव्यवस्थितः ।
कोऽहमित्येत्र निपुणो भूत्वा चिन्तय पार्थिव ॥

एवं व्यवस्थिते तत्त्वे मयाऽहमिति भाषितम् ॥
पृथक्करणनिष्पाद्यं शक्यते नृपते कथम् ।

पराशर उवाच ।

निशम्यैतस्येति वचः परमार्थसमन्वितम् ।
प्रश्रयावनतो भूत्वा तमाह नृपतिर्द्विजम् ॥

राजोवाच ।

भगवन् यत्त्वया प्रोक्तं परमार्थमयं वचः ।
श्रुते तस्मिन् भ्रमन्तीव मनसो मम वृत्तयः ॥
एतद्विवेकविज्ञानं यदशेषेषु जन्तुषु ।
भवता दर्शितं विप्र तत् परं प्रकृतेर्महत् ॥
नाहं वहामि शिबिकां शिबिका न मयि स्थिता ।
शरीरमन्यदस्मत्तो येनेयं शिबिका धृता ॥
गुणप्रवृत्त्या भूतानां प्रकृतिः कर्मनोदिता ।
प्रवर्त्तन्ते गुणास्त्वेते किं मयेति तवोदितम् ॥
एतस्मिन् परमार्थज्ञ मम श्रोत्रपथं गते ।
मनो विह्वलतामेति परमार्थार्थितां गतम् ॥
पूर्वमेव महाभागं कपिलर्षिमहं द्विज ।
प्रष्टुमभ्युद्यतो गत्वा श्रेयः किं त्वत्र संशये ॥
तदन्तरे च भवता यदिदं वाक्यमीरितम् ।
तेनैव परमार्थार्थं त्वयि चेतः प्रधावति ॥
कपिलर्षिर्भगवतः सर्वभूतस्य वै द्विज ।
विष्णोरंशो जगन्मोहनाशायोर्वीमुपागतः ॥
स एव भगवान्नूनमस्माकं हितकाम्यया ।
प्रत्यक्षतां मम गतो यथैतद्भवतोच्यते ॥

तन्मह्यं प्रणताय त्वं यच्छ्रेयः परमं द्विज ।
तद्वदाखिलविज्ञानजलवीच्युदधिर्भवान् ॥

ब्राह्मण उवाच ।

भूयः पृच्छसि किं श्रेयः परमार्थं न पृच्छसि ।
श्रेयांस्यपरमार्थानि अशेषाणि च भूपते ॥
देवताराधनं कृत्वा धनसम्पदमिच्छसि ।
पुत्रानिच्छति राज्यं च श्रेयस्तत्प्राप्तिकारणम् ॥
कर्म यज्ञात्मकं श्रेयः स्वर्लोकफलदायि यत् ।
श्रेयः प्रधानं च फले तदेवानाभिसन्ध्यते ॥
आत्मा ध्येयः सदा भूप योगयुक्तैस्तथापरम् ।
विवेकिनस्तु संयोगः श्रेयोऽसौ परमात्मनः ॥
श्रेयांस्येवमनेकानि शतशोऽथ सहस्रशः ।
सन्त्यत्र परमार्थास्तु न ह्येते श्रूयतां च मे ॥
धर्माय त्यजते किं तु परमार्थो धनं यदि ।
व्ययश्च क्रियते कस्मात् कामप्राप्त्युपलक्षणः ॥
पुत्रश्चेत् परमार्थः स्यात् सोऽप्यन्यस्य नरेश्वर ।
परमार्थभूतः सोऽन्यस्य परमार्थो हि तत्पिता ॥
एवं न परमार्थोऽस्ति जगत्यत्र चराचरे ।
परमार्थो हि कार्याणि कारणानामशेषतः ॥
राज्यादिप्राप्तिरत्रोक्ता परमार्थतया यदि ।
परमार्था भवन्त्यत्र न भवन्ति च वै ततः ॥
ऋग्यजुःसामनिष्पाद्यं यज्ञकर्म मतं तव ।
परमार्थभूतं तत्रापि श्रूयतां गदतो मम ॥
यत्तु निष्पाद्यते कार्यं मृदा कारणभूतया ।

तत्कारणानुगमनाज्जायते नृप तत्क्षयम् ॥
एवं विनाशिभिर्द्रव्यैः समिदाज्यकुशादिभिः ।
निष्पाद्यते क्रिया या तु सा भवित्री विनाशिनी ॥
अविनाशी परमार्थः प्राज्ञैरभ्युपगम्यते ।
तत्तु नाशि न सन्देहो नाशिद्रव्योपपादितम् ॥
तदेवाफलदं कर्म परमार्थो मतस्तव ।
मुक्तिसाधनभूतत्वात् परमार्थो न साधनम् ॥
ध्यानं चैवात्मनो भूप परमार्थार्थशब्दितम् ।
भेदकारि परेभ्यस्तत् परमार्थो न भेदवान् ॥
परमात्मात्मनोर्योगः परमार्थ इतीष्यताम् ।
मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यतां गतम् ॥
तस्माच्छ्रेयाण्यशेषाणि नृपैतानि न संशयः ।
परमार्थस्तु भूपाल संक्षेपाच्छ्रूयतां मम ॥
एको व्यापी समः शुद्धो निर्गुणः प्रकृतेः परः ।
जन्मवृद्ध्यादिरहित आत्मा सर्वगतोऽव्ययः ॥
परं ज्ञानमयो सद्भिर्नामजात्यादिभिर्विभुः ।
न योगवान्न युक्तो ऽभून्नैव पार्थिव युज्यते ॥
तस्यात्मपरदेहेषु सतोऽप्येकमयं हि यत् ।
विज्ञानं परमार्थोऽसौ द्वैतिनो तत्त्वदर्शिनः ॥
वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः ।
अभेदव्यापिनो वायोर्यथा तस्य महात्मनः ॥
एकत्वं रूपभेदश्च बाह्यकर्मप्रवृत्तिजः ।
देवादिभेदे ऽपध्वस्ते नास्त्येवावरणो हि सः ॥
सर्वभूतान्यभेदेन यथैकं दृश्यते नभः ।

भ्रान्तदृष्टिभिरात्माऽपि तथैकः सन् पृथक् पृथक् ॥
एकः समस्तं यदिहास्ति किञ्चित्तदुच्यते नास्ति परं ततोऽन्यत्।
सोऽहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहम् ॥

परशर उवाच।

इतीरितस्तेन स राजवर्यस्तत्याज भेदं परमार्थदृष्ट्या।
स चापि जातिस्मरणप्रबोधस्तत्रैव जन्मन्यपवर्गमाप ॥
इति भरतनरेन्द्रसारभूतं कथयति यश्च शृणोति भक्तियुक्तः।
स विमलमतिरेति नात्ममोहं भवति च संसरणेषु मुक्तियोग्यः ॥
इति विष्णुपुराणोक्तं भरतचरितम् ॥

परशर उवाच।

प्रियव्रतोत्तानपादौ मनोः स्वायंभुवस्य तु।
द्वौ पुत्रौ सुमहावीर्यौ धर्मज्ञौ कथितौ द्विज ॥
तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः।
अभीष्टायामभूद् ब्रह्मन् पितुरत्यन्तवल्लभः ॥
सुनीतिर्नाम या राज्ञस्तस्याऽभून्महिषी द्विज।
स नातिप्रीतिमांस्तस्यां तस्यामभूद् ध्रुवः सुतः ॥
राजासनस्थितस्याङ्कं पितुर्भ्रातरमाश्रितम्।
दृष्ट्वोत्तमं ध्रुवश्चक्रे तमारोढुं मनोरथम् ॥
प्रत्यक्षं भूपतिस्तं तु सुरुच्यानाभिनन्दत।
प्रणयेनागतं पुत्रमुत्सङ्गारोहणोत्सुकम् ॥
सपत्नीतनयं दृष्ट्वा तमङ्कारोहणोत्सुकम्।
पितुः पुत्रं तथारूढं सुरुचिर्वाक्यमब्रवीत् ॥
क्रियते किं त्वया वत्स महानेव मनोरथः।
अन्यस्त्रीगर्भजातेन ह्यसम्भूय ममोदरे ॥

उत्तमोत्तमसप्राप्यमविवेकी त्वमिच्छसि ।
सत्यं सुतस्त्वमप्यस्य किन्तु न त्वं मया धृतः ॥
एतद्राजासनं सर्वं भूभृत्संश्रयकेतनम् ।
योग्यं ममैव पुत्त्रस्य किमात्मा क्लिश्यते त्वया ॥
उच्चैर्मनोरथस्तेऽयं मत्पुत्त्रस्येव किं वृथा ।
सुनीत्यामात्मनो जन्म किं त्वया नावगम्यते ॥

पराशर उवाच ।

उत्सृज्य पितरं बालस्तच्छ्रुत्वा मातृभाषितम् ।
जगाम कुपितो मातुर्निजाया द्विज मन्दिरम् ॥
तं दृष्ट्वा कुपितं पुत्त्रमीषत्प्रस्फुरिताधरम् ।
सुनीतिरङ्कमारोप्य मैत्रेय तदभाषत ॥

सुनीतिरुवाच ।

वत्स कः कोपहेतुस्ते कश्च त्वां नाभिनन्दति ।
कोऽवजानाति पितरं तव यश्चापराध्यति ॥

पराशर उवाच ।

इत्युक्तः सकलं मात्रे कथयामास तद्यथा ।
सुरुचिः प्राह भूपालप्रत्यक्षमतिगर्विता ॥
निश्वस्य कथिते तस्मिन् साति पुत्त्रेण दुर्मनाः ।
श्वासक्षामेक्षणा दीना सुनीतिर्वाक्यमब्रवीत् ॥

सुनीतिरुवाच ।

सुरुचिः सत्यमाहेदं स्वल्पभाग्योऽसि पुत्त्रक ।
न हि पुण्यवतां वत्स सपत्नैरेवमुच्यते ॥
नोद्वेगस्तात कर्त्तव्यः कृतं यद्भवता पुरा ।
तत् कोऽपहर्त्तुं शक्नोति दातुं कश्चाकृतं त्वया ॥
राजासनं तथा छत्रं वराश्वा वरवारणाः ।

यस्य पुण्यवतां वत्स गिरस्यस्यै तेमत्वैतच्छ्राव्य पुत्रक ? ॥
अन्यजन्मकृतैः पुण्यैः सुरुच्यां सुरुचिर्नृपः ।
भार्येति प्रोच्यते त्वन्या मद्विधा पुण्यवर्जिता ॥
गुणोपचयसंपन्नस्तस्याः पुत्रस्तथोत्तमः ।
मम पुत्रस्तथा जातः स्वल्पपुण्यो ध्रुवो भवान् ॥
तथापि दुःखं न भवान् कर्त्तुमर्हति पुत्रक ।
यस्य यावत् स तेनैव स्वेन तुष्यति बुद्धिमान् ॥
यदि वै दुःखमत्यन्तं सुरुच्या वचसा तव ।
तत्पुण्योपचये यत्नं कुरु सर्वफलप्रदे ॥
सुशीलो भव धर्मात्मा मैत्रः प्राणिहिते रतः ।
निम्नं यथापः प्रवणा पात्रमायान्ति सम्पदः ॥

ध्रुव उवाच ।

अम्ब यत्त्वमिदं प्राह प्रशमाय वचो मम ।
नैतद् दुर्वचसा भिन्ने हृदये मम तिष्ठति ॥
सोऽहं तथा यतिष्यामि यथा सर्वोत्तमोत्तमम् ।
स्थानं प्राप्स्याम्यशेषाणां जगतामपि पूजितम् ॥
सुरुचिर्दयिता राज्ञस्तस्या जातोऽस्मि नोदरात् ।
प्रतापं पश्यसे त्वं च वृद्धस्यापि तवोदरे ॥
उत्तमः स च मे भ्राता यो गर्भे न धृतस्त्वया ।
स राजासनमाप्नोतु पित्रा दत्तं यथासुखम् ॥
नान्यदत्तमभीप्सामि स्थानमम्ब स्वकर्मणा ।
इच्छामि तदहं स्थानं यन्न प्राप पितामहः ॥

पराशर उवाच ।

निर्जगाम गृहान्मातुरित्युक्त्वा मातरं ध्रुवः ।

पुराच्च निर्गम्य ततस्तद्बाह्योपवनं ययौ ॥
स ददर्श मुनींस्तत्र सप्त पूर्वंगतान् ध्रुवः।
कृष्णाजिनोत्तरीयेषु विष्टरेषु समन्वितान् ॥
राजपुत्रस्ततः सर्वान् प्रणिपत्याभ्यभाषत।
प्रश्रयावनतः सम्यगभिवादनपूर्वकम् ॥

ध्रुव उवाच।

उत्तानपादस्य तनयं मान्निबोध च सत्तमाः।
जातंमुनीत्थां निर्वेदात् युष्माकं प्राप्तमन्तिकम् ॥

ऋषय ऊचुः।

ननु पञ्चाब्दसंभुतो बालस्त्वं नृपनन्दन।
निर्वेदकारणं किञ्चित्तव नाद्यापि वर्तते ॥
न चिन्त्यं भवतः किञ्चिद्ध्रियते भूपतिः पिता।
न चैवेष्टवियोगार्धिं तव पश्यामि बालक ॥
शरीरे न च ते व्याधिरस्माभिरुपलक्ष्यते।
निर्वेदः किन्निमित्तस्ते कथ्यतां यदि विद्यते ॥

पराशर उवाच।

ततः स कथयामास सुरुच्या यदुदाहृतम्।
तन्निशम्य ततः प्रोचुर्मुनयस्ते परस्परम् ॥

ऋषय ऊचुः।

अहो चात्रं परं तेजो बालस्यापि यदक्षमा।
सपत्न्या मातुरुक्तस्य हृदयान्नापसर्पति ॥
भो भो क्षत्रिय दायादनिर्वेदाद्यत्त्वयाऽधुना।
कर्तुं व्यवसितं तन्नः कथ्यतां यदि रोचते ॥
यच्च कार्यं तवास्माभिः साहाय्यममितद्युते।

तदुच्यतां विप्रास्तस्माभिरुपलक्ष्यसे ॥

ध्रुव उवाच ।

नाहमर्थमभीप्सामि न राज्यं द्विजसत्तमाः ।
तत्स्थानमेकमिच्छामि भुक्तं नान्येन यत् पुरा ॥
एतन्मे क्रियतां सम्यक् कथ्यतां प्राप्यते यथा ।
स्थानमग्र्यं च समस्तेभ्यः स्थानेभ्यो मुनिसत्तमाः ॥

मरीचिरुवाच ।

अनाराधितगोविन्दैर्नरैः स्थानं नृपात्मज ।
न हि संप्राप्यते श्रेष्ठं तस्मादाराधयाच्युतम् ॥

अत्रिरुवाच ।

परः पराणां पुरुषो यस्य तुष्टो जनार्दनः ।
स प्राप्नोत्यक्षयं स्थानमेतत् सत्यं मयोदितम् ॥

अङ्गिरा उवाच ।

यस्यान्तः सर्वमेवेदमच्युतस्याव्ययात्मनः ।
तमाराधय गोविन्दं स्थानमग्र्यं यदीच्छसि ॥

पुलस्त्य उवाच ।

परं ब्रह्म परं धाम योऽसौ ब्रह्म तथा परम् ।
तमाराध्य हरिं देवं मुक्तिं प्राप्नोति दुर्लभाम् ॥

क्रतुरुवाच ।

यो यज्ञपुरुषो ध्येयः परमः पुरुषः पुमान् ।
तस्मिंस्तुष्टे न वा प्राप्यं किञ्चिदस्ति जनार्दने ॥

पुलह उवाच ।

ऐन्द्रमिन्द्रः परं स्थानं यमाराध्य जगत्पतिम् ।
प्राप यज्ञपतिं विष्णुं तमाराधय सुव्रत ॥

वशिष्ठ उवाच ।

प्राप्नोत्याराधिते विष्णौ मनसा यद्यदिच्छति ।
त्रैलोक्यस्यान्तरं स्थानं किमु वत्सोत्तमोत्तमम् ॥

ध्रुव उवाच ।

आराध्यः कथितो देवो भवद्भिः प्रणतस्य मे ।
मया तत्परितोषाय यज्जप्तव्यं तदुच्यताम् ॥
यथवाराधनं तस्य मया कार्यं महात्मनः ।
प्रसादसुमुखास्तन्मे कथयन्तु महर्षयः ॥

ऋषय ऊचुः ।

राजपुत्र यथा विष्णोराराधनपरैर्नरैः ।
कार्यमाराधनं तन्नो यथावच्छ्रोतुमर्हसि ॥
बाह्यार्थानखिलांश्चित्तात्त्यजेत् प्रथमं नरः ।
तस्मिन्नेव जगद्धाम्नि ततः कुर्वीत निश्चयम् ॥
एवमेकाग्रचित्तेन तन्मयेन धृतात्मना ।
जप्तव्यं तन्निबोधैतत्तत्त्व पार्थिवनन्दन ॥
हिरण्यगर्भपुरुषप्रधानाव्यक्तरूपिणे ।
ॐ नमो वासुदेवाय शुद्धज्ञानस्वभाविने ॥
एतज्जजाप भगवान् जाप्यं स्वायंभुवो मनुः ।
पितामहस्तव पुरा तस्य तुष्टो जनार्दनः ॥
ददौ यथाभिलषितामृद्धिं त्रैलोक्यदुर्लभाम् ।
तथा त्वमपि गोविन्दं तोषयैतत् सदा जपन् ॥

पराशर उवाच ।

निशम्य तदशेषेण मैत्रेय नृपतेः सुतः ।
निर्जगाम वनात्तस्मात् प्रणिपत्य स तानृषीन् ॥

ज्ञातज्ञत्वमिवात्मानं मन्यमानस्ततो द्विज ।
मधुसंज्ञं महापुण्यं जगाम यमुनातटम् ॥
पुनश्च मधुसञ्ज्ञेन दैत्येनाधिष्ठितं यतः ।
ततो मधुवनं नाम्ना ख्यातमत्र महीपते ॥
हत्वा च लवणं रक्षो मधुपुत्रं महाबलम् ।
शत्रुघ्नो मथुरां नाम पुरीं तत्र चकार वै ॥
यत्र वै देवदेवस्य सान्निध्यं हरिमेधसः ।
सर्वभूतगतो विप्र सर्वभागवतो भवन् ॥
मनस्यवस्थिते विष्णौ तस्य मैत्रेय योगिनः ।
अनन्यचेतसस्तस्य ध्यायतो भगवान् हरिः ॥
सर्वपापहरे तस्मिंस्तपस्तीर्थे चकार वै ।
मरीचिमिश्रैर्मुनिभिर्यथोद्दिष्टमभूत् पुरा ॥
आत्मन्यशेषदेवेशं विष्णुममन्यत ? ।
न शशाक धराभारमुद्वोढुं भूतधारिणी ॥
वामपादस्थिते तस्मिन्ननामार्द्धेन मेदिनी ।
द्वितीयं च ननामार्द्धं चितिर्दक्षिणसंस्थिते ॥
पादाङ्गुष्ठेन सम्पीड्य यदाऽसौ वसुधां स्थितः ।
तदा समस्ता वसुधा चचाल सह पर्वतैः ॥
नद्यो नदाःसमुद्राश्च संक्षोभं परमं ययुः ।
तत्क्षोभादमराः क्षोभं परं जग्मुर्महामुने ॥
यामा नाम तदा देवा मैत्रेय परमाकुलाः ।
इन्द्रेण सह सङ्गम्य ध्यानभङ्गं प्रचक्रमुः ॥
कूष्माण्डा विविधैरूपैस्सहेन्द्रेण महामुने ।
समाधिभङ्गमत्यन्तमारब्धाः कर्तुमातुराः ॥

सुनीतिर्नाम तन्माता साश्रा तत्पुरतः स्थिता ।
पुत्रेति करुणां वाचमाह मायामयी तदा ॥
पुत्रकाऽस्मान्निवर्तस्व शरीरव्ययदारुणात् ।
निर्बन्धतो मया लब्धो बहुभिस्त्वं मनोरथैः ॥
दीनामेकां परित्यक्तुमनाथां न त्वमर्हसि ।
सपत्नीवचनाद्वत्स अगतेस्त्वं गतिर्मम ॥
क्व च त्वं पञ्चवर्षीयः क्व च त्वं दारुणं तपः ।
निवर्ततां मनः कष्टान्निर्बन्धात् फलवर्जितात् ॥
कालः क्रीडनकानस्ते तथैवाध्ययनस्य च ।
ततः समस्तभोगानां तदन्ते चेष्यते तपः ॥
कालः क्रीडनकानां यस्तवकालस्य पुत्रक ।
तस्मिंस्त्वमित्थं तपसि किं नाशायात्मनो रतः ॥
मत्प्रीतिः परमं धर्मं वयोवस्थाक्रियाक्रमम् ।
अनुवर्तस्व मामोहं निवर्तास्मादधर्मतः ॥
परित्यजति वत्साद्य यद्येतन्न भवांस्तपः ।
त्यक्ष्याम्यहमिति प्राणान् स्वांस्तु वै पश्यतस्तव ॥

पराशर उवाच ।

तां विलापवतीमेवं बाष्पाविलविलोचनाम् ।
समाहितमना विष्णौ पश्यन्नपि न पश्यति ॥
वत्स वत्स सुघोराणि रक्षांस्येतानि भीषणे ।
वनेऽभ्युद्यतशस्त्राणि समायान्त्यपगम्यताम् ॥
इत्युक्त्वा प्रययौ साथ रक्षांस्याविर्बभुस्ततः ।
अभ्युद्यतोग्रशस्त्राणि ज्वालामालाकुलैर्मुखैः ॥
ततो नादानतीवोग्रान् राजपुत्रस्य ते पुरः ।

मुमुचुर्दीप्तशस्त्राणि भ्रामयन्तो निशाचराः ॥
शिवाश्च शतशो नेदुः सज्वालकवलैर्मुखैः ।
त्रासाय तस्य बालस्य योगयुक्तस्य सर्वतः ॥
हन्यतां हन्यताऽमेष छिद्यताञ्छिद्यतामयम् ।
भक्ष्यतां भक्ष्यतामेष इत्यूचुस्ते निशाचराः ॥
ततो नानाविधान्नादान् सिंहोष्ट्रमकराननाः ।
त्रासाय राजपुत्रस्य नेदुस्ते रजनीचराः ॥
रक्षांस्येमानि ते नादाः शिवास्तान्यायुधानि च ।
गोविन्दासक्तचित्तस्य ययुर्नेन्द्रियगोचरम् ॥
एकाग्रचेताः सततं विष्णुमेदाग्रसंश्रयम् ।
दृष्टवान् पृथिवीनाथपुत्रो नान्यत् कथञ्चन ॥
ततः सर्वासु मायासु विलीनासु पुनः सुराः ।
संक्षोभं परमं जग्मुस्तत्पराभवशङ्किताः ॥
ते समेत्य जगद्योनिमनादिनिधनं हरिम् ।
शरण्यं शरणं जातास्तपसा तस्य तापिताः ॥

देवा ऊचुः ।

देवदेव जगन्नाथ परेश पुरुषोत्तम ।
ध्रुवस्य तपसा तप्तास्त्वां वयं शरणं गताः ॥
दिने दिने कलाशेषैः शशाङ्कः पूर्यते यथा ।
तथाऽयं तपसा देव प्रयात्यृद्धिमहर्निशम् ॥
औत्तानपादितपसा वयमित्थं जनार्दन ।
भीतास्त्वां शरणं यातास्तपसस्तन्निवर्तय ॥
न विद्मः किं स शक्रत्वं किं सूर्यत्वमभीप्सति ।
वित्तपाम्बुपसोमानां साभिलाषः पदेषु किम् ॥

तदस्माकं प्रसीदेश हृदयाच्छल्यमुद्धर ।
उत्तानपादतनयं तपसस्त्वं निवर्तय ॥

भगवानुवाच ।

नेन्द्रत्वं न च सूर्यत्वं नैवाम्बुपधनेशताम् ।
प्रार्थयत्येष यं कामं तं करोम्यखिलं सुराः ॥
यात देवा यथाकामं स्वस्थानं विगतज्वराः ।
निवर्तयाम्यहं बालं तपसासक्तमानसम् ॥

पराशर उवाच ।

इत्युक्ता देवदेवेन प्रणम्य त्रिदशास्ततः ।
प्रययुः स्वानि धिष्ण्यानि शतक्रतुपुरोगमाः ॥
भगवानपि सर्वात्मा तन्मयत्वेन तोषितः ।
गत्वा ध्रुवमुवाचेदं चतुर्भुजवपुर्हरिः ॥

भगवानुवाच ।

औत्तानपादे भद्रं ते तपसा परितोषितः ।
वरदोऽहमनुप्राप्तो वरं वरय सुव्रत ॥
बाह्यार्थनिरपेक्षं ते मयि चित्तं यदाहितम् ।
तुष्टो ऽहं भवतस्तेन वृणीष्व च वरं परम् ॥

पराशर उवाच ।

श्रुत्वेत्थं गदितं तस्य देवदेवस्य बालकः ।
उन्मीलिताक्षो ददृशे ध्यानदृष्टं हरिं पुरः ॥
शङ्खचक्रगदाशार्ङ्गवरासिधरमच्युतम् ।
रोमाञ्चिताङ्गः सहसा साध्वसं परमं गतः ॥
स्तवाय देवदेवस्य स चक्रे मानसं ध्रुवः ।
किं वदामि स्तुतावस्य केनोक्तेनास्य संस्तुतिः ॥

इत्याकुलमतिर्देवं तमेवं शरणं ययौ ।

ध्रुव उवाच ।

भगवन् यदि मे तोषं तपसा परमं गतः ।
स्तोतुं तदहमिच्छामि वरमेनं प्रयच्छ मे ॥

पराशर उवाच ।

शङ्खप्रान्तेन गोविन्द वेदान्तैर्ज्ञायते यस्य नो गतिः? ।
तं त्वां कथमहं बालस्तोतुं शक्ष्यामि बालक ॥
त्वद्भक्तिप्रवणं ह्येतत् परमेश्वर मे मनः ।
स्तोतुं प्रवृत्तं त्वत्पादौ तत्र प्रज्ञां प्रयच्छ मे ॥

पराशर उवाच ।

शङ्खप्रान्तेन गोविन्दस्तं पस्पर्श कृताञ्जलिम् ।
उत्तानपादतनयं द्विजवर्य जगत्पतिः ॥
अथ प्रसन्नवदनस्तत्क्षणान्नृपनन्दनः ।
तुष्टाव प्रणतो भूत्वा भूतधातारमच्युतम् ॥

ध्रुव उवाच ।

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
भूतादिरादिप्रकृतिर्यस्य रूपं नतोऽस्मि तम् ॥
शुद्धः सूक्ष्मोऽखिलव्यापी प्रधानात् परतः पुमान् ।
यस्य रूपं नमस्तस्मै पुरुषाय गुणात्मने ॥
भूतादीनां समस्तानां गन्धादीनां च शेषतः ।
बुद्ध्यादीनां प्रधानस्य पुरुषस्य च यः परः ॥
त्वं ब्रह्मरूपमात्मानमशेषजगतः परम् ।
प्रपद्ये शरणं शुद्धं त्वद्रूपं परमेश्वर ॥
बृहत्वाद् बृंहणत्वाच्च यद्रूपं ब्रह्मसञ्ज्ञितम् ।

तस्मै नमस्ते ब्रह्मात्मन् योगिचिन्त्याविकारिणे॥
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्॥
सर्वव्यापी भुवः स्पर्शादत्यतिष्ठद्दशाङ्गुलम्।
यद्रूपं यच्च वै भाव्यं पुरुषाख्यं हि तद्भवान्॥
त्वत्तो विराट् स्वराट् संम्राट् त्वत्तश्चाप्यधिपूरुषः।
अत्यरिच्यत सोऽधश्च तिर्यक् चोर्द्ध्वं च वै भुवः॥
त्वत्तो विश्वमिदं सर्वं त्वत्तो भूतभविष्यती।
त्वद्रूपधारिणस्त्वत्तः सर्वभूतादिदं जगत्॥
त्वत्तो यज्ञाः समुद्भूताः पृषदाज्यं पशुर्द्विधा।
त्वत्तो ऋचोऽथ सामानि त्वत्तश्छन्दांसि जज्ञिरे॥
त्वत्तो यजूंष्यजायन्त त्वत्तो ऽश्वाश्चैकतोदतः।
गावस्त्वत्तः समुद्भूतास्त्वत्तोऽजास्त्ववयो मृगाः॥
त्वन्मुखाद्ब्राह्मणा बाह्वोस्त्वत्तः क्षत्रमजायत।
वैश्यास्तवोरुजास्त्वत्तः पद्भ्यां शूद्राः समुत्थिताः॥
अक्ष्णोः सूर्योऽनिलः श्रोत्राच्चन्द्रमा मनसस्तव।
प्राणोऽन्तःसुषिराज्जातो मुखादग्निरजायत॥
नाभितो गगनं द्यौश्च शिरसः समवर्त्तत।
दिशः श्रोत्रात् क्षितिः पद्भ्यां त्वत्तः सर्वमभूदिदम्॥
न्यग्रोधः सुमहानल्पे यथा बीजे व्यवस्थितः।
संयमे विश्वमखिलं बीजभूते तथा त्वयि॥
बीजादङ्कुरसंभूतो न्यग्रोधः समुपस्थितः।
विस्तारं च यथा याति त्वत्तः सृष्टौ जगत् तथा॥
यथा च कदलीनाम्नां त्वक्पत्रायथ दृश्यते।
एवं विश्वस्य नान्यत्त्वं लक्षणानीश्वर दृश्यते॥

ह्लादिनी सन्धिनी सापि त्वय्येका सर्वसंस्थितौ।
ह्लादतापकरी मिश्रा त्वयि नो गुणमिश्रिते ॥
पृथग्भूतैकभूताय भूतभूताय ते नमः।
प्रभूतभूतभूताय तुभ्यं भूतात्मने नमः।
व्यक्तप्रधानपुरुषविराट् स्वराट् संस्राट् तथा ॥
विभाव्यतेऽन्तःकरणैः पुरुषेष्वक्षरो भवान्।
सर्वस्मिन् सर्वभूतस्त्वं सर्वः सर्वस्वरूपधृक् ॥
सर्वं त्वत्तस्ततश्च त्वं नमः सर्वात्मनेऽस्तु ते।
सर्वात्मकोऽसि सर्वेश सर्वभूतस्थितो यतः ॥
कथयामि ततः किं ते सर्वं वेत्सि हृदि स्थितम्।
यो मे मनोरथो नाथ सफलः स त्वया कृतः ॥
तपश्च तप्तं सफलं यद्दृष्टोऽपि जगत्पते।

भगवानुवाच।

तपसस्तत्फलं प्राप्तं यद्दृष्टोऽहं त्वया ध्रुव।
मद्दर्शनं हि विफलं राजपुत्र न जायते ॥
वरं वरय तस्मात् त्वं यथाभिमतमात्मनः।
सर्वं संपद्यते पुंसां मयि दृष्टिपथं गते ॥

ध्रुव उवाच।

भगवन् सर्वभूतेश सर्वस्यास्ते भवान् हृदि।
किमज्ञातं तव स्वामिन् मनसा यन्मयेप्सितम् ॥
तथापि तुभ्यं देवेश कथयिष्यामि यन्मया।
प्रार्थ्यते दुर्विनीतेन हृदयेनातिदुर्लभम् ॥
किं वा सर्वजगत्स्रष्टः प्रसन्ने त्वयि दुर्लभम्।
त्वत्प्रसादफलं भुङ्क्ते त्रैलोक्यं मघवानपि ॥

नैतद्राजासनं योग्यमजातस्य ममोदरात् ।
इति गर्वादवोचन्मां सपत्नीमातुरुच्चकैः ॥
आधारभूतं जगतः सर्वेषामुत्तमोत्तमम् ।
प्रार्थयामि प्रभो स्थानं त्वत्प्रसादादतोऽव्ययम् ॥

भगवानुवाच ।

यत्त्वया प्रार्थितं स्थानमेतत् प्राप्स्यति वै भवान् ।
त्वयाऽहं तोषितः पूर्वमन्यजन्मनि बालक ॥
त्वमासीर्ब्राह्मणः पूर्वं मय्येकाग्रमतिस्तदा ।
मातापित्रोश्च शुश्रूषुर्निजधर्मानुपालकः ॥
कालेन गच्छता मित्रं राजपुत्रस्तवाभवत् ।
यौवनेऽखिलभोगाढ्यो दर्शनीयोज्ज्वलाकृतिः ॥
तत्सङ्गात्तस्य तामृद्धिमवलोक्यातिदुर्लभाम् ।
भवेयं राजपुत्रोऽहमिति वाञ्छा त्वया कृता ॥
ततो यथाभिलषिता प्राप्ता ते राजपुत्रता ।
उत्तानपादस्य गृहे जातस्य ध्रुव दुर्लभे ॥
अन्येषान्तद्वरं स्थानं कुले स्वायम्भुवस्य यत् ।
तस्यैतदपरं बाल येनाहं परितोषितः ॥
मामाराध्य नरो मुक्तिमवाप्नोत्यविलम्बिताम् ।
मय्यर्पितमना बाल किमु स्वर्गादिकं पदम् ॥
त्रैलोक्यादखिले स्थाने सर्वताराग्रहाश्रयः ।
भविष्यति न सन्देहो मत्प्रसादाद् ध्रुवो भवान् ॥
सूर्यात् सोमात्तथा भौमात् सोमपुत्राद् बृहस्पतेः ।
सितार्कतनयादीनां सर्वर्क्षाणां तथा ध्रुवः ॥
सप्तर्षीणामशेषाणां ये च वैमानिकाः सुराः ।

सर्वेषामुपरि स्थानं तव दत्तं सुरेश्वर ॥
केचिच्चतुर्युगं यावत् केचिन्मन्वन्तरं सुराः ।
तिष्ठन्ति भवतो दत्ता मया वै कल्पसंस्थितिः ॥
सुनीतिरपि ते माता त्वदासन्नातिनिर्म्मला ।
विमाने तारका भूत्वा तावत्कालं निवत्स्यति ॥
ये च त्वां मानवाः प्रातः सायं च सुसमाहिताः ।
कीर्त्तयिष्यन्ति तेषां च महत् पुण्यं भविष्यति ॥

पराशर उवाच ।

एवं पूर्वं जगन्नाथाद्देवदेवाज्जनार्दनात् ।
वरं प्राप्य ध्रुवः स्थानमध्यास्ते स महामते ॥
तस्याभिमानवृद्धिं च महिमानं निरीक्ष्य च ।
देवासुराणामाचार्यः श्लोकं वावोशना जगौ ॥
अहोऽस्य तपसो वीर्यमहोऽस्य तपसः फलम् ।
यदेनं पुरतः कृत्वा ध्रुवं सप्तर्षयः स्थिताः ॥
ध्रुवस्य जननी चेयं सुनीतिर्नाम सूनृता ।
अस्याश्च महिमानं कः शक्तो वर्णयितुं भुवि ॥
त्रैलोक्याश्रयतां प्राप्य परं स्थानं स्थिरायति ।
स्थानं प्राप्ता परं कृत्वा या कुक्षिविवरे ध्रुवम् ॥
यश्चैतत् कीर्त्तयेन्नित्यं ध्रुवस्यारोहणं दिवि ।
स सर्वपापनिर्मुक्तः स्वर्गलोके महीयते ॥
स्थानभ्रंशं न चाप्नोति दिवि वा यदि वा भुवि ।
सर्वकल्याणसंयुक्तो दीर्घकालं स जीवति ॥

इति श्रीभक्तिसागरे भरतचरितध्रुवचरितनिरूपणं नाम द्वितीयस्तरङ्गः ॥

मैत्रेय उवाच।

कथितो भवता वंशो मानवानां महामुने।
कारणं चास्य जगतो विष्णुरेव सनातनः॥
यश्चैतद्भगवानाह प्रह्लादं दैत्यसत्तमम्।
ददाह नाग्निर्नास्त्रैश्च क्षुण्णस्तत्याज जीवितम्॥
जगाम वसुधा क्षोभं यत्राब्धिसलिले स्थिते।
बधबद्धे विचलति क्षिप्ताङ्गसमाहितः(?)॥
शैलैराक्रान्तदेहोऽपि न ममार च यः पुरा।
त्वयैवातीव माहात्म्यं कथितं तस्य धीमतः॥
तस्य प्रभावमतुलं विष्णोर्भक्तिमतो मुने।
श्रोतुमिच्छामि तस्यैतच्चरितं सितचेतसः॥
किं निमित्तमसौ शस्त्रैर्विक्षितो दितिजैर्मुने।
किमर्थं वाऽब्धिसलिले निःक्षिप्तो धर्मतत्परः॥
आक्रान्तः पर्वतैः कस्मात् कस्माद्दष्टो महोरगैः।
क्षिप्तः किमद्रिशिखरात् किं वा पावकसंचये॥
दिग्दन्तिनां दन्तभूमिः स च कस्मान्निरूपितः।
सन्तोषकोनिलश्चास्य प्रयुक्तः किं महासुरैः॥
कृत्याञ्च दैत्यगुरवो युयुजुस्तत्र किं मुने।
शम्बरश्चापि मायानां सहस्रं किं प्रयुक्तवान्॥
हालाहलं विषमहो दैत्यसूदैर्महात्मनः।
कस्माद्दत्तं विनाशाय यज्जीर्णं तेन धीमता॥
एतत् सर्वं महाभाग प्रह्लादस्य महात्मनः।
चरितं श्रोतुमिच्छामि माहात्म्यसूचकम्(?)॥
न हि कौतूहलं तत्र यद्दैत्यैर्निहतो हरिः।

अनन्यमनसो विष्णौ कः समर्थो निपातने ॥
तस्मिन् धर्मपुरे नित्यं केशवाराधनोद्यते।
स्ववंशप्रभवैर्दैत्यैः कृतो द्वेषोऽतिदुष्करः ॥
धर्मात्मनि महाभागे विष्णुभक्ते विमत्सरे।
दैतेयैः प्रहृतं यस्मात्तन्ममाचक्ष्व सुव्रत ॥
प्रहरन्ति महात्मानो विपक्षे चापि नेदृशे।
गुणैः समन्विते साधौ किं पुनर्यः स्वपक्षजः ॥
तदेतत् कथ्यतां सर्वं विस्तरान्मुनिपुङ्गव।
दैत्येश्वरस्य चरितं श्रोतुमिच्छाम्यशेषतः ॥

पराशर उवाच।

मैत्रेय श्रूयतां सम्यक् चरितं तस्य धीमतः।
प्रह्लादस्य सदाचारचरितमहात्मनः (?) ॥
दितेः पुत्रो महावीर्यो हिरण्यकशिपुः पुरा।
त्रैलोक्यं वशमानिन्ये ब्रह्मणो वरदर्पितः ॥
इन्द्रत्वमकरोद्दैत्यः स चासीत् सविता स्वयम्।
वायुरग्निरपां नाथः सोमश्चाभून्महासुरः ॥
धनानामधिपः सोऽभूत् सहैवासीत् स्वयं यमः।
यज्ञभागमशेषांस्तु स स्वयं बुभुजे ऽसुरः ॥
देवाः स्वर्गं परित्यज्य तत्रासन् मुनिसत्तम।
विचेरुरवनौ सर्वे बिभ्राणा मानुषीं तनुम् ॥
जित्वा त्रिभुवनं सर्वं त्रैलोक्यैश्वर्यदर्पितः।
उपगीयमानो गन्धर्वैर्बुभुजे विषयान् प्रियान् ॥
पानासक्तं दुरात्मानं हिरण्यकशिपुं तदा।
उपासाञ्चक्रिरे सर्वे सिद्धगन्धर्वकिन्नराः ॥

अवादयन् जगुश्चान्ये जयशब्दांस्तथा परे ।
दैत्यराजस्य पुरतश्चक्रुः सिद्धा मुदाऽन्विताः ॥
तत्र प्रनृत्ताप्सरसि स्फाटिकाभ्रमयेऽसुरः ।
पपौ पानं मुदा युक्तः प्रासादे सुमनोहरे ॥
तस्य पुत्त्रो महाभागः प्रह्लादो नाम नामतः ।
पपाठ बालपाठ्यानि गुरुगेहगतोऽर्भकः ॥
एकदा तु स धर्मात्मा जगाम गुरुणा सह ।
पानासक्तस्य पुरतः पितुर्दैत्यपतेस्तदा ॥
पादप्रणामावनतं तमुत्थाप्य पिता सुतम् ।
हिरण्यकशिपुः प्राह प्रह्लादममितौजसम् ॥

हिरण्यकशिपुरुवाच ।

पठ्यतां भवता वत्स सारभूतं सुभाषितम् ।
कालेनैतावता यत्ते सदोद्युक्तेन शिक्षितम् ॥

प्रह्लाद उवाच ।

श्रूयतां तात वक्ष्यामि सारभूतं तवाज्ञया ।
समाहितमना भूत्वा यन्मे चेतस्यवस्थितम् ॥
अनादिमध्यान्तमजमवृद्धिक्षयमच्युतम् ।
प्रणतोऽस्मि तमात्मानं सर्वकारणकारणम् ॥

पराशर उवाच ।

एवं निशम्य दैत्येन्द्रः क्रोधसंरक्तलोचनः ।
विलोक्य तद्गुरुं प्राह स्फुरिताधरपल्लवः ॥

हिरण्यकशिपुरुवाच ।

अनुशास्तोऽसि केनेदृक् वत्स प्रह्लाद कथ्यताम् ।
ममोपदिष्टं नेत्येष प्रब्रवीति गुरुस्तदा ॥

७

प्रह्लाद उवाच ।

शास्ता विष्णुरशेषस्य जगतो यो हृदि स्थितः ।
तमृते परमात्मानं तात कः केन शास्यते ॥

हिरण्यकशिपुरुवाच ।

कोऽयं विष्णुः सुदुर्बुद्धे यं ब्रवीषि पुनः पुनः ।
जगतामीश्वरस्येह पुरतः प्रसभं मम ॥

प्रह्लाद उवाच ।

न शब्दगोचरे यस्य योगिध्येयं परं पदम् ।
यतो यश्च स्वयं विश्वं स विष्णुः परमेश्वरः ॥

हिरण्यकशिपुरुवाच ।

परमेश्वरसंज्ञोऽज्ञ किमन्यो मय्युपस्थिते ।
तवास्ति मर्तुकामस्त्वं प्रब्रवीषि पुनः पुनः ॥

प्रह्लाद उवाच ।

न केवलं तात मम प्रजानां स ब्रह्मभूतो भवतश्च विष्णुः ।
धाता विधाता परमेश्वरश्च प्रसीद कोपं कुरुषे किमर्थम् ॥

हिरण्यकशिपुरुवाच ।

प्रविष्टः कोऽस्य हृदये दुर्बुद्धेरपि पापकृत् ।
केनेदृशान्यसाधूनि वदत्याविष्टमानसः ॥

प्रह्लाद उवाच ।

न केवलं मद्धृदयं स विष्णुराक्रम्य लोकानखिलानवस्थितः ।
स मां त्वदादींश्च पितः समस्तान् समस्तचेष्टासु युनक्ति सर्वगः ॥

हिरण्यकशिपुरुवाच ।

निष्क्राम्यतामयं दुष्टः शास्यतां च गुरोर्गृहे ।
यो जितो दुर्मतिः केन विपक्षविपथस्तुतौ ॥

पराशर उवाच।

इत्युक्तो स तदा दैत्यैर्नीतो गुरुगृहं पुनः।
जग्राह विद्यामनिशं गुरुशुश्रूषणोद्यतः॥
कालेऽतीते च महति प्रह्लादमसुरेश्वरः।
समाहूयाब्रवीद्गाथा काचित् पुत्रक गीयताम्॥

प्रह्लाद उवाच।

यतः प्रधानपुरुषौ यतश्चैतच्चराचरम्।
कारणं सकलस्यास्य स नो विष्णुः प्रसीदतु॥

हिरण्यकशिपुरुवाच।

दुरात्मा वध्यतामेषो नानेनार्थोऽस्ति जीवता।
स्वपक्षहानिकर्त्तृत्वाद्यः कुलाङ्गारतां गतः॥

पराशर उवाच।

इत्याज्ञप्तास्ततस्तेन प्रगृहीतमहायुधाः।
उद्यतास्तस्य नाशाय दैत्याः शतसहस्रशः॥

प्रह्लाद उवाच।

विष्णुः शस्त्रेषु युष्मासु मयि चासौ यथास्थितः।
दैतेयास्तेन सत्येन नाक्रामन्त्वायुधानि मे॥

पराशर उवाच।

ततस्तैः शतशो दैत्यैः शस्त्रौघैराहतोऽपि सन्।
नावाप वेदनामल्पामभूदेव पुनर्नवः॥

हिरण्यकशिपुरुवाच।

दुर्बुद्धे विनिवर्त्तस्व वैरिपक्षस्तवादतः।
अभयं ते प्रयच्छामि माऽतिमूढमतिर्भव॥

प्रह्लाद उवाच।

भयं भयानामपहारिणि स्थिते मनस्यनन्ते मम कुत्र तिष्ठति।
यस्मिन् स्मृते जन्मजरान्तकादिभयानि सर्वाण्यपि यान्ति तात॥

हिरण्यकशिपुरुवाच।

भो भो सर्पा दुराचारमसन्तं मम दुर्मतिम्।
विषज्वालाविलैर्वक्त्रैः सद्यो नयत संक्षयम्॥

पराशर उवाच।

इत्युक्तास्तेन ते सर्पाः कुहकान्धकतक्षकाः।
अदशन्त समस्तेषु गात्रेष्वतिविषोल्बणाः॥
स त्वासक्तमतिः कृष्णे दश्यमानो महोरगैः।
न विवेदात्मनो गात्रं तत्स्मृत्याह्लादसंस्थितः॥

सर्पा ऊचुः।

दंष्ट्रा विशीर्णा मणयः स्फुटन्ति फणेषु तापो हृदयेषु कम्पः।
नास्य त्वचः स्वल्पमपीह भिन्नं प्रशाधि दैत्येश्वर कार्यमन्यत्॥

हिरण्यकशिपुरुवाच।

हे दिग्गजाः सङ्कटदन्तमिश्रा घ्नतैनमस्मद्रिपुपक्षभिन्नम्।
तज्जा विनाशाय भवन्ति तस्य यथा रणेः प्रज्वलितो हुताशः॥

पराशर उवाच।

ततः स दिग्गजैर्बालो भूभृच्छिखरसन्निभैः।
पातितो धरणीपृष्ठे विषाणैरवपीडितः॥
स्मरतस्तस्य गोविन्दमिभदन्ताः सहस्रशः।
शीर्णा वक्षस्थलं प्राप्य स प्राह पितरं ततः॥

प्रह्लाद उवाच।

दन्ता गजानां कुलिशाग्रनिष्ठुराः शीर्णा यदेते न बलं ममैतत्।

महाविपत्तापविनाशनोऽयं जनार्दनानुस्मरणानुभावः ॥

हिरण्यकशिपुरुवाच ।

ज्वाल्यतामसुरा वह्निरपसर्पत दिग्गजाः ।
वायो समेधयाग्निं त्वं दह्यतामेष पापकृत् ॥

पराशर उवाच ।

महाकाष्ठमयच्छन्नमसुरेन्द्रसुतं ततः ।
प्रज्वाल्य दानवा वह्निं ददहुः स्वामिनोदिताः ॥

प्रह्लाद उवाच ।

तातैष वह्निः पवनेरितोऽपि न मां दहत्यत्र समन्ततोऽपि ।
पश्यामि पद्मास्तरणास्तृतानि सर्प्पांषि(?) दिशां मुखानि ॥

अथ दैत्येश्वरं प्रोचुर्भार्गवस्यात्मजा द्विजाः ।
पुरोहिता महात्मानः साम्ना संस्तूय वाग्मिनः ॥

पुरोहिता ऊचुः ।

राजन् नियम्यतां कोपो बाले सुतनये निजे ।
कोपो देव निकायेषु न तु ते सफलोदयः ॥
तथा तथैनं बालं ते संस्करिष्यामहे वयम् ।
यथा विपक्षनाशाय विनीतस्ते भविष्यति ॥
बालत्वं सर्वदोषाणां दैत्यराजास्पदं यतः ।
ततोऽत्र कोपमत्यर्थं योक्तुमर्हसि नार्भके ॥
न त्यक्ष्यति हरेः पक्षमस्माकं वचनाद्यदि ।
ततः कृत्यां वधायास्य करिष्यामो निवर्तनीम् ॥

पराशर उवाच ।

एवमभ्यर्थितस्तैस्तु दैत्यराजपुरोहितैः ।
दैत्यैर्निष्कासयामास पुत्रं पावकसञ्चयात् ॥

७॥

ततो गुरुगृहे बालः स वसन् बालदानवान् ।
अध्यापयामास मुहुरुपदेशान्तरे गुरोः ॥

प्रह्लाद उवाच ।

श्रूयतां परमार्थोऽयं दैतेया दितिजात्मजाः ।
न चान्यथैतन्मन्तव्यं नात्र लोभादिकारणम् ॥
जन्म बाल्यं ततः सर्वो जन्तुः प्राप्नोति यौवनम् ।
अव्याहतैव भवति ततोऽनुदिवसं जरा ॥
ततश्च मृत्युमभ्येति जन्तुर्दैत्येश्वरात्मजाः ।
प्रत्यक्षं दृश्यते चैतदस्माकं भवतां तथा ॥
मृतस्य च पुनर्जन्म भवत्येतच्च नान्यथा ॥
आगमोऽयं तथा तच्च नोपादानं विनोद्भवः ।
गर्भवासादि यावत्तु पुनर्जन्मोपपादनम् ।
समस्तावस्थकं तावद्दुःखमेवावगम्यताम् ॥
क्षुत्तृष्णोपशमं तावत् शीताद्युपशमं सुखम् ।
मन्यते बालबुद्धित्वाद्दुःखमेव हि तत्पुनः ॥
अत्यन्तस्तिमिताङ्गानां व्यायामेन सुखैषिणाम् ।
भ्रान्तिज्ञाननिवृत्तानां प्रहारोऽपि सुखायते ॥
क्व शरीरमशेषाणां श्लेष्मादीनां महाचयः ।
क्व चातिशोभासौरभ्यकमनीयादयो गुणाः ॥
मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थिसंहतौ ।
देहे चेत् प्रीतिमान् मूढो भविता नरकेऽपि सः ॥
अग्नेः शीतेन तोयस्य तृषा भक्तस्य चक्षुषा ।
क्रियते सुखकर्तृत्वं तद्विलोमस्य चेतरैः ॥
करोति हे दैत्यसुता यावन्मात्रं परिग्रहम् ।

तावन्मात्रं स एवास्य दुःखं चेतसि यच्छति ॥
यावतः कुरुते जन्तुः संबन्धान्मनसः प्रियान्।
तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः ॥
जन्मन्यत्र महद्दुःखं म्रियमाणस्य वाऽपि तत्।
यातना तु यमस्योग्रा गर्भसंक्रमणेषु च।
गर्भे च सुखलेशोऽपि भवद्भिरुपनीयते ॥
यदि तत्कथ्यतामेवं सर्वदुःखमयं जगत्।
तदेवमतिदुःखानि योऽस्य हेतुर्भवार्णवे।
भवतां कथ्यते सत्यं विष्णुरेष परायणम् ॥
मा जानीत वयं बाला देही देहेषु शाश्वतः।
जरायौवनधर्मा हि धर्मा देहस्य नात्मनः ॥
बालोऽहं तावदिच्छामि यतिष्ये श्रेयसे युवा।
युवा ऽहं वार्द्धके प्राप्ते करिष्याम्यात्मनो हितम् ॥
वृद्धोऽहं मम कार्य्याणि समस्तानि न गोचरे।
किं करिष्यामि मन्दात्मा समर्थेन न यत् कृतम् ॥
एवं दुराशयाक्षिप्तमानसः पुरुषः सदा।
श्रेयसोऽभिमुखं याति न कदाचित् पिपासितः ॥
बाल्ये क्रीडनकासक्ता यौवने विषयोन्मुखाः।
अज्ञाशयान्यसक्ताश्च वार्द्धकं समुपस्थितम् ॥
तस्माद्बाल्ये विवेकात्मा यतेत श्रेयसे तदा।
बाल्ययौवनवृद्धाद्यैर्देही भावैरसंयुतः ॥
तदेतद्धि मयाख्यातं यदि जानीत नानृतम्।
तदास्मत्प्रीतये विष्णुः स्मर्यतां बन्धमुक्तिदः ॥
आयासः स्मरणे कोऽस्य स्मृतो यच्छति शोभनम्।

पापक्षयश्च भवति स्मरतां तमहर्निशम् ॥
सर्वभूतहिते तस्मिन् मतिर्मैत्री दिवानिशम् ।
भवतां जायतामेवं सर्वक्लेशान् प्रहास्यथ ॥
तापत्रयेणाभिहतं यदेतदखिलं जगत् ।
तदा शोच्येषु भूतेषु द्वेषं प्राज्ञः करोति कः ॥
अथ भद्राणि भूतानि हीनशक्तिरहं परम् ।
मुदं तथापि कुर्वीतहानिर्द्वेषफलं यतः ॥
बद्धवैराणि भूतानि द्वेषं कुर्वन्ति वै ततः ।
तानि शोच्यानि मोहेन व्याप्तानीति मनीषिणाम् ॥
एते भिन्नक्रिया दैत्या विकल्पाः कथिता मया ।
कृत्वाभ्युपगमं तत्र संक्षेपः श्रूयतां मम ॥
विस्तारः सर्वभूतस्य विष्णोर्विश्वमिदं जगत् ।
द्रष्टव्यमात्मवत्तस्मादभेदेन विचक्षणैः ॥
समुत्सृज्यासुरं भावं तस्माद्यूयं तथा वयम् ।
तथा यत्नं करिष्यामो यथा प्राप्स्याम निर्वृतिम् ॥
येनाग्निना नवार्केन नेन्दुना नैव वायुना ।
पर्जन्यवरुणाभ्यां वा न सिद्धैर्नैव राक्षसैः ॥
न यक्षैर्नैव दैत्येन्द्रैर्नोरगैर्न च किन्नरैः ।
न मनुष्यैर्न पशुभिर्दोषैर्नैवात्मसंभवैः ॥
ज्वरातिरोगातिसारप्लीहगुल्मादिकैस्तथा ।
दोषेर्ष्यामत्सराद्यैश्च रागलोभादिभिः क्षयम् ॥
न चान्यैर्नीयते कैश्चिन्नित्यायात्यन्तनिर्मला ।
तामाप्नोत्यमले न्यस्य केशवे हृदयं नरः ॥
असारसंसारविवर्तनेषु मा यात तोषं प्रसभं ब्रवीमि ।

सर्वत्र दैत्याः समतामुपेत्य समत्वमाराधनमच्युतस्य ॥
अस्मिन् प्रसन्ने किमिहाऽस्त्यलभ्यं धर्मार्थकामैरलमल्पकास्ते ।
समाश्रिता ब्रह्मतरोरनन्तान्निःसंशयं प्राप्स्यथ वै महत् फलम् ॥

पराशर उवाच ।

तस्यैतद्दानवाश्चेष्टा दृष्ट्वा दैत्यपतेर्भवान् ।
आचख्युश्च स चोवाच सूदानाहूय सत्वरम् ॥

हिरण्यकशिपुरुवाच ।

हे सूदा मम पुत्रोऽसावन्येषामपि दुर्मतिः ।
कुमार्गदेशको दुष्टो हन्यतामविलम्बितम् ॥
हालाहलं विषं तस्य सर्वभक्ष्येषु दीयताम् ।
अविज्ञातमसौ पापो वध्यतां मा विचार्यताम् ॥

पराशर उवाच ।

ते तथैव ततश्चक्रुः प्रह्लादाय महात्मने ।
विषदानं यथाज्ञप्तं पित्रा तस्य महात्मनः ॥
हालाहलं विषं घोरमनन्तोच्चारणेन सः ।
अभिमन्त्र्य सहान्नेन मैत्रेय बुभुजे तदा ॥
अविकारं सकद्भुक्त्वा प्रह्लादः स्वस्थमानसः ।
अनन्तख्याति निर्वीर्यं जरयामास दुर्विषम् ॥
ततः सूदा भयत्रस्ता जीर्णं दृष्ट्वा महाविषम् ।
दैत्येश्वरमुपागम्य प्रणिपत्येदमब्रुवन् ॥

सूदा ऊचुः ।

दैत्यराज विषं दत्तमस्माभिरतिभीषणम् ।
जीर्णं तच्च सहान्नेन प्रह्लादेन सुतेन ते ॥

हिरण्यकशिपुरुवाच।

त्वर्यतां त्वर्यतां सद्यो हे हे दैत्यपुरोहिताः।
कृत्यां तस्य विनाशाय उत्पादयत मा चिरम्॥

पराशर उवाच।

सकाशमागम्य ततः प्रह्लादस्य पुरोहिताः।
सामपूर्वमथ प्रोचुः प्रह्लादं विनयान्वितम्॥

पुरोहिता ऊचुः।

जातस्त्रैलोक्यविख्याते आयुष्मान् ब्रह्मणः कुले।
दैत्यराजस्य तनयो हिरण्यकशिपोर्भवान्॥
किं देवैः किमनन्तेन किमन्येन तवाश्रयः।
पिता ते सर्वलोकानां त्वं तथैव भविष्यसि॥
तस्मात् परित्यजैतां त्वं विपक्षभवसंहिताम्।
बाढं पिता समस्तानां गुरूणां परमो गुरुः॥

प्रह्लाद उवाच।

एवमेतत् महाभागाः श्लाघ्यते तन्महाकुलम्।
मरीचेः सकलेऽप्यस्मिन् त्रैलोक्ये कोऽन्यथाऽवदेत्॥
पिता च मम सर्वस्मिन् जगत्युत्कृष्टचेष्टितः।
एतदप्यवगच्छामि सत्यमेवात्र नानृतम्॥
गुरूणामपि सर्वेषां पिता च परमो गुरुः।
यदुक्तं भ्रान्तिरत्रापि स्वल्पापि हि न विद्यते॥
पिता गुरुर्न संदेहः पूजनीयः प्रयत्नतः।
तत्रापि नापराध्यामीत्येवं मनसि मे स्थितम्॥
यत्त्वेतत् किमनन्तेनेत्युक्तं युष्माभिरीदृशम्।
को ब्रवीति यथा युक्तं किन्तु नैतद्वचोऽर्थवत्॥

पराशर उवाच।

इत्युक्ता सोऽभवन्मौनी तेषां गौरवयन्त्रितः।
प्रहस्य च पुनः प्राह किमनन्तेन साध्विति॥

प्रह्लाद उवाच।

साधु भोः किमनन्तेन साधु भो गुरवो मम।
श्रूयतां तदनन्तेन यदि खेदं न गच्छत॥
धर्मार्थकाममोक्षाख्यः पुरुषार्थ उदाहृतः।
चतुष्टयमिदं यस्मात् तस्मात् किं किमिदं वृथा॥
मरीचिमिश्रैर्दक्षाद्यैस्तथैवान्यैरनन्ततः।
धर्मः प्राप्तस्तथैवान्यैरर्थः कामस्तथा परैः॥
तत् तत्त्ववेदिनो भूत्वा ज्ञानध्यानसमाधिभिः।
अवापुर्मुक्तिमपरे पुरुषा ध्वस्तबन्धनाः॥
संपदैश्वर्यमाहात्म्यं ज्ञानसन्ततिकर्मणाम्।
विमुक्तेश्चैकतालभ्यममलाराधनं हरेः॥
यतो धर्मार्थकामाख्यं मुक्तिश्चापि फलं द्विजाः।
तेनापि किं किमित्येवमनन्तेन किमुच्यते॥

पुरोहिता ऊचुः।

दह्यमानस्त्वमस्माभिरग्निना बाल रक्षितः।
भूयो न वक्ष्यसीत्येवं नैवं ज्ञातोऽसि बुद्धिमान्॥
यद्यस्मद्वचनान्मोहग्राहं न त्यक्ष्यते भवान्।
ततः कृत्यां विनाशाय तव स्रक्ष्याम दुर्मते॥

प्रह्लाद उवाच।

कः केन हन्यते जन्तुर्जन्तुः कः केन रक्ष्यते।
हन्ति रक्षति चैवात्मा ह्यसत् साधु समाचरन्॥

इत्युक्तास्तेन ते क्रुद्धा दैत्यराजपुरोहिताः।
कृत्यामुत्पादयामासुर्ज्वालामालोज्ज्वलाकृतिम्॥
अतिभीमा समागम्य पादन्यासक्षतक्षितिः।
शूलेन सा च संक्रुद्धा तं जघान तु वक्षसि॥
तत् तस्य हृदयं प्राप्य शूलं बालस्य दीप्तिमत्।
जगाम खण्डितं भूमौ तत्रापि शतधा गतम्॥
यत्रानपायी भगवान् हृद्यास्ते हरिरीश्वरः।
भङ्गो भवति वज्रस्य तत्र शूलस्य का कथा॥
अपापे तत्र पापैश्च पातिता दैत्ययाजकैः।
तानेव सा जघानाशु कृत्या नाशं जगाम सा॥
कृत्यया दह्यमानांस्तान् विलोक्य स महामतिः।
रक्ष कृष्णेत्यनन्तेति वदन्नभ्युपपद्यत॥
त्राहि विप्रानिमानस्माद्दुःसहान्मन्त्रपावकात्।
यथा सर्वेषु भूतेषु सर्वव्यापी जगद्गुरुः॥
विष्णुरेव तथा सर्वे जीवन्त्वेते पुरोहिताः।
यथागतं विष्णुं मन्यमानो न पातकम्॥
चिन्तयाम्यरिपक्षेऽपि जीवन्त्वेते पुरोहिताः।
ये हन्तुमागता दत्तं यैर्विषं यैर्हुताशनः॥
यैर्दिग्गजैरहं क्षुण्णो दष्टः सर्पैश्च यैरहम्।
तैरहं मित्रपक्षे च समः पापोऽस्मि न क्वचित्॥
यथा तेनाद्य सत्येन जीवन्त्वसुरयाजकाः।

पराशर उवाच।

इत्युक्तेन ते सर्वे संस्पृष्टाश्च निरामयाः।
समुत्तस्थुर्द्विजा भूयस्तं चोचुः प्रश्रयान्वितम्॥

पुरोहिता ऊचुः ।

दीर्घायुरप्रतिहतो बलवीर्यसमन्वितः ।
पुत्त पुत्त धनैश्वर्यैर्युक्तो वत्स भवोत्तमः ॥

पराशर उवाच ।

इत्युक्तास्ते ततो गत्वा यथा वृत्तं पुरोहिताः ।
दैत्यराजाय सकलमाचख्युर्वै महामुने ॥
हिरण्यकशिपुः श्रुत्वा तां कृत्यां वितथीकृताम् ।
आहूय पुत्रं पप्रच्छ प्रभावस्यास्य कारणम् ॥

हिरण्यकशिपुरुवाच ।

प्रह्लाद सुप्रभावोऽसि किमेतत् ते विचेष्टितम् ।
एतन्मन्त्रादिजनितमुताहो सहजं तव ॥

पराशर उवाच ।

एवं पृष्टस्तदा पित्रा प्रह्लादोऽसुरबालकः ।
प्रणिपत्य पितुः पादाविदं वचनमब्रवीत् ॥
न मन्त्रादिकृतस्तात न च नैसर्गिको मम ।
प्रभाव एष सामान्यो यस्य यस्याच्युतो हृदि ॥
अन्येषां यो न पापानि चिन्तयेदात्मनो यथा ।
तस्य पापागमस्तात हेत्वभावान्न विद्यते ॥
कर्मणा मनसा वाचा परपीडां करोति यः ।
तद्बीजं तस्य फलति प्रभूतं तस्य वाऽशुभम् ॥
सोऽहं न पापमिच्छामि न करोमि वदामि न ।
चिन्तयन् सर्वभूतस्थमात्मन्यपि च केशवम् ॥
शारीरं मानसं दुःखं दैवं भूतं भवत् तथा ।
सर्वत्र शुभचित्तस्य तस्य मे जायते कुतः ॥

एवं सर्वेषु भूतेषु भक्तिरव्यभिचारिणी ।
कर्तव्या पण्डितैर्ज्ञात्वा सर्वभूतमयं हरिम् ॥

पराशर उवाच ।

इति श्रुत्वा स दैत्येन्द्रः प्रासादशिखरस्थितः ।
क्रोधान्धकारितमुखः प्राह दैत्येन्द्रकिङ्करान् ॥

हिरण्यकशिपुरुवाच ।

दुरात्मा क्षिप्यतामस्मात् प्रासादाच्छतयोजनात् ।
गिरिपृष्ठे पतत्वस्मिन् छिन्नभिन्नाङ्गसन्ततिः ॥

पराशर उवाच ।

ततस्तं चिक्षिपुः सर्वे बालं दैतेयकिङ्कराः ।
पपात सोऽप्यधः क्षिप्तो हृदयेनोद्वहन् हरिम् ॥
पतमानं जगद्धात्री जगद्धातरि केशवे ।
भक्तियुक्तं दधारैनमुपसङ्गम्य मेदिनी ॥
ततो विलोक्य तं स्वस्थमविशीर्णास्थिपञ्जरम् ।
हिरण्यकशिपुः प्राह शम्बरं मायिनां वरम् ॥
नास्माभिः शक्यते हन्तुमयं दुर्वृत्तबालकः ।
मायां वेत्ति भवांस्तस्मान्माययैनं निषूदय ॥

शम्बर उवाच ।

सूदयाम्येष दैत्येन्द्र पश्य मायाबलं मम ।
सहस्रमात्रं मायानां पश्य कोटीशतं तथा ॥

पराशर उवाच ।

ततः स सृजते मायाः प्रह्लादे शम्बरः सुते ।
विनाशमिच्छन् दुर्बुद्धिः सर्वत्र समदर्शिनि ॥
समाहितमना भूत्वा शम्बरोऽपि विमत्सरः ।

मैत्रेय सोऽपि प्रह्लादः सस्मार मधुसूदनम् ॥
ततो भगवता तस्य रक्षार्थं चक्रमुत्तमम् ।
आजगाम समाज्ञप्तं ज्वालामालि सुदर्शनम् ॥
तेन मायासहस्रं तु शम्बरस्याशुगामिना ।
बालस्य रक्षता देहमेकैकं तेन सूदितम् ॥
सन्तोषकं ततो वायुं दैत्येन्द्र इदमब्रवीत् ।
शीघ्रमेष समादेशात् दुरात्मा नीयतां क्षयम् ॥
तथेत्युक्तस्ततोऽप्येनं विवेश पवनो लघु ।
शीतोऽतिरूक्षः शोषाय तद्देहस्यातिदुःसहः ॥
तेनाविष्टमथात्मानं स बुद्ध्वा दैत्यबालकः ।
हृदयेन महात्मानं दधार धरणीधरम् ॥
हृदयस्थस्ततस्तस्य तं वायुमतिशोषणम् ।
पपौ जनार्दनः क्रुद्धः स ययौ पवनः क्षयम् ॥
क्षीणासु सर्वमायासु पवने संक्षयं गते ।
जगाम सोऽपि भवनं गुरोरेव महामतिः ॥
अहन्यहन्यथाचार्यो नीतिं राज्यफलप्रदाम् ।
ग्राहयामास तं बालं राज्ञामुशनसा कृताम् ॥
गृहीतनीतिशास्त्रं तं विनीतं स यदा गुरुः ।
मेने तदैनं तत्पित्रे कथयामास शिक्षितम् ॥

आचार्य उवाच ।

गृहीतनीतिशास्त्रस्ते पुत्रो दैत्यपते कृतः ।
प्रह्लादस्तत्त्वतो वेत्ति भार्गवेण यथेरितम् ॥

हिरण्यकशिपुरुवाच ।

मित्रेषु वर्तेत कथमरिपक्षेषु भूपतिः ।

प्रह्लाद त्रिषु लोकेषु मध्यस्थेषु कथं चरेत् ॥
कथं मन्त्रिषु सर्वेषु बाह्येष्वाभ्यन्तरेषु च ।
चरेषु चौरवर्गेषु शङ्कितेष्वितरेषु च ॥
कृत्याकृत्यविधानं च दुर्गाटविकसाधनम्
प्रह्लाद कथ्यतां सम्यक् तथा कण्टकशोधनम् ॥
एतच्चान्यच्च सकलमधीतं भवता यथा ।
तथा मे कथ्यतां ज्ञातुं तवेच्छामि मनोगतम् ॥

पराशर उवाच ।

प्रणिपत्य ततः पादौ पितुः प्रश्रयभूषणः ।
प्रह्लादः प्राह दैत्येन्द्रं कृताञ्जलिपुटः स्थितः ॥

प्रह्लाद उवाच ।

ममोपदिष्टं सकलं गुरुणा नात्र संशयः ।
गृहीतं च मया किन्तु न सदेतन्मतं मम ॥
साम चोपप्रदानं च भेददण्डौ तथा परे ।
उपायाः कथिता ह्येते मित्रादीनां तु साधने ॥
तानेवाहं न पश्यामि मित्रादींस्तात मा क्रुधः ।
साध्याभावे महाबाहो साधनैः किं प्रयोजनम् ॥
सर्वभूतात्मके तात जगन्नाथे जगन्मये ।
परमात्मनि गोविन्दे मित्रामित्रकथा कुतः ॥
त्वय्यस्ति भगवान् विष्णुर्मयि चान्यत्र चास्ति सः ।
यतस्ततोऽयं मित्रं मे शत्रुश्चेति पृथक् कुतः ॥
तदेभिरलमत्यर्थं दुष्टारम्भोक्तिविस्तरैः ।
अविद्यान्तर्गतैर्यत्नः कर्तव्यस्तात शोभने ॥
विद्याबुद्धिरविद्यायामज्ञानात् तात जायते ।

बालोऽग्निं किं न खद्योतमसुरेश्वर जायते ॥
तत्कर्म यन्न बन्धाय सा विद्या या विमुक्तये ।
आयासायापरं कर्म सा विद्या शिल्पनैपुणम् ॥
तदेतदवगम्याहमसारं सारमुत्तमम् ।
निशामय महाभाग प्रणिपत्य ब्रवीमि यत् ॥
न चिन्तयति को राज्यं को धनं नाभिवाञ्छति ।
तथापि भाव्यमेवैतदुभयं प्राप्यते नरैः ॥
सर्व एव महाभाग महत्त्वं प्रति कोद्यमः ।
तथापि पुंसां भाग्यानि नोद्यमा भूतिहेतवः ॥
जडानामविवेकानामसुराणामपि प्रभो ।
भाग्यभोज्यानि राज्यानि सन्त्यनीतिमतामपि ॥
तस्मात् यतेत पुण्येषु यदीच्छेन्महतीं श्रियम् ।
यतितव्यं समत्वेन निर्वाणमपि चेच्छता ॥
देवा मनुष्याः पशवः पक्षिवृक्षसरीसृपाः ।
रूपमेतदनन्तस्य विष्णोर्भिन्नमिवास्थितम् ॥
एतत् विजानता सर्वं जगत् स्थावरजङ्गमम् ।
द्रष्टव्यमात्मवद्विष्णुर्यतोऽयं विश्वरूपधृक् ॥
एवं ज्ञाते स भगवाननादिः पुरुषोत्तमः ।
प्रसीदत्यच्युतस्तस्मिन् प्रसन्ने क्लेशसंचयः ॥

पराशर उवाच ।

एतत् श्रुत्वा तु कोपेन समुत्थाय वरासनात् ।
हिरण्यकशिपुः पुत्रं पदा वक्षस्यताडयत् ॥
उवाच च स कोपेन सामर्षः प्रज्वलन्निव ।
निष्पिष्य पाणिना पाणिं हन्तुकामो जगद्यथा ॥

हिरण्यकशिपुरुवाच।

हे विप्रचित् ते हे राहो हेऽचलेऽत्र महार्णवे।
नागपाशैर्दृढैर्बध्वा क्षिप्यतां मा विलम्ब्यताम्॥
अन्यथा सकला लोकास्तथा दैतेयदानवाः
अनुयास्यन्ति मूढस्य मतमस्य दुरात्मनः॥
बहुशो वारितोऽस्माभिरयं पापस्तथापरैः।
स्तुतिं करोति दुष्टानां वध एवोपकारकः॥

पराशर उवाच।

ततस्ते सत्वरा दैत्या बध्वा तं नागबन्धनैः।
भर्तुराज्ञां पुरस्कृत्य चिक्षिपुर्लवणार्णवे॥
ततश्चचाल चलता प्रह्लादेन महार्णवः।
उद्वेलोऽभूत् परं क्षोभमुपेत्य च समन्ततः॥
भूर्लोकमखिलं दृष्ट्वा प्लाव्यमानं महाम्भसा।
हिरण्यकशिपुर्दैत्यानिदमाह महामते॥

हिरण्यकशिपुरुवाच।

दैतेयाः सकलैः शैलैरत्रैव वरुणालये।
निश्छिद्रैः सर्वतः सर्वैश्चीयतामेष दुर्मतिः॥
नाग्निर्दहति नैवायं शस्त्रैश्छिन्नो न चोरगैः।
क्षयं नीतो न वातेन न विषेण न कृत्यया॥
न मायाभिर्न वै चोच्चैः पातितो न च दिग्गजैः।
बालोऽतिदुष्टचित्तोऽयं नानेनार्थोऽस्ति जीवता॥
स्वपक्षहानिकर्त्तृत्वात् यः कुलाङ्गारतां गतः।
तदेष तोयधावत्र समाक्रान्तो महीधरैः॥
तिष्ठत्वब्दसहस्रान्ते प्राणान् हास्यति दुर्मतिः।

पराशर उवाच ।

ततो दैत्या दानवास्ते पर्वतैस्तं महोदधौ ।
आक्रम्य चयनं चक्रुर्योजनानि सहस्रशः ॥
स चितः पर्वतैरन्तः समुद्रस्य महामतिः ।
तुष्टावाह्निकवेलायामेकाग्रमतिरच्युतम् ॥

प्रह्लाद उवाच ।

नमस्ते पुण्डरीकाक्ष नमस्ते पुरुषोत्तम ।
नमस्ते सर्वलोकात्मन् नमस्ते तिग्मचक्रिणे ॥
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
ब्रह्मत्वे सृजते विश्वं स्थितौ पालयते नमः ।
रुद्ररूपाय कल्पान्ते नमस्तुभ्यं त्रिमूर्त्तये ॥
देवा यक्षाः सुराः सिद्धा नागा गन्धर्वकिन्नराः ।
पिशाचा राक्षसाश्चैव मनुष्याः पशवस्तथा ।
पक्षिणः स्थावराश्चैव पिपीलिकसरीसृपाः ।
भूरापोऽग्निर्नभो वायुः शब्दः स्पर्शस्तथा रसः ॥
रूपं गन्धो मनो बुद्धिरात्मा कालस्तथा गुणाः ।
एषां तु परमार्थश्च सर्वमेतत् त्वमच्युत ॥
विद्याविद्ये भवान् सत्यमसत्यं त्वं विषामृते ।
प्रवृत्तं च निवृत्तं च कर्म वेदोदितं भवान् ॥
समस्तकर्मभोक्ता च कर्मोपकरणानि च ।
त्वमेव विष्णो सर्वाणि सर्वकर्मफलं च यत् ॥
मय्यन्यत्र तथा शेषभूतेषु भुवनेषु च ।
तवैव व्याप्तिरैश्वर्यं गुणसंसूचकी प्रभो ॥

त्वां योगिनश्चिन्तयन्ति त्वां यजन्ति च याजकाः।
हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृक्॥
रूपं महत्तेऽच्युत यत्र विश्वं ततश्च सूक्ष्मं जगदेतदीश।
रूपाणि सूक्ष्माणि च भूतभेदास्ते स्वन्तरात्माख्यमतीव सूक्ष्मम्॥
तस्माच्च सूक्ष्मादिविशेषणानामगोचरे यत् परमार्थरूपम्।
किमप्यचिन्त्यं तव रूपमस्ति तस्मै नमस्ते पुरुषोत्तमाय॥
सर्वभूतेषु सर्वात्मन् या शक्तिरपरा तव।
गुणाश्रया नमस्तस्मै शाश्वताय सुरेश्वर॥
यातीतगोचरा वाचां मनसां चाविशेषणा।
ज्ञानज्ञानिपरिच्छेद्या तां वन्दे चेश्वरीं पराम्॥
ॐ नमो वासुदेवाय तस्मै भगवते सदा।
व्यतिरिक्तं न यस्यास्ति व्यतिरिक्तोऽखिलस्य यः॥
नमस्तस्मै नमस्तस्मै नमस्तस्मै महात्मने।
नाम रूपं न यस्यैको योऽस्तित्वेनोपलभ्यते॥
यस्यावताररूपाणि समर्चन्ति दिवौकसः।
अपश्यन्तः परं रूपं नमस्तस्मै परात्मने॥
योऽन्तस्तिष्ठन्नशेषस्य पश्यतीशः शुभाशुभे।
तत्सर्वं साक्षिणं विष्णुं नमस्ये परमेश्वरम्॥
नमोऽस्तु विष्णवे तस्मै यस्याभिन्नमिदं जगत्।
ध्येयः स जगतामाद्यः प्रसीदतु स मेऽव्ययः॥
यत्रोतमेतत् प्रोतञ्च विश्वमक्षयमव्ययम्।
आधारभूतः सर्वस्य प्रसीदतु स मे हरिः॥
ॐ नमो विष्णवे तस्मै नमस्तस्मै पुनः पुनः।
यत्र सर्वं यतः सर्वं यः सर्वः सर्वसंश्रयः॥

सर्वगत्वादनन्तस्य स एवाहमयं स्थितः ।
मत्तः सर्वमहं सर्वं मयि सर्वं सनातने ॥
अहमेवाक्षयो नित्यः परमात्मात्मसंश्रयः ।
ब्रह्मसंज्ञोऽहमेवाग्रे तथान्ते च पुनः पुमान् ॥

पराशर उवाच ।

एवं सञ्चिन्तयन् विष्णुमभेदेनात्मनो द्विज ।
तन्मयत्वमवाप्याग्र्यं मेने चात्मानमच्युतम् ॥
विसस्मार तथात्मानं नान्यत् किञ्चिदजानत ।
अहमेवाव्ययोऽनन्तः परमात्मेत्यचिन्तयत् ॥
तस्य तद्भावनायोगात् क्षीणपापस्य वै क्रमात् ।
शुद्धेऽन्तःकरणे विष्णुस्तस्थौ ज्ञानमयोऽच्युतः ॥
योगप्रभावात् प्रह्लादे जाते विष्णुमयेऽसुरे ।
चलत्युरगबन्धैस्तैर्मैत्रेय त्रुटितं क्षणात् ॥
भ्रान्तग्राहगणः सोर्मिर्ययौ क्षोभं महार्णवः ।
चचाल च मही सर्वा सशैलवनकानना ॥
स च तं शैलसङ्घातं दैत्यैर्न्यस्तमथोपरि ।
प्रक्षिप्य सलिलात् तस्मान्निश्चक्राम महामतिः ॥
स दृष्ट्वा च जगद्भूयो गगनाद्युपलक्षणम् ।
प्रह्लादोऽस्मीति सस्मार पुनरात्मानमात्मना ॥
तुष्टाव च पुनर्धीमाननादिं पुरुषोत्तमम् ।
एकाग्रमतिरव्यग्रो यतवाग् यतमानसः ॥

प्रह्लाद उवाच ।

ॐ नमः परमार्थाय स्थूलसूक्ष्मक्षराक्षर ।
व्यक्ताव्यक्तकलातीत सकलेश निरञ्जन ॥

गुणाञ्जन गुणाधार निर्गुणात्मन् गुणस्थित ।
मूर्तामूर्त्त महामूर्त्ते सूक्ष्ममूर्त्ते स्फुटास्फुटे ॥
करालरूप सौम्यात्मन् विद्याविद्यामयाच्युत ।
सदसद्रूप सद्भाव सदसद्भाव भावन ॥
नित्यानित्यप्रपञ्चात्मन् निष्प्रपञ्चखिलाखिल ।
एकानेक नमस्तुभ्यं वासुदेवादिकारण ॥
यः स्थूलसूक्ष्माप्रकटप्रकाशो यः सर्वभूतो न च सर्वभूतः ।
विश्वं यतश्चैतदविश्वहेतोर्नमोऽस्तु तस्मै पुरुषोत्तमाय ॥

पराशर उवाच ।

तस्य तच्चेतसो देवः स्तुतिमित्थं प्रकुर्वतः ।
आविर्बभूव भगवान् पीताम्बरधरो हरिः ॥
ससंभ्रमस्तमालोक्य समुत्थायाकुलाक्षरम् ।
नमोऽस्तु विष्णवेत्येतद्व्याजहारासकृद्द्विज ॥

प्रह्लाद उवाच ।

देव प्रपन्नार्त्तिहर प्रसीद कुरु केशव ।
अवलोकनदानेन भूयो मां पावयाऽव्यय ॥

श्रीभगवानुवाच ।

कुर्वतस्ते प्रसन्नोऽहं भक्तिरव्यभिचारिणी ।
यथाभिलषितो मत्तः प्रह्लाद व्रियतां वरः ॥

प्रह्लाद उवाच ।

नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहम् ।
तेषु तेष्वच्युता भक्तिरच्युताऽस्तु सदा त्वयि ॥
या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
त्वामनु स्मरतः सा मे हृदयान्मापसर्पतु ॥

श्रीभगवानुवाच ।

मयि भक्तिस्तथास्त्येवं भूयोऽप्येवं भविष्यति ।
वरश्च मत्तः प्रह्लाद व्रियतां यस्त्वयेप्सितः ॥

प्रह्लाद उवाच ।

मयि द्वेषानुबन्धोऽभूत् संस्तुतावुद्यते तव ।
मत्पितुस्तत्कृतं पापं देव तस्य प्रणश्यतु ॥
शस्त्राणि पातितान्यङ्गे क्षिप्तो यच्चाग्निसंहतौ ।
दंशितश्चोरगैर्दत्तं यद्विषं मम भोजने ॥
बद्ध्वा समुद्रे प्रक्षिप्तो यच्चितोऽस्मि शिलोच्चयैः ।
अन्यानि वाऽप्यसाधूनि यानि यानि कृतानि मे ॥
त्वयि भक्तिमतो द्वेषादघं तत्संभवं च यत् ।
त्वत्प्रभावात् प्रभो सद्यस्तेन मुच्यतु मत्पिता ॥

भगवानुवाच ।

प्रह्लाद सर्वमेतत्ते मत्प्रसादाद्भविष्यति ।
अन्यच्च ते वरं दद्मि व्रीयतां मेऽसुरात्मज ॥

प्रह्लाद उवाच ।

कृतकृत्योऽस्मि भगवन् वरेणानेन यत्त्वयि ।
भवित्री त्वत्प्रसादेन भक्तिरव्यभिचारिणी ॥
धर्मार्थकामैः किं तस्य मुक्तिस्तस्य करे स्थिता ।
समस्तजगतां मूले यस्य भक्तिः स्थिता त्वयि ॥

भगवानुवाच ।

यथा ते निश्चलं चेतो मयि भक्तिसमन्वितम् ।
तथा त्वं मत्प्रसादेन निर्वाणं समवाप्स्यसि ॥

पराशर उवाच।

इत्युक्त्वाऽन्तर्दधे विष्णुस्तस्य मैत्रेय पश्यतः।
स चापि पुनरागत्य ववन्दे चरणौ पितुः॥
तं पिता मूर्द्ध्न्युपाघ्राय परिष्वज्य च पीडितम्।
जीवसीत्याह वत्सेति बाष्पार्द्रनयनो द्विज॥
प्रीतिमांश्चाभवत्तस्मिन्ननुतापी महासुरः।
गुरोः पित्रोश्चकारैवं शुश्रूषां सर्वधर्मवित्॥
धर्मात्मा सत्यशौचादिगुणानामाकरः परः।
उपमानमशेषाणां साधूनां यः सदाऽभवत्॥
पितर्य्युपरतिं नीते नरसिंहस्वरूपिणा।
विष्णुना सोऽपि दैत्यानां मैत्रेयाभूत् पतिस्ततः॥
ततो राज्यद्युतिं प्राप्य कर्मशुद्धिकरीं द्विज।
पुत्रपौत्रांश्च सुबहूनवाप्यैश्वर्यमेव च॥
क्षीणाधिकारः स यदा पुण्यपापविवर्जितः।
तदाऽसौ भगवद्ध्यानात् परं निर्वाणमाप्तवान्॥
एवं प्रभावो दैत्योऽसौ मैत्रेयासीन्महामतिः।
प्रह्लादो भगवद्भक्तो यत्त्वं मामनुपृच्छसि॥
यस्त्वेतच्चरितं तस्य प्रह्लादस्य महात्मनः।
शृणोति तस्य पापानि सद्यो गच्छति संचयम्॥
अहोरात्रकृतं पापं प्रह्लादचरितं नरः।
शृण्वन् पठंश्च मैत्रेय व्यपोहति न संशयः॥
पौर्णमास्याममावास्यामष्टम्यामथवा पठन्।
द्वादश्यां वै तदाप्नोति गोप्रदानफलं द्विज॥
प्रह्लादं सकलापत्सु यथा रक्षितवान् हरिः।

तथा रक्षति यस्तस्य शृणोति चरितं सदा ॥

इति श्रीविष्णुपुराणोक्तं प्रह्लादचरितम् ॥

इति श्रीभक्तिसागरे प्रह्लादचरितनिरूपणं नाम तृतीयस्तरङ्गः ॥

जनमेजय उवाच ।

सभायां वसतोस्तत्र निहत्यारीन् महात्मनोः ।
केशवार्जुनयोः का नु कथा समभवद्द्विज ॥

वैशम्पायन उवाच ॥

कृष्णेन सहितः पार्थः स्वराज्यं प्राप्य केवलम् ।
तस्यां सभायां दिव्यायां विजहार मुदा युतः ॥
ततः कश्चित् सभोद्देशं स्वर्गोद्देशसमं नृप ।
यदृच्छया च तौ मुदितौ जग्मतुः स्वजनावृतौ ॥
ततः प्रतीतः कृष्णेन सहितः पाण्डवोऽर्जुनः ।
निरीक्ष्य तां सभां रम्यामिदं वचनमब्रवीत् ॥
विदितं ते महाबाहो संग्रामे समुपस्थिते ।
माहात्म्यं देवकीमातः तच्च ते रूपमैश्वरम् ॥
यत्तु तद्भवता प्रोक्तं पुरा केशव सौहृदात् ।
तत्सर्वं पुरुषव्याघ्र नष्टं मे भ्रष्टचेतसः ॥
तन्मे कौतूहलं त्वस्ति तेष्वर्थेषु पुनः पुनः ।
भवांश्च द्वारकां गन्ता न चिरादिव माधव ॥

वैशम्पायन उवाच ।

एवमुक्तस्ततः कृष्णः फाल्गुनं प्रत्यभाषत ।
परिष्वज्य महातेजा वचनं वदतां वर ॥

वासुदेव उवाच ।

श्रावितस्त्वं मया पूर्वं ज्ञापितश्च सनातनः ।

स्वधर्मरूपिणं पार्थ सर्वलोकांश्च शाश्वतान् ॥
अबुद्ध्या नाग्रहीर्यस्त्वं तन्मे सुमहदप्रियम्।
न च सा ऽद्य पुनर्भूयः स्मृतिर्मे संभविष्यति ॥
नूनमश्रद्दधानो ऽसि दुर्मेधा ह्यसि पाण्डव।
न च शक्यः पुनर्वक्तुमशेषेण धनञ्जय ॥
स हि धर्मः सुपर्याप्तो ब्रह्मणः पदवेदने।
न शक्यस्तन्मया भूयस्तथा वक्तुमशेषतः ॥
परं हि ब्रह्म कथितं योगयुक्तेन तन्मया।
इतिहासन्तु वक्ष्यामि तस्मिन्नर्थे पुरातनम् ॥
यथा तां बुद्धिमास्थाय गतिमग्र्यां गमिष्यसि।
शृणु धर्मविदां श्रेष्ठ गदितं सर्वमेव मे ॥
आगच्छद्ब्राह्मणः कश्चित् स्वर्गलोकादरिन्दम।
ब्रह्मलोकादुदुर्धर्षः सो ऽस्माभिः पूजितो ऽभवत् ॥
अस्माभिः परिपृष्टश्च यदा ऽऽह भरतर्षभ।
दिव्येन विधिना पार्थ तच्छृणुष्वाविचारयन् ॥

ब्राह्मण उवाच।

मोक्षधर्मं समाश्रित्य कृष्ण यन्मामपृच्छथाः।
भूतानामनुकम्पार्थं यन्मोहच्छेदनं प्रभो ॥
तत्ते ऽहं संप्रवक्ष्यामि यथावन्मधुसूदन।
शृणुष्वावहितो भूत्वा गदतो मम माधव ॥
कश्चिद्विप्रस्तपोयुक्तः काश्यपो धर्मवित्तमः।
आससाद द्विजः कञ्चिद्धर्माणामागतं गतम् ॥
गतागतं सुबहुशो ज्ञानविज्ञानपारगम्।
लोकतत्त्वार्थकुशलं ज्ञातारं सुखदुःखयोः ॥

जातीमरणतत्त्वज्ञं कोविदं पुण्यपापयोः ।
द्रष्टारमुच्चनीचानां कर्मभिर्देहिनां गतिम् ॥
चरन्तं मुक्तवत्सिद्धं प्रशान्तं संयतेन्द्रियम् ।
दीप्यमानं श्रिया ब्राह्मया क्रममाणं च सर्वशः ॥
अन्तर्द्धानगतिज्ञञ्च श्रुत्वा तत्त्वेन काश्यपः ।
तथैवान्तर्हितैः सिद्धैर्यान्तं चक्रधरैः सह ॥
सम्भाष्यमाणमेकान्ते समासीनं च तैः सह ।
यदृच्छया च गच्छन्तमसक्तं पवनं यथा ॥
तं समासाद्य मेधावी स तदा द्विजसत्तम ।
चरणौ धर्मकामोऽस्य तपस्वी सुसमाहितः ॥
प्रतिपेदे यथान्यायं भक्त्या परमया युतः ।
विस्मितश्चाद्भुतं दृष्ट्वा काश्यपस्तं द्विजोत्तमम् ॥
विस्मितः परिचारेण महता पर्यतोषयत् ।
उपपन्नश्च तत्सर्वं श्रुतिचारित्रसंयुतः ॥
भावेन तोषयच्चैनं गुरुवृत्त्या परन्तप ।
तस्मै तुष्टः स शिष्याय प्रसन्नो वाक्यमब्रवीत् ॥
सिद्धिं परामभिप्रेक्ष्य शृणु मत्तो जनार्दन ।
विविधैः कर्मभिस्तात पुण्यैर्योगैश्च केवलैः ॥
गच्छन्तीह गतीर्मर्त्या देवलोके च संस्थितिम् ।
न क्वचित् सुखमत्यन्तं न क्वचिच्छाश्वता गतिः ॥
स्थानाच्च महतो भ्रंशो दुःखं लब्ध्वा पुनः पुनः ।
अशुभा गतयः प्राप्ताः कष्टा याः पापसेवनात् ॥
काममन्युपरीतेन तृष्णया मोहितेन च ।
पुनः पुनश्च मरणं जन्म चैव पुनः पुनः ॥

आहारा विविधा भुक्ताः पीता नानाविधाः स्तनाः।
भ्रातरो विविधा दृष्टाः पितरश्च पृथग्विधाः॥
सुखानि च विचित्राणि दुःखानि च मया ऽनघ।
प्रियैर्विवासो बहुभिः संवासश्च प्रियैः सह॥
धननाशश्च संप्राप्तो लब्ध्वा दुःखेन तद्धनम्।
अपमानाः सुकष्टाश्च राजतः स्वजनात्तथा।
शारीरा मानसाश्चापि वेदना भृशदारुणाः।
प्राप्ता विमाननाश्चोग्राः वधबन्धाश्च दारुणाः॥
पतनं निरये चैव यातनाश्च युगक्षये।
जरारोगाश्च सततं व्यसनानि च भूरिशः।
लोके ऽस्मिन्ननुभूतानि द्वन्द्वजानि भृशं मया।
ततः कदाचिन्निर्वेदान्निराकाराश्रितेन च॥
लोकतन्त्रं परित्यक्तं दुःखार्तेन भृशं मया।
ततः सिद्धिरियं प्राप्ता प्रसादादात्मनो मया॥
न हि पुनरिहागन्ता लोकानालोकयाम्यहम्।
आ सिद्धेरा प्रजासर्गादात्मनोऽथ गतिः शुभा॥
उपलब्धा द्विजश्रेष्ठ तथेयं बुद्धिरुत्तमा।
इतः परं गमिष्यामि ततः परतरं ततः॥
ब्रह्मणः पदमव्ययं मा ते ऽभूदत्र संशयः।
नाऽहं पुनरिहागन्ता मर्त्यलोकं परन्तप॥
प्राप्तो ऽस्मि ते महाप्राज्ञ ब्रूहि किं करवाणि ते।
यदीप्सुरुपपन्नस्त्वं तस्य कालो ऽयमागतः।
अभिजाने च तदहं यदर्थं मामुपागतः॥
अचिरात्तु गमिष्यामि येनाहं त्वामचूचुदम्।

भृशं प्रीतोऽस्मि भवतश्चारित्रेण विचक्षण ॥
परिपृच्छस्व कल्याणं भाषेयं यत्र चेप्सितम्।
बहु मन्ये च ते बुद्धिं भृशं संपूजयामि च ॥
येनाहं भवता बुद्धो मेधावी ह्यसि काश्यप।

वासुदेव उवाच।

ततस्तस्योपसंगृह्य पादौ प्रश्नान् सुदुर्वचान्।
पप्रच्छ तांश्च सर्वान् स प्राह धर्मभृतां वरः ॥

काश्यप उवाच।

कथं शरीरं च्यवते कथं चैवोपजायते।
कथं कष्टाच्च संसारात् संसरन् परिमुच्यते ॥
आत्मा च प्रकृतिं मुक्त्वा तच्छरीरं विमुञ्चति।
शरीरं तद्विनिर्मुक्तः कथमन्यत् प्रपद्यते ॥
कथं शुभाशुभे चायं कर्मणी कुरुते नरः।
उपभुङ्क्ते क्व वा कर्म विदेहस्यावतिष्ठते ॥

ब्राह्मण उवाच।

एवं सञ्चोदितः सिद्धः प्रश्नांस्तान् प्रत्यभाषत।
आनुपूर्व्येण वार्ष्णेय तन्मे निगदतः शृणु ॥

सिद्ध उवाच।

आयुःकीर्त्तिकराणीह यानि कृत्यानि सेवते।
बुद्धिर्व्यावर्तते चास्य विनाशे प्रत्युपस्थिते ॥
सत्त्वं बलं च कालं च विदित्वा चात्मनस्तथा।
अतिवेलमुपाश्नाति तैर्विरुद्धान्यनात्मवान् ॥
यदा ऽयमतिकष्टानि सर्वाण्युपनिषेवते।
अत्यर्थमपि वा भुङ्क्ते न वा भुङ्क्ते कदाचन ॥

दुष्टान्नामिषपानं वा यदन्योन्यविरोधि वा ।
गुरु वापि समं भुङ्क्ते नातिजीर्णेऽपि वा पुनः ॥
व्यायाममतिमात्रं वा व्यपायं चोपसेवते ।
सततं कर्मलोभाद्वा प्राप्तवेगं विधारयेत् ॥
न वातिभुक्तमन्नं वा यदि स्वप्नं च जायते ।
अपक्वान्नागते काले स्वयं दोषात् प्रकोपयेत् ॥
स्वदोषकोपनाद्रोगं लभते मरणान्तिकम् ।
अथ चेद्बन्धनादीनि परीतानि व्यवस्यति ॥
तस्य तैः कारणैर्जन्तोः शरीराच्चयवते यथा ।
जीवितं प्रोह्यमानं तद्यथावदुपधारय ॥
ऊष्मा प्रकुपितः काये तीव्रवायुसमीरितः ।
शरीरमनुपर्येति सर्वान् प्राणान् रुणद्धि वै ॥
अत्यर्थंबलवानूष्मा शरीरे परिकोपितः ॥
भिनत्ति जीवस्थानानि मर्माणि विद्धि तत्वतः ।
ततः सवेदनः सद्यो जीवः प्रच्यवति स्वयम् ॥
शरीराच्चयवते जन्तुः छिद्यमानेषु मर्मसु ॥
वेदनाभिः परीतात्मा तद्विद्धि द्विजसत्तम ।
जातीमरणसंविग्नाः सततं सर्वजन्तवः ॥
दृश्यन्ते सन्त्यजन्तश्च शरीराणि द्विजर्षभ ।
गर्भसंक्रमणे चापि मर्मणामभिसर्पणे ॥
तादृशीमेव लभते वेदनां मानवः पुनः ।
भिन्नसन्धिरथाक्लेदमद्भिः संलीयते नरः ॥
यथा यं च सुभूतेषु संश्रितत्वं नियच्छति ।
शैत्यात् प्रकुपितः काये तीव्रवायुसमीरितः ॥

यः स पञ्चसु भूतेषु प्राणायाने व्यवस्थितः।
स गर्भादूर्द्ध्वगो वायुः कृच्छ्रान्मुक्त्वा शरीरिणम्॥
शरीरं च जहात्येव निरुच्छ्वासश्च दृश्यते।
स निरूष्मा निरुच्छ्वासो निःश्रीको हतचेतनः॥
ब्रह्मणा सम्परित्यक्तो मृत इत्युच्यते नरः।
स्रोतोभिर्यैर्विजानाति इन्द्रियार्थान् शरीरभृत्॥
तैरेव हि खं जानाति प्राणानाहारसम्भवान्।
तत्रैव कुरुते काये यः स जीवः सनातनः॥
तेषां यद्यदङ्गवियुक्तं सन्निपाते क्वचित् क्वचित्।
तत्तत् कर्म विजानीहि शास्त्रदृष्टं हि तत्तथा॥
तेषु कर्मसु भिन्नेषु ततः स समुदीरयन्।
आविश्य हृदयं जन्तोः स त्वं चाशु रुणद्धि वै॥
ततः सचेतनो जन्तुर्नाभिजानाति किञ्चन।
तमसा संवृतज्ञानः संवृतेष्वेव मर्मसु॥
स जीवो निरधिष्ठानश्चवते मातरिश्वना।
ततः स तं महोच्छ्वासं भृशमुच्छ्वस्य दारुणम्॥
निष्क्रामत् कम्पयत्याशु तच्छरीरमचेतनम्।
स जीवः प्रच्युतः कायात् कर्मभिः स्वैः समावृतः॥
अङ्कितः स्वैः शुभैः पुण्यैः पापैर्वाऽप्युपपद्यते।
ब्राह्मणा ज्ञानसम्पन्ना यथावच्छ्रुतनिश्चयाः॥
इतरं कृतपुण्यं वा तं विजानन्ति लक्षणैः।
यथाऽन्धकारे खद्योतं नीयमानं ततस्ततः॥
चक्षुष्मन्तः प्रपश्यन्ति तथा तं ज्ञानचक्षुषः।
पश्यन्त्येवविधाः सिद्धाः जीवं दिव्येन चक्षुषा॥

च्यवन्तं जायमानं वा योनिं चानुप्रवेशितम्।
तस्य स्थानानि दृष्टानि त्रिविधानीह शास्त्रतः॥
कर्मभूमिरियं भूमिर्यत्र तिष्ठन्ति जन्तवः।
ततः शुभाशुभं कृत्वा लभन्ते सर्वदेहिनः॥
इहैवोच्चावचान् भोगान् प्राप्नुवन्ति स्वकर्मभिः।
इहैवाशुभकर्माणः कर्मभिर्निरयङ्गताः॥
अवाग्गतिरियं कष्टा यत्र पच्यन्ति मानवाः।
तस्मात् सुदुर्लभो मोक्षो रक्ष्यश्चात्मा ततो भृशम्॥
ऊर्द्धन्तु जन्तवो गत्वा येषु स्थानेष्ववस्थिताः।
कीर्त्त्यमानानि तानीह तत्त्वतः सन्निबोध मे॥
तच्छ्रुत्वा नैष्ठिकीं बुद्धिं बुद्ध्येथाः कर्मनिश्चयम्।
ताराऋूपाणि सर्वाणि यच्चैतच्चन्द्रमण्डलम्॥
यच्च विभ्राजते लोके विभास्वत्सूर्यमण्डलम्।
स्थानान्येतानि जानीत नराणां पुण्यकर्मणाम्॥
कर्मक्षयाच्च ते सर्वे च्यवन्ते वै पुनः पुनः।
तत्रापि च विशेषोऽस्ति दिवि नीचोच्चमध्यमः॥
न तत्राप्यस्ति सन्तोषो दृष्ट्वा दीप्ततरां श्रियम्।
इत्येता गतयः सर्वाः पृथक ते समुदीरिताः॥
उपपत्तिं तु वक्ष्यामि गर्भस्याहमतः परम्।
यथा तन्मे निगदतः शृणुष्वावहितो द्विज॥

ब्राह्मण उवाच।

शुभानामशुभानां च नेह नाशोऽस्ति कर्मणाम्।
प्राप्य प्राप्य तु पच्यन्ते क्षेत्रे क्षेत्रे तथा तथा॥
यथा प्रसूयमानस्तु फली दद्यात् फलं बहु।

तथा स्याद्विपुलं पुण्यं शुद्धेन मनसा कृतम् ॥
पुरोधाय मनो ह्यीदं कर्मण्यात्मा प्रवर्त्तते।
यथा कर्मसमाधिस्थः काममन्युसमावृतः ॥
नरो गर्भं प्रविशति तच्चापि शृणु चोत्तरम्।
शुक्रशोणितसंसृष्टं स्त्रीणां गर्भाशयागतम् ॥
क्षेत्रं गर्भजमाप्नोति शुभं वा यदि वाऽशुभम्।
सौक्ष्म्यादव्यक्तभावाच्च न च क्वचन सज्जति ॥
संप्राप्य ब्रह्मणः कायं तस्मात्तद् ब्रह्म शाश्वतम्।
तद्वीजं सर्वभूतानां तेन जीवन्ति जन्तवः ॥
स जीवः सर्वगात्राणि गर्भस्याविश्य भागशः।
ददाति चेतसा सद्यः प्राणस्थानेष्ववस्थितः ॥
ततः स्पन्दयतेऽङ्गानि स गर्भश्चेतसान्वितः।
यथा हि लोहविस्यन्दो निषिक्तो विम्बविग्रहम्।
उपेति तद्विजानीहि गर्भे जीवप्रवेशनम्।
लोहपिण्डं यथा वह्निः प्रविश्य ह्यभितापयेत् ॥
तथा त्वमपि जानीहि गर्भे जीवोपपादनम्।
यथा च दीपः शरणे दीप्यमानः प्रकाशते ॥
एवमेव शरीराणि प्रकाशयति चेतना।
यद्यच्च कुरुते कर्म शुभं वा यदि वाऽशुभम् ॥
पूर्वं देहकृतं सर्वमवश्यमुपभुज्यते।
ततस्तत् क्षीयते चैव पुनश्चान्यत् प्रतीयते ॥
यावत्तं मोक्षयोगस्थं धर्म्मं चैवावबुध्यते।
तत्र धर्मं प्रवक्ष्यामि सुखी भवति येन वै ॥
अवर्तमानो जातीषु तथा योऽन्यां सुसत्तम।

दानं व्रतं ब्रह्मचर्यं यथोक्तं व्रतधारणम् ॥
दमः प्रशान्तता चैव भूतानां चानुकम्पनम् ।
संयमश्चानृशंस्यञ्च परस्वादानवर्जनात् ॥
व्यलीकानामकरणं भूतानां चेतसा भुवि ।
मातापित्रोश्च शुश्रूषा देवतातिथिपूजनम् ॥
गुरुपूजा घृणाशौचं नित्यं चेन्द्रियसंयमः ।
प्रवर्त्तनं शुभानां च तत् सतां वृत्तमुच्यते ॥
अतो धर्मः प्रभवति यः प्रजा पाति शाश्वतीः ।
एवं सत्सु सदा पश्येत्तथाऽप्येषा ध्रुवा स्थितिः ॥
आचारो धर्ममाचष्टे यस्मिन् सन्तो व्यवस्थिताः ।
तेषु तत्कर्म निःक्षिप्तं यः स धर्मः सनातनः ॥
यस्तं समभिपद्येत न स दुर्गतिमाप्नुयात् ।
अतो नियम्यते लोकः प्रच्यवन् धर्मकर्मसु ॥
यस्तु योगी च मुक्तश्च स एतेभ्यो विशिष्यते ।
वर्तमानस्य धर्मेण शुभं यत्र यथा तथा ॥
संसारतारणं ह्यस्य कालेन महता भवेत् ।
एवं पूर्वकृतं कर्म नित्यं जन्तुः प्रवर्तते ॥
सर्वतः कारणं येन निकृतोऽयमिहागतः ।
शरीरग्रहणं वास्य केन पूर्वं प्रकल्पितम् ॥
इत्येवं संशयं लोके तच्च वक्ष्याम्यसंशयम् ।
शरीरमात्मनः कृत्वा सर्वलोकपितामहः ॥
त्रैलोक्यमसृजद् ब्रह्मा कृत्स्नं स्थावरजङ्गमम् ।
ततः प्रधानमसृजत् प्रकृतिं सशरीरिणाम् ॥
यया सर्वमिदं व्याप्तं यां लोके परमां विदुः ।

इदं तत्त्वरमित्युक्तं परं त्वमृतमक्षरम् ॥
रसानां मिथुनं सर्वमेकैकस्य पृथक् पृथक् ।
असृजत् सर्वभूतानि पूर्वं स्रष्टः प्रजापतिः ॥
स्थावराणि च भूतानि इत्येषा पौर्विकी श्रुतिः ।
तस्य कालपरीमाणमकरोत् स पितामहः ॥
भूतेषु प्रविवृत्तिं च पुनरावृत्तिमेव च ।
यथाऽत्र कश्चिन्मेधावी दृष्टात्मा पूर्वजन्मनि ॥
तत् प्रवक्ष्यामि यत् सर्वं यथावदुपपद्यते ।
सुखदुःखे सदा सम्यगनित्ये यः प्रपश्यति ॥
कायं वा मेध्यसंघातं विनाशं कर्मसंहिताम् ।
यच्च किंचित् सुखं तच्च सर्वं दुःखमिति स्मरन् ॥
संसारसागरं घोरं तरिष्यति सुदुस्तरम् ।
जातीमरणरोगैश्च समाविष्टः प्रधानवित् ॥
चेतनावांसु चैतन्यं सर्वभूतेषु पश्यति ।
निर्विद्यते ततः कृत्स्नं मार्गमाणाः परं पदम् ॥
तस्योपदेशं वक्ष्यामि याथातथ्येन सत्तम ।
प्रोच्यमानं मया विप्र निबोधेहमशेषतः ॥

ब्राह्मण उवाच ।

यः स्यादेकासने लीनस्तूष्णीं किंचिदचिन्तयन् ।
पूर्वं पूर्वं परित्यज्य स तीर्णो बन्धनाद्भवेत् ॥
सर्वमित्रः सर्वसहः शमे रक्तो जितेन्द्रियः ।
व्यपेतभयमन्युश्च आत्मवान् मुच्यते नरः ॥
आत्मवत् सर्वभूतेषु यश्चरेन्नियतः शुचिः ।
अमानी निरभिमानः सर्वतो मुक्त एव सः ॥

जीवितं मरणं चोभे सुखदुःखे तथैव च।
लाभालाभे प्रिये द्वेष्ये यः समः स च मुच्यते ॥
न कस्यचित् स्पृहते न विजानाति किंचन।
निर्द्वन्द्वो वीतरागात्मा सर्वथा मुक्त एव सः ॥
अनमित्रोऽथ निर्बन्धुरनपत्यश्च यः क्वचित्।
व्यक्तधर्मार्थकामांश्च निराकाङ्क्षी स उच्यते ॥
अकर्मवान् विकाङ्क्षश्च पश्येज्जगदशाश्वतम्।
अश्वत्थमनसं मूढं जन्ममृत्युजरायुतम् ॥
वैराग्ययुक्तः सततमायत्यामनवेक्षकम्।
आत्मबन्धविनिर्मोक्षमकरोदचिरादिव ॥
सुखस्वरं सुखस्पर्शमशब्दमपरिग्रहम्।
पुरुषं ह्यनभिज्ञेयं दृष्ट्वात्मानं विमुच्यते ॥
पञ्चभूतगुणैर्हीनममूर्तिमदहेतुकम्।
अगुणं गुणभोक्तारं यः पश्यति स पश्यति ॥
विहाय सर्वसंकल्पान् बुद्ध्या शारीरमानसान्।
शनैर्निर्वाणमाप्नोति निरन्धन इवाऽनलः ॥
विमुक्तः सर्वसंस्कारैस्ततो ब्रह्म सनातनम्।
परमाप्नोति संशान्तमचलं नित्यमक्षयम् ॥
अतः परं प्रवक्ष्यामि योगशास्त्रमनुत्तमम्।
युञ्जन्तः सिद्धिमात्मानं यथा पश्यन्ति योगिनः ॥
तस्योपदेशं वक्ष्यामि यथावत्तं निबोध मे।
यैर्द्वारैश्चारयेन्नित्यं पश्यन्नात्मानमात्मनि ॥
इन्द्रियाणि च संहृत्य मन आत्मनि धारयेत्।
पूर्वं तप्त्वा तपस्तीव्रं मोक्षयोगं समाचरेत् ॥

तपस्वी सततं युक्तो योगशास्त्रं समाचरेत् ।
मनीषी मनसा विप्रः पश्यन्नात्मानमात्मनि ॥
संयतः सततं युक्तमात्मवान् विजितेन्द्रियः ।
तथाऽयमात्मनात्मानं साधु युक्तः प्रपश्यति ॥
इषीकां च यथा मुञ्जात् कश्चिन्निष्कृष्य दर्शयेत् ।
योगी निष्कृष्य चात्मानं तथा पश्यति देहतः ॥
युञ्जन् शरीरं तस्यायमिषीकामात्मनिश्चिताम् ।
एतन्निदर्शनं प्रोक्तं योगविद्भिरनुत्तमम् ।
यदा हि युक्तमात्मानं सम्यक् पश्यति देहभृत् ।
न तस्येहेश्वरः कश्चित्त्रैलोक्यस्यापि यः प्रभुः ॥
अन्या अन्याश्च तनवो यथेष्टं प्रतिपद्यते ।
सम्यग् भुक्त्वा स आत्मानमात्मन्येव प्रतिष्ठते ॥
विनिवृत्य न शोचन्ति न हृष्यन्ति कदा चन ।
देवानामपि देवत्वं मुक्तः कारयते वशी ॥
ब्रह्म चाव्ययमाप्नोति हित्वा देहमशाश्वतम् ।
विनश्यत्स्वपि लोकेषु न भयं तस्य जायते ॥
क्लिश्यमानेषु भूतेषु न संक्लिश्यति केनचित् ।
दुःखशोकमयैर्घोरैः संगस्नेहसमुद्भवैः ॥
न चाल्यते च युक्तात्मा निस्पृहः शान्तमानसः ।
नैनं शस्त्राणि छिन्दन्ति न मृत्युश्चास्य विद्यते ॥
नातः सुखतरं किञ्चिल्लोके क्वचन दृश्यते ।
सम्यक् त्यक्त्वा स आत्मानमात्मन्येव प्रशाम्यति ॥
तदेव चैनं स्पृहते साक्षादपि शतक्रतुः ।
योगमेकान्तशीलस्तु यथा विन्दति तच्छृणु ॥

दृष्टपूर्वादि सञ्चिन्त्य यस्यां स निवसेत् पुरि ।
पुरस्याभ्यन्तरे तस्य मनश्चायं न बाह्यत: ॥
पुरस्याभ्यन्तरे तिष्ठन् तस्मिन्नावसथे वसेत् ।
तस्मिन्नावसथे चायं स बाह्याभ्यन्तरे मन: ॥
अचिन्त्यावसथं चैनं यस्मिन् काले ऽवतिष्ठते ।
तस्मिन् काले मनश्चायं न कश्चन न बाह्यत: ॥
सन्नियम्येन्द्रियग्रामं निर्घोषे निर्जने शुभे ।
कायमभ्यन्तरं कृत्स्नमेकाग्र: परिचिन्तयेत् ॥
दन्तांस्तालु च जिह्वां च गलं ग्रीवां तथैव च ।
हृदयं चिन्तयेच्चापि तथा हृदयबन्धनम् ॥
इत्युक्त: स मया शिष्यो मेधावी मधुसूदन ।
पप्रच्छ पुनरेवेमं मोक्षधर्मं सुदुर्वचम् ॥
भुक्तं भुक्तमिदं कोष्ठे कथमन्नं विपच्यते ।
कथं न सत्वं व्रजति शोणितत्वं कथं पुन: ॥
तथा मांसञ्च मेदश्च स्नायून्यस्थीनि पोषति ।
कथमेतानि सर्वाणि शरीराणि शरीरिणाम् ॥
वर्द्धते वर्धमानस्य वर्द्धते च कथं बलम् ।
निरोजसां निर्गमनं मलानां च पृथक् पृथक् ॥
कुतश्चायं प्रश्वसिति उच्छ्वसित्यपि वा पुन: ।
कथं देशमधिष्ठाय तिष्ठत्यात्मानमात्मनि ॥
जीव: कथं प्रवहति चेष्टमान: कलेवरम् ।
किं वर्ण: कीदृशं चैव निवेशयति वै पुन: ॥
याथातथ्येन भगवन् वक्तुमर्हसि मेऽनघ ।
इति संपरिपृष्टोऽहं तेन विप्रेण माधव ॥

प्रत्यब्रवं महाबाहो यथाश्रुतमरिन्दम ।
यथा स्वकोष्ठे प्रक्षिप्य कोष्ठं भाण्डमना भवेत् ॥
तथा स्वकाये प्रक्षिप्य मनोद्वारैरनिश्चलैः ।
आत्मानं तत्र मार्गेत प्रमादं परिवर्जयेत् ॥
एवं स तमुद्युक्तः प्रीतात्मा न चिरादिव ।
आसादयति तद् ब्रह्म यद्दृष्ट्वा स्यात् प्रधानवित् ॥
न त्वसौ चक्षुषा ग्राह्यो न च सर्वैरपीन्द्रियैः ।
मनसैव प्रदीपेन महानात्मा सुदृश्यते ॥
सर्वतः पाणिपादन्तत् सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥
जीवो निष्क्रान्तमात्मानं शरीरात् संप्रपश्यति ।
स तमुत्सृज्य देहं स्वं धारयन् ब्रह्म केवलम् ॥
आत्मानमालोकयति मनसा प्रहसन्निव ।
इदं सर्वं रहस्यन्ते मया प्रोक्तं द्विजोत्तम ॥
आपृच्छे साधयिष्यामि गच्छ विप्र यथासुखम् ।
इत्युक्तः स तदा कृष्ण मया शिष्यो महातपाः ॥
आगच्छच्च यथाकामं ब्राह्मणः शंसितव्रतः ।

वासुदेव उवाच ।

इत्युक्त्वा स तदा वाक्यं मां पार्थ द्विजपुङ्गवः ।
मोक्षं धर्माश्रितं सम्यक् तत्रैवान्तरधीयत ॥
कच्चिदेतत्त्वया पार्थ श्रुतमेकाग्रचेतसा ।
तदापि हि रथस्थस्त्वं श्रुतवानेतदेव हि ॥
नैतत् पार्थ सुविज्ञेयं व्यामिश्रेणेति मे मतिः ।
नरेणाकृतसंज्ञेन विशुद्धेनान्तरात्मना ॥

स्वरहस्यमिदं प्रोक्तं देवानां भरतर्षभ ।
कश्चिन्नैवं श्रुतं पार्थ मनुष्येणेह कर्हिचित् ॥
न ह्येतच्छ्रोतुमर्होऽन्यो मनुष्यस्त्वामृतेऽनघ ।
नैतदन्यैः सुविज्ञेयं व्यामिश्रेणान्तरात्मना ॥
क्रियावद्भिर्हि कौन्तेय देवलोकसमावृतः ।
न चैतदिष्टं देवानां मर्त्यलोकनिवर्त्तनम् ॥
परहिंसा गतिः पार्थ यत्तद् ब्रह्म सनातनम् ।
तत्रामृतत्वं प्राप्नोति त्यक्त्वा दुःखं सदा सुखी ॥
इमं धर्मं समास्थाय येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥
किं पुनर्ब्राह्मणाः पार्थ क्षत्रिया वा बहुश्रुताः ।
स्वधर्मरतयो नित्यं ब्रह्मलोकपरायणाः ॥
हेतुमच्चैतदुद्दिष्ट उपायश्चास्य साधने ।
सिद्धेः फलञ्च मोक्षश्च दुःखस्य च विनिर्णयः ॥
नातः परं सुखं त्वन्यत्किंचिद् स्याद्भरतर्षभ ।
बुद्धिमान् श्रद्दधानश्च पराक्रान्तश्च पाण्डव ॥
परित्यजति यो मर्त्यो लोकतन्त्रमसारवत् ।
एतैरुपायैः स क्षिप्रं परां गतिमवाप्नुयात् ॥
एतावदेव वक्तव्यं नातो भूयोस्ति किंचन ।
महाभारते अनुगीताख्यानम् ॥

ब्राह्मण उवाच ।

भूयो वैरिपरो लोके तव चैव गुणाः कृताः ।
हर्षः स्तम्भोऽभिमानश्च त्रयस्ते सात्त्विका गुणाः ॥
एतान्विहन्त्य धृतिमान् माणसत्त्वैरतन्द्रितः ।

जित्वा परानुत्सहते प्रशान्तात्मा जितेन्द्रियः ॥
अत्र गाथाः कीर्त्तयन्ति पुरा कल्पविदो जनाः ।
अम्बरीषेण या गीता राज्ञा राज्यं प्रशासता ॥
समुत्तीर्णेषु दुष्टेषु वध्यमानेषु सर्वशः ।
जग्राह तपसा राज्यमम्बरीष इति श्रुतिः ।
स निगृह्य महादोषान् साधून् समभिपूज्य च ॥
जगाम महतीं सिद्धिं गाथां चेमां जगाद ह ।
भूयिष्ठं मे जिता दोषा निहताः सर्वशत्रवः ॥
एको दोषो ऽवशिष्टस्तु मन्ये च न जितो मया ।
येन प्रयुक्तो जन्तुरयं तृष्णामेवाधिगच्छति ॥
तृष्णार्त्त इव निम्नानि परिधावति नित्यदा ।
अकार्यमपि येनेह प्रयुक्तः सेवते नरः ॥
तल्लोभमसिभिस्तीक्ष्णैर्निकृन्तत निकृन्तत ।
लोभाद्विजायते तृष्णा ततश्चित्तं प्रसज्यते ॥
स लिप्समानो लभते भूयिष्ठं राजसान् गुणान् ।
सत्वैर्गुणैः संज्ञितदेहबन्धनः स जायते कर्मणि चेष्टते तथा ॥
तेजःक्षये भिन्नविकीर्णदेहः पुनस्त्वं त्युं गच्छति जन्ममिश्रे ।
तस्मादेनं सम्यगवेक्ष्य मोहं निगृह्य लोभं धृतिमति राज्यमिच्छेत् ॥
एतद्राज्यं नान्यदस्तीति विद्याद्यस्तं न राजा विदितो मयेकः ।
इति राज्ञाऽम्बरीषेण गीता गाथा महात्मना ।
अधिराज्यं पुरस्कृत्य लोभमेकं निकृन्तत ॥

ब्राह्मण उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
ब्राह्मणस्य च संवादं जनकस्य च भामिनि ॥

ब्राह्मणं जनको राजा क्लान्तं कस्मिंश्चिदागमे ।
विषये मे न वस्तव्यमिति शिष्टार्थमब्रवीत् ॥
इत्युक्तः प्रत्युवाचाथ ब्राह्मणो राजसत्तमम् ।
आचक्ष्व विषयान् राजन् यान् यांस्तव वशे स्थितान् ॥
अन्यस्य विषये राजन् वस्तुमिच्छाम्यहं प्रभो ॥
वचस्ते कर्त्तुमिच्छामि यथाशास्त्रं महीपते ।
इत्युक्तस्तु ततो राजा ब्राह्मणेन यशस्विना ॥
मुहुरुष्णं च निःश्वस्य न स तं प्रत्यभाषत ।
तमासीनं ध्यायमानं राजानममितौजसम् ॥
कश्मलं सहसागच्छद्भानुमन्तमिव ग्रहः ।
समाश्वास्य ततो राजा विगते कश्मले तदा ॥
ततो मुहूर्तादिव तं ब्राह्मणं वाक्यमब्रवीत् ।

जनक उवाच ।

पितृपैतामहे राज्ये वश्ये जनपदे सति ।
विषयं नाधिगच्छामि विचिन्वन् पृथिवीमिमाम् ॥
नाध्यगच्छं यदा पृथ्वीं मिथिला ह्यान्विता मया ।
नाध्यगच्छं तथा तस्यां सप्रजा अर्जिता मया ॥
नाध्यगच्छं यदा तासु ततो मे कश्मलोऽभवत् ।
ततो मे कश्मलस्यान्ते मतिः पुनरुपस्थिता ॥
तथा न विषयं मन्ये सर्वो वा विषयो मम ।
इष्यतां तावदुत्साहं भुज्यतां तावदिष्यते ॥

ब्राह्मण उवाच ।

पितृपैतामहे राज्ये वश्ये जनपदे सति ।
ब्रूहि कां मतिमास्थाय ममत्वं वर्जितं त्वया ॥

कां वै बुद्धिं विनिश्चित्य सर्वो वै विषयस्तव।

जनक उवाच।

अन्तवन्त इहारम्भा विदिताः सर्वकर्मसु।
नाध्यगच्छमहं बुद्ध्या ममेदमिति यद्भवेत्॥
एवं बुद्धिं विनिश्चित्य ममत्वं वर्जितं मया।
शृणु बुद्धिं तु यां ज्ञात्वा सर्वत्र विषयो मम॥
नाहमात्मार्थमिच्छामि रसानास्ये विवर्त्ततः।
आपो मे निर्जितास्तस्माद्वशे तिष्ठन्ति नित्यशः॥
नाहमात्मार्थमिच्छामि रूपं ज्योतिश्च चक्षुषी।
तस्मान्मे निर्जितं ज्योतिर्वशे तिष्ठति नित्यशः॥
नाहमात्मार्थमिच्छामि स्पर्शांस्त्वचि गतानपि।
वायुर्मे निर्जितस्तस्माद्वशे तिष्ठति नित्यशः॥
नाहमात्मार्थमिच्छामि मनोज्ञं च मनोन्तरे।
मनोऽपि निर्जितं तस्माद्वशे तिष्ठति नित्यशः॥
देवेभ्यश्च पितृभ्यश्च भूतेभ्योऽतिथिभिः सह।
इत्यर्थं सर्व एवेमे समारम्भा भवन्ति वै॥
ततः प्रहस्य जनकं ब्राह्मणः पुनरब्रवीत्।
त्वज्जिज्ञासार्थमद्येह विद्धि मां त्वमागतम्॥
त्वमस्य ब्रह्मभावस्य बुद्धिं तस्यानिवर्त्तिनः।
स त्वं मेने निरुद्धस्य चक्रस्यैकः प्रवर्तकः॥
नाहमस्मि यथा मां त्वमीक्षसे चक्षुषाऽनघ।
मया व्याप्तमिदं सर्वं यत्किञ्चिज्जगतीगतम्॥
ये के चिज्जन्तवो लोके जङ्गमाः स्थावराश्च ह।
तेषामन्तर्गतं विद्धि दारूणामिव पावकम्॥

राज्यं पृथिव्यां सर्वस्यां अथवा यत्र विष्टपम् ।
तत्तद्बुद्धिरियं वेत्ति बुद्धिरेव धनं मतम् ॥
एकः पन्था ब्राह्मणानां येन गच्छन्ति तद्विदः ।
गृहेषु वनवासेषु गुरुवासेषु भिक्षुषु ॥
लिङ्गैर्बहुभिरव्यग्रैरेका बुद्धिरुपास्यते ।
नानालिङ्गाश्रमस्थानं येषां बुद्धिः शमात्मिका ॥
ते भावमेकमायान्ति सरितः सागरं यथा ।
बुद्ध्याऽयं गम्यते मार्गः शरीरेणावगम्यते ॥
आद्यं भवन्ति कर्माणि शरीरं कर्मबन्धनम् ।
तस्मान्मे सुभगे नास्ति परलोककृतं भयम् ॥
तद्भावभावनिरता ममैवात्मानमेष्यसि ।

ब्राह्मण उवाच ।

नेदमल्पात्मना शक्यं वेदितुं नाकृतात्मना ।
बहु चाल्पं च संक्षिप्तं विस्तृतं च मनो मम ॥
उपायं तु मम ब्रूहि येनैषा लभ्यते गतिः ।

ब्राह्मण उवाच ।

अरणीं ब्राह्मणं विद्धि गुरुरस्योत्तराऽरणिः ।
तपः श्रुते हि मथिते ज्ञानाग्निर्जायते ततः ॥

ब्राह्मण उवाच ।

यदिदं ब्रह्मणो लिङ्गं क्षेत्रज्ञ इति संज्ञितम् ।
ग्रहीतुं येन तच्छक्यं लक्षणं तस्य तत् क्व नु ॥

ब्राह्मण उवाच ।

अलिङ्गो निर्गुणश्चैव कारणं नास्य विद्यते ।
उपायं तु प्रवक्ष्यामि येन गृह्येत वा न वा ॥

सम्यगप्युपविष्टश्च प्रवरैर्न स लक्ष्यते ।
कर्मभुक् बुद्धिपूर्वत्वात् ज्ञानलिङ्गैरधिष्ठितः ॥
इदं कार्यमिदं नेति न मोक्षेषूपदिश्यते ।
यावन्त इह शक्येरन् तावतो वा प्रकल्पयेत् ॥
व्यक्तानव्यक्तरूपांश्च शतशो ऽथ सहस्रशः ।
सत्वान्नानात्वयुक्तांश्च धर्मान् प्रत्यक्षहेतुकान् ॥
यतः परं न विद्येत तदभ्यासं भविष्यति ।

श्रीभगवानुवाच ।

ततस्तु तस्या ब्राह्मण्या मतिः क्षेत्रज्ञ संशये ।
क्षेत्रज्ञादेव परतः क्षेत्रज्ञोऽन्यः प्रवर्त्तते ॥

अर्जुन उवाच ।

क्व नु सा ब्राह्मणी कृष्ण क्वासौ ब्राह्मणर्षभः ।
याभ्यां सिद्धिरियं प्राप्ता तावुभौ वद मेऽच्युत ॥

श्रीभगवानुवाच ।

मनो मे ब्राह्मणं विद्धि बुद्धिमें ब्राह्मणीं विदुः ।
क्षेत्रज्ञ इति यश्चोक्तः सोऽहमेव धनञ्जय ॥

इति श्रीभक्तिसागरे ब्राह्मणगीतानिरूपणं नाम चतुर्थस्तरङ्गः ।

अर्जुन उवाच ।

ब्रह्म यत्परमं प्रोक्तं तन्मे व्याख्यातुमर्हसि ।
भवतो हि प्रसादेन सुसूक्ष्मे रमते मतिः ॥

श्रीभगवानुवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
संवादं मोक्षसंयुक्तं शिष्यस्य गुरुणा सह ॥
कश्चिद् ब्राह्मणमासीनमाचार्यं शंसितव्रतम् ।

शिष्यः पप्रच्छ मेधावी श्रेयः किञ्चित् परन्तप ॥
भगवन्तं प्रपन्नोऽहं निःश्रेयसपरायणः।
याचे त्वां शिरसा विप्र यद् ब्रूयां तद्विचक्ष्व ह ॥
तमेवं वादिनं प्राज्ञं शिष्यं गुरुरुवाच ह।
कथयस्व प्रवक्ष्यामि यत्र ते संशयो द्विज ॥
इत्युक्तस्तु कुरुश्रेष्ठ गुरुणा गुरुवत्सलः।
प्राञ्जलिः परिपप्रच्छ तच्छृणुष्व महामते ॥
कुतश्चाहं कुतश्च त्वं तत्सत्यं ब्रूहि यत् परम्।
कुतो जातानि भूतानि चराणि स्थावराणि च ॥
केन जीवन्ति जातानि तेषामायुः किमात्मकम्।
किं सत्यं किं तपो विप्र के गुणाः सद्भिरीरिताः ॥
के पन्थानः शिवाः सन्ति सुकृतं किं च दुष्कृतम्।
एतन्मे भगवन् प्रश्नान् याथातथ्येन सत्तम ॥
वक्तुमर्हसि विप्रर्षे यथावदिह तत्त्वतः।
तस्मै संप्रतिपन्नाय यथावत् परिपृच्छते ॥
शिष्याय गुणयुक्ताय शान्ताय प्रियवादिने।
छायाभूताय दान्ताय यतये ब्रह्मचारिणे ॥
तत्प्रश्नात्प्रब्रवीत् पार्थ मेधावी सुदृढव्रतः।
गुरुः कुरुकुलश्रेष्ठ सम्यक् सर्वानरिन्दम ॥

गुरुरुवाच।

ब्रह्मप्रोक्तमिमं धर्ममृषिप्रवरसेवितम्।
वेदविद्यासमावाप्यं तत्त्वभूतार्थसाधनम् ॥
भूतभव्यभविष्यादिधर्मकामार्थनिश्चयम्।
सिद्धसङ्घपरिज्ञातं पुरा कल्पसनातनम् ॥

प्रवक्ष्येऽहं यथा प्राज्ञ पदमुत्तममद्य ते ।
बुद्ध्वा यदिह संसिद्धा भवन्तीह मनीषिणः ॥
उपागम्यर्षयः पूर्वं जिज्ञासन्तः परस्परम् ।
बृहस्पतिर्भरद्वाजो गौतमो भार्गवस्तथा ॥
वशिष्ठः काश्यपश्चैव विश्वामित्रोऽत्रिरेव च ।
मार्गान् सर्वान् परिक्रम्य परिक्रान्ताः स्वकर्मभिः ॥
ऋषिमङ्गिरसं वृद्धं पुरस्कृत्य तु ते द्विजाः ।
ददृशुर्ब्रह्मभवने ब्रह्माणं वीतकल्मषाः ॥
तं प्रणम्य महात्मानं सुखासीनं महर्षयः
पप्रच्छुर्विनयोपेता निःश्रेयसमिदं परम् ॥
कथं कर्म क्रियात् साधु कथं मुच्येत किल्विषात् ।
के नो मार्गाः शिवाश्च स्युः किं सत्यं किं च दुष्कृतम् ॥
केनोभौ कर्मपन्थानौ महत्त्वं केन विन्दति ।
प्रलयं चापवर्गञ्च भूतानां प्रभवाव्ययौ ॥
इत्युक्तः स मुनिश्रेष्ठैर्यदाह प्रपितामहः ।
ततोऽहं सम्प्रवक्ष्यामि शृणु शिष्य यथागमम् ॥

ब्रह्मोवाच ।

सत्याद्भूतानि जातानि चराणि स्थावराणि च ।
तपसा तानि जीवन्ति इति तद्वित्त सुव्रताः ॥
स्वां योनिं पुनरायान्ति वर्तन्ते स्वेन कर्मणा ।
सत्यं च गुणसंयुक्तं नियुतं यं च लक्षणम् ॥
ब्रह्म सत्यं तपः सत्यं सत्यं वै च प्रजापतिः ।
सत्याद्भूतानि जातानि भूतं सत्यमयं महत् ॥
तस्मात् सत्याश्रया हि श्रेयो नित्यं योगपरायणः ।

अतीतक्रोधसन्तापा नियता धर्मसेतवः ॥
अन्योन्यनियतान् देषात् धर्मसेतुनिवर्त्तकान्।
तानहं सम्प्रवक्ष्यामि शाश्वतान् लोकभावनान् ॥
चातुर्वेद्यं तथा वर्णान् चतुरश्चाश्रमान् पृथक्।
धर्ममेकं चतुष्पादं नित्यमाहुर्मनीषिणः ॥
पन्थानं वः प्रवक्ष्यामि शिवं क्षेमकरं द्विजाः।
नियतं ब्रह्मभावाय यातं पूर्वमहर्षिभिः ॥
गदतस्तु ममाप्येह पन्थानं दुर्विदं परम्।
निबोधत महाभाग निखिलेन परं पदम् ॥
ब्रह्मचारिकमेवाहुराश्रमं प्रथमं पदम्।
द्वितीयं चैव गार्हस्थ्यं वानप्रस्थमतः परम् ॥
ततः परन्तु विज्ञेयमध्यात्मं परमं पदम्।
ज्योतिराकाशमादित्यो वायुरिन्द्रः प्रजापतिः॥
नोपैति यावदध्यात्मं तावदेनं न पश्यति।
तस्योपायं प्रवक्ष्यामि पुरस्तात्तन्निबोधत ॥
फलमूलानि विभुजां मुनीनां वसतां वने।
वानप्रस्थं द्विजातीनां त्रयाणामुपदिश्यते ॥
सर्वेषामेव वर्णानां गार्हस्थ्यं वै विधीयते।
नैष्ठिकोऽपि यतिर्वापि विरक्तो ब्रह्मदर्शने ॥
श्रद्धालक्षणमित्येवं धर्मवीराः प्रचक्षते।
इत्येते देवयानां वः पन्थानः परिकीर्तिताः ॥
सद्भिः प्रवर्त्तिता धीरै ऋषिभिः धर्मसेतवः।
एतेषां पृथगध्यास्ते ये धर्मं शंसितव्रताः ॥
कालात् पश्यन्ति भूतानां संतां हि प्रभवाव्ययौ

अतस्तत्त्वानि वक्ष्यामि याथातथ्येन हेतुना ॥
विषयस्थानि सर्वाणि वर्त्तमानानि भागशः ।
महानात्मा तथा व्यक्तमहंकारस्तथैव च ॥
इन्द्रियाणि दशैकञ्च महाभूतानि पञ्च च ।
विशेषाः पञ्च भूतानामित्येषा वैदिकी श्रुतिः ॥
चतुर्विंशतिरेषा वै तत्त्वानां संप्रकीर्तिता ।
तत्त्वानामथ यो वेद सर्वेषां प्रभवाव्ययौ ॥
स धीरः सर्वभूतेषु न मोहमधिगच्छति ।
तत्त्वानि यो वेदयते यथा तथा गुणांश्च सर्वानखिलांश्च देवताः ।
विधूय पाप्मा ह्नि विमुच्य बन्धनं स सर्वलोकान् सुमनाः समश्नुते ॥

ब्रह्मोवाच ।

तदव्यक्तमनुद्दिष्टं सर्वव्यापि स्थिरं ध्रुवम् ।
नवद्वारं पुरं विद्यात्त्रिगुणं पञ्चधातुकम् ॥
एकादशपरिक्षेपं मनो व्याकरणात्मकम् ।
बुद्धिस्वामिकमित्येतत् परमेकादशं भवेत् ॥
वणिक्स्रोतांसि यान्त्यस्मिन्नाप्यायन्ते पुनः पुनः ।
अन्योन्यमिथुनाः सर्वे तथान्योन्योपजीविनः ।
अन्योन्यं चाश्रयाश्चैव ततोऽन्योन्यानुवर्त्तिनः ।
अन्योन्यव्यतिषिक्ताश्च त्रिगुणाः पञ्च धातवः ॥
तमसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः ।
रजसश्चापि सत्त्वं स्यात् सत्त्वस्य मिथुन तमः ॥
नियम्यते रजो यत्र सत्त्वं तत्र प्रवर्त्तते ।
नियम्यते यदा सत्त्वं तमस्तत्र प्रवर्त्तते ॥
नैशात्मकं तमो विद्यात्त्रिगुणं मोहसंज्ञितम् ।

अधर्मलक्षणं चैव नियतं पापकर्मसु ॥
प्रवृत्त्यात्मकमेवाभूद्रजः पर्यायकारणम्।
प्रवृत्तं सर्वभूतेषु पश्यनुत्पत्तिलक्षणम् ॥
एतेषां गुणतत्त्वं हि वक्ष्यते हेत्वहेतुभिः।
समासव्याससयुक्तानि तत्त्वतस्तानि वित्त मे ॥
संमोहो ज्ञानतस्त्यागः कर्मणामविनिर्णयः।
स्वप्नः स्तम्भो भयं लोभः शोकः सुकृतदूषणम् ॥
अस्मृतिश्च विशोकश्च नास्तिक्यं भिन्नवृत्तता।
निर्विशेषत्वमन्धत्वं जघन्यगुणवृत्तिता ॥
अकृते कृतमानित्वमज्ञाने ज्ञानमानिता।
अमैत्रो विकृतो भाव अश्रद्धा मूढभावना ॥
अनार्जवमसंज्ञत्वं कर्म पापमचेतना।
गुरुत्वमनभावत्वमसितत्वमवाग्गतिः ॥
सर्वे एते गुणा विप्रास्तामसाः संप्रकीर्तिताः।
ये चान्ये नियता भावा लोकेऽस्मिन् मूढ संज्ञिताः ॥
तत्र तत्र नियम्यन्ते सर्वे ते तामसा गुणाः।
परिवादकथा नित्यं वेदब्राह्मणनिन्दिता ॥
अत्यागश्चाभिमानश्च मोहो मन्युस्तथाक्षमा।
मत्सरश्चैव भूतेषु तामसं वृत्तमिष्यते ॥
वृथारम्भाश्च ये केचिद् वृथा दानानि यानि च।
वृथा भक्षणमित्येतत्तामसं वृत्तमिष्यते ॥
अतिवादास्तितिक्षा च मात्सर्यमतिमानिता।
अश्रद्दधानता चैव तामसं वृत्तमिष्यते ॥
एवंविधास्तु ये केचिल्लोकेऽस्मिन् पापकर्मणः।

मनुष्या भिन्नमर्यादाः सर्वे ते तामसा जनाः ॥
तेषां योनिं तु वक्ष्यामि नियतं पापकर्मणाम् ।
अवाङ्निरयभावा ये तिर्यङ्निरयगामिनः ॥
स्थावराणि च भूतानि पशवो वाहनानि च ।
क्रव्यादा दन्दशूकाश्च कृमिकीटविहङ्गमाः ॥
अण्डजा जन्तवो ये तु सर्वे चापि चतुष्पदाः ।
उन्मत्ता बधिरा मूका ये चान्ये पापरोगिणः ॥
मग्नास्तमसि दुर्वृत्ताः स्वकर्मकृतलक्षणाः ।
अवाक्स्रोतस इत्येते मग्नास्तमसि तामसाः ॥
तेषामुत्कर्षमुद्रेकं वक्ष्याम्यहमतः परम् ।
यथा ते सुकृतान् लोकान् लभन्ते पुण्यकर्मणाम् ॥
अन्यथा प्रतिपन्नास्तु विवृद्धा ये स्वकर्मसु ।
स्वकर्मनिरतानां च ब्राह्मणानां शुभैषिणाम् ॥
संस्कारेणोर्ध्वमायान्ति यतमानाः सलोकताम् ।
स्वर्गं गच्छन्ति देवानां इत्येषा वैदिकी श्रुतिः ॥
अन्यथा प्रतिपन्नास्तु विवृद्धाः स्वेषु कर्मसु ।
पुनरावृत्तिधर्माणस्ते भवन्तीह मानुषाः ॥
पापयोनिसमापन्नाश्चाण्डाला मूकचूचुकाः ।
वर्णान् पर्यायशश्चापि प्राप्नुवन्त्युत्तरोत्तरम् ॥
शूद्रयोनिमतिक्रम्य ये चान्ये तामसा गुणाः ।
स्रोतोमध्यसमागम्य वर्त्तन्ते तामसा गुणाः ॥
अभिषङ्गस्तु कामेन महामोह इति स्मृतः ।
ऋषयो मुनयो देवा मुह्यन्त्यत्र सुखेप्सवः ॥
तमो मोहो महामोहस्तामिस्रो ह्यन्धसंज्ञितः ।

मरणं त्वन्धतामिस्रस्तामिस्रः क्रोध उच्यते ॥
भावतो गुणतश्चैव योनितश्चैव तत्वतः।
सर्वमेतत्तमो विप्राः कीर्त्तयन्तो यथाविधि ॥
को न्वेतद्बुध्यते साधु को न्वेतत् साधु पश्यति।
अतत्वे तत्वदर्शी यस्तमसस्तत्वलक्षणम् ॥
ततो गुणा वो बहवः प्रकीर्तिता यथावदुक्तञ्च तमः परावरम्।
नरो हि यो वेद गुणानिमान् सदा स तामसैः सर्वगुणैर्विमुच्यते ॥

ब्रह्मोवाच।

रजो ऽहं संप्रवक्ष्यामि याथातथ्येन संमताः।
निबोधत महाभाग गुणवृत्तं च सर्वशः ॥
सन्तापो दर्पमायासः सुखदुःखे हिमातपौ।
ऐश्वर्य्यं निग्रहः सिद्धिर्हेतुवादो रतिः क्षुधा ॥
बलं शौर्यं मदो रोषो व्यायामकलहावपि।
ईर्ष्येप्सा पैशुनं युद्धं ममत्वं परिपालनम् ॥
वधबन्धपरिक्लेशाः क्रयो विक्रय एव च।
निःकृतिः छिन्धि छिन्धीति परमर्मावकर्त्तनम् ॥
उग्रताडनमाक्रोशपरिवित्तानुरागता।
लोकचिन्ता विचिन्ता च मत्सरः परिभाषणम् ॥
मृषाचोद्यमृषावादो विकल्पपरिभाषणम्।
निन्दा स्तुतिः प्रशंसा च प्रतापः परिदर्पणम् ॥
परिचर्या च शुश्रूषा सेव तृष्णा व्यपाश्रयः।
मूढोऽनयः प्रवादश्च परितापः प्रतिग्रहः ॥
संस्कारा ये च लोकेऽस्मिन् प्रवर्त्तन्ते पृथक् पृथक्।
नृषु नारीषु भूतेषु द्रव्येषु शरणेषु च ॥

सन्तापः प्रत्ययश्चैव व्रतानि नियमाश्च ये ।
प्रदानमाशीर्युक्तं च सततं मे भवन्त्विति ॥
स्वधाकारो नमस्कारः स्वाहाकारो वषट्क्रिया ॥
याजनाध्ययने चोभे तथैवाहुः प्रतिग्रहम् ।
प्रतिग्रहमिदं मे स्यात् स्नेहो गुणसमुद्भवः ॥
अभिद्रोहस्तथा मानो निकृतिर्मानमेव च ।
स्तेयं हिंसा परीवादः परितापः प्रजागरः ॥
दम्भो दर्पोऽभिमानश्च भक्तिः प्रीतिः प्रमोदनम् ।
द्यूतं च जनवादश्च सम्बन्धाः स्त्रीकृताश्च ये ॥
नृत्तवादित्रगीतानि प्रसङ्गा ये च केचन ।
सर्वे एते गुणा विप्र राजसाः संप्रकीर्त्तिताः ॥
भूतभव्यभविष्याणां भूतानां भुवि भावनात् ।
त्रिवर्गनिरता नित्यं धर्मोऽर्थः काम एव च ॥
कामवृत्ताः प्रमोदन्ते सर्वकामसमृद्धिभिः ।
अर्वाक्स्रोतस इत्येव ते जना रजसा वृताः ॥
अस्मिंल्लोके प्रमोदन्ते जायमानाः पुनः पुनः ।
प्रेत्यभाविकमिच्छन्ति ऐहलौकिकमेव च ॥
नरो हि यो वेद सदा गुणानिमान् ।
स राजसैः सर्वगुणैर्विमुच्यते ॥

ब्रह्मोवाच ।

अतः परं प्रवक्ष्यामि तृतीयं गुणमुत्तमम् ।
सर्वभूतहितं लोके सतां धर्ममनिन्दितम् ॥
आनन्दः प्रीतिरुद्रेकः प्राकाश्यं सुखमेव च ।
अकार्पण्यमसंरम्भः सन्तोषः श्रद्दधानता ॥

१३॥

क्षमा धृतिरहिंसा च समता सत्यमार्जवम्।
अक्रोधश्चानसूया च शौर्यं राज्यं पराक्रमः॥
मुधाज्ञानं मुधावृत्तं मुधासेवा मुधाऽश्रयः।
एवं यो नित्यमुक्तः स्यात् सोऽसुत्रानन्त्यमश्नुते॥
निर्ममो निरहङ्कारो निराशीः सर्वतः समः।
अकामहत इत्येषः सतां धर्मः सनातनः॥
विश्रम्भो ह्रीस्तितिक्षा च त्यागः शौचमतन्द्रिता।
आनृशंस्यमसंमोहो दया दानिष्वपैशुनम्॥
हर्षस्तुष्टिर्विस्मयश्च विनयः साधुवृत्तता।
शान्तिः कर्मविशुद्धिश्च शुभा बुद्धिर्विमोचनम्॥
उपेक्षा ब्रह्मचर्यं च परित्यागश्च सर्वशः।
निर्ममत्वमनाशीस्त्वमपरिक्रीतकर्मता॥
मुधासनं मुधा यज्ञो मुधाऽधीतं मुधाव्रतम्।
मुधा प्रतिग्रहश्चैव मुधा धर्मो मुधा तपः॥
एवंविधास्तु ये केचिल्लोकेऽस्मिन् सत्वसंश्रयाः।
ब्राह्मणा ब्रह्मयोनिस्थास्ते धीराः साधुदर्शिनः॥
हित्वा पापानि स सर्वाणि निःशोको ह्यजरामरः।
दिव्यं प्राप्यन्तु ये धीराः कुर्वते वै ततस्ततः॥
ईशित्वं च वशित्वं च प्राकाम्यं मानसश्च ते।
विकुर्वन्तो महात्मानो देवास्त्रिदिवगा इव॥
ऊर्ध्वस्रोतस इत्येते देवा वैकारिकाः स्मृताः।
विकुर्वते प्रकृत्या वै दिवं प्राप्तास्ततस्ततः॥
यद्यदिच्छन्ति तत्सर्वं भजन्ते विभजन्ति च।
इत्येतत् सात्विकं वृत्तं कथितं वो द्विजर्षभाः॥

एतद्धिताय विधिवल्लभ्यते यद्यदिच्छति ।
प्रकीर्त्तिताः सत्त्वगुणा विशेषतो यथावदुक्तं गुणवृत्तमेव तत् ॥
नरस्तु यो वेद सदागुणानिमान् गुणान् स भुङ्क्ते न गुणैस्तु भुज्यते।

ब्रह्मोवाच ।

नेह शक्या मया वक्तुं पृथक्त्वेनेह सर्वशः ।
अविच्छिन्ना निवर्तन्ते रजः सत्वं तमः सदा ॥
अन्योन्यमनुषज्यन्ते त्वन्योन्यस्यानुजीविनः ।
अन्योन्यस्याश्रयाः सर्वे तथान्योन्यानुवर्त्तिनः ॥
न हि सत्वात् परो भावः कश्चिदन्यो विधीयते ।
ऊर्ध्वं गच्छन्ति सत्वस्था मध्ये तिष्ठन्ति राजसाः ॥
जघन्यगुणयुक्तास्तु यान्त्यधस्तामसा जनाः ।
तमः शूद्रे रजः क्षत्रे ब्राह्मणे सत्वमुत्तमम् ॥
इत्येते त्रिषु वर्णेषु प्रवर्त्तन्ते गुणास्त्रयः ।
दूरादपि दृश्यन्ते संहिताः संघचारिणः ॥
तमः सत्त्वं रजश्चैव पृथक्त्वं नानुशुश्रुमः ।
त्रिधा दानानि दीयन्ते त्रिधा यज्ञः प्रवर्त्तते ॥
त्रिधा लोकास्त्रिधा वेदास्त्रिधा वेद्यास्त्रिधा गतिः ।
भूतं भव्यं भविष्यच्च धर्मार्थः काम एव च ॥
प्राणापानावुदानश्चाप्येत एव गुणास्त्रयः ।
यत्किंचिदिह लोकेऽस्मिन् सर्वमेष्वेव तु त्रिषु ॥
त्रयो गुणाः प्रवर्तन्ते अव्यक्ता नित्यमेव तु ।
सत्वं रजस्तमश्चैव गुणसर्गः सनातनः ॥
तदव्यक्तं शिवं नित्यमजं योनिः सनातनम् ।
प्रकृतिर्विकारः प्रलयः प्रधानं प्रभवाव्ययौ ॥

अनुद्वृत्तमनूनं चाप्यकम्प्यमचलं ध्रुवम्।
सदसच्चैव तन्नित्यमव्यक्तं त्रिगुणं स्मृतम्॥
ज्ञेयानि नामधेयानि नरैरध्यात्मचिन्तकैः।
अव्यक्तनामानि गुणांश्च तत्त्वतो यो वेद सर्वाणि गतीश्च केवलाः।
विमुच्य देहं प्रविभागतत्त्ववित् स मुच्यते सर्वगुणैरनामयः॥

ब्रह्मोवाच।

अव्यक्तात् पूर्वमुत्पन्नो महानात्मा प्रजापतिः।
आदिर्गुणानां सर्वेषां प्रथमः सर्ग उच्यते॥
महानात्मा विभुर्विष्णुः प्रभुः शंभुश्च वीर्यवान्।
बुद्धिः प्रज्ञोपलब्धिश्च संवित् ख्यातिर्धृतिः स्मृतिः॥
पर्यायवाचकैः शब्दैर्महानात्मा विभाव्यते।
तज्ज्ञानात् ब्राह्मणो विद्वान् न च मोहं निगच्छति॥
सर्वतः पाणिपादान्तः सर्वतोऽक्षिशिरोमुखम्।
सर्वतः श्रुतिमल्लोके सर्वं व्याप्य च तिष्ठति॥
ज्ञानवन्तश्च ये केचिदलुब्धजितमन्यवः।
प्रसन्नमनसो धीरा निर्ममा निरहंकृताः॥
विमुक्ताः सर्व एवैते महत्त्वमुपयान्ति वै।
आत्मनो महतो वेद यः पुण्यां गतिमुत्तमाम्॥
स धीरः सर्वलोकेषु तमोहमधिगच्छति।
विष्णुरेवादिसर्गेषु स्वयंभूर्भवति प्रभुः॥
एवं हि यो वेद गुहाशयं प्रभुं नरः पुराणं परमं विश्वरूपम्।
हिरण्मयं बुद्धिमतां परां गतिं स बुद्धिमान् बुद्धिमतीत्य तिष्ठति॥

ब्रह्मोवाच।

यदुत्पन्नो महान् पूर्वमहङ्कारः स उच्यते।
अहमित्येव संभूतो द्वितीयः सर्ग उच्यते॥

अहंकारश्च भूतादिर्वैकारिकपतिः स्मृतः ।
तेजसस्तेजसा धातुः प्रजासर्गः प्रजापतिः ॥
देवानां प्रथमो देवो मनसश्च त्रिलोककृत् ।
अहमित्येव तत्सर्वमभिमन्ता स उच्यते ॥
अध्यात्मज्ञाननित्यानां मुनीनां भावितात्मनाम् ।
स्वाध्यायक्रतुसिद्धानां एष लोकः सनातनः ॥
अहङ्कारात् प्रभूतानि महाभूतानि पञ्च वै ।
पृथिवी वायुराकाश आपो ज्योतिश्च पञ्चमम् ॥
तेषु भूतानि मुह्यन्ति महाभूतेषु पञ्चसु ।
शब्दस्पर्शनरूपेषु रसगन्धक्रियासु च ॥
महाभूतविकारान्ते प्रलये प्रत्युपस्थिते ।
सर्वप्राणिभृतां धीरा महदुत्पद्यते भयम् ॥
यस्मात् संजायते भूतं तत्र तत्प्रविलीयते ।
लीयन्ते प्रतिलोमानि जायन्ते चोत्तरोत्तरम् ॥
ततः प्रलीने सर्वस्मिन् भूते स्थावरजङ्गमे ।
स्मृतिमन्तः सदा धीरा न लीयन्ते कथंचन ॥
शब्दः स्पर्शस्तथा रूपं रसो गन्धश्च पञ्चमः ।
क्रियाः कारणसंयुक्ता अनित्याख्या हि संहिताः ॥
लोका वृजिनसंयुक्ता निर्विशेषा ह्यकिञ्चनाः ।
मांसशोणितसङ्घाता अन्योन्यस्योपजीविनः ॥
बहिरात्मान इत्येते दीनाः कृपणवृत्तयः ।
त्वग्घ्राणश्रोत्रचक्षूंषि रसनं वाक् च संयता ॥
विशुद्धं मनसो यस्य बुद्धिश्चाव्यभिचारिणी ।
अष्टौ यस्याग्नयो ह्येते न दहन्ति मनः सदा ॥

१४

स तद् ब्रह्म शुभं याति यस्माद्भूतं न विद्यते।
एकादश च यान्याहुरिन्द्रियाणि विशेषतः॥
अहङ्कारप्रसूतानि तानि वक्ष्यामहं द्विजाः।
श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका चैव पञ्चमी॥
पादौ पायुरुपस्थं च हस्तौ वाग्दशमी भवेत्।
इन्द्रियग्राम इत्येष मन एकादशं भवेत्॥
एनं ग्रामं त्यजेत् पूर्वं ततो ब्रह्म प्रकाशते।
बुद्धीन्द्रियाणि पञ्चाहुः पञ्च कर्मेन्द्रियाणि च॥
श्रोत्रादीनि च पञ्चाहुर्बुद्धियुक्तानि तत्त्वतः।
अविशेषाणि चान्यानि कर्मयुक्तानि तानि तु॥
उभयत्र मनो ज्ञेयं बुद्धिश्च द्वादशी भवेत्।
इत्युक्तानीन्द्रियाणीमान्येकादश मया क्रमात्॥
मन्यन्ते कृतमित्येव विदित्वेमानि पण्डिताः।
त्रीणि स्थानानि भूतानां चतुर्थं नोपपद्यते॥
स्थलमापस्तथाकाशं जन्म चापि चतुर्विधम्।
अण्डजोद्भिज्जसंस्वेदजरायुजमथापि वा॥
चतुर्द्धा जन्म इत्येतद्भूतग्रामस्य वक्ष्यते।
धर्म्मकामाश्च राजानो ब्राह्मणा धर्मलक्षणाः॥
तस्माद्राजा द्विजातीनां प्रयतेतेह रक्षणे।
राज्ञां हि विषये येषामवसीदन्ति साधवः॥
भीतास्ते स्वगुणैः सर्वे प्रेत्याऽवाङ्मार्गगामिनः।
राज्ञां तु विषये येषां साधवः परिरक्षिताः।
तस्मिंल्लोके प्रमोदन्ते प्रेत्य चानन्त्यमेव हि॥
प्राप्नुवन्ति महात्मान इति वित्त द्विजर्षभाः।

अहिंसालक्षणो धर्मो हिंसा चाधर्मलक्षणा ॥
प्रकाशलक्षणा देवा मनुष्याः कर्मलक्षणाः ।
स्वरव्यञ्जनसंस्कारा भारती सत्यलक्षणा ॥
मनसो लक्षणं चिन्ता तथोक्ता बुद्धिरन्वया ।
मनसा चिन्तमानोऽर्थान् बुद्धिश्चैव व्यवस्यति ॥
बुद्धिर्हि व्यवसायेन लक्ष्यते नात्र संशयः ।
लक्षणं महतो ध्यानमव्यक्तं साम्यलक्षणम् ॥
प्रवृत्तलक्षणो योगो ज्ञानं संन्यासलक्षणम् ।
तस्माद् ज्ञानं पुरस्कृत्य संन्यासमिह बुद्धिमान् ॥
संन्यासी ज्ञानसंयुक्तः प्राप्नोति परमां गतिम् ।
अतीतद्वन्द्वमभ्येति तमो जन्मजरातिगम् ॥
मनसस्तु गुणश्चिन्ता प्रज्ञया स तु गृह्यते ।
हृदिस्थश्चेतनाधातुर्मनो ज्ञाने विधीयते ॥
बुद्धिरव्यवसायेन ध्यानेन च महांस्तथा ।
निश्चित्य ग्रहणं नित्यमव्यक्तं नात्र संशयः ॥
अलिङ्गग्रहणे नित्यः क्षेत्रज्ञो निर्गुणात्मकः ।
तस्मादलिङ्गः क्षेत्रज्ञः केवलं ज्ञानलक्षणः ॥
अव्यक्तं क्षेत्रमुद्दिष्टं गुणानां प्रभवोऽव्ययः ।
सदा पश्याम्यहं लीनं विसृजामि शृणोमि च ॥
पुरुषस्तद्विजानीते तस्माद् क्षेत्रज्ञ उच्यते ।
गुणवृत्तं तथा सर्वं क्षेत्रज्ञः परिपश्यति ।
आदिमध्यावसानान्तं सृज्यमानमचेतनम् ॥
न गुणा विदुरात्मानं सृज्यमानं पुनः पुनः ।
न सत्यं वेत्ति वै किंचित् क्षेत्रज्ञस्त्वेव वेत्ति वै ॥

गुणानां गुणभूतानां यत्परं परतो महत् ।
तस्माद् गुणांश्च तत्त्वं च परित्यज्येह तत्त्ववित् ॥
क्षीणदोषो गुणान् हित्वा क्षेत्रज्ञं प्रविशत्ययम् ।
निर्द्वन्द्वो निःसंस्कारो निःस्वाहाकार एव च ॥
अचलश्चानिकेतश्च क्षेत्रज्ञः स परो विभुः ।
कालचक्रप्रवृत्तिं च निवृत्तिश्चैव तत्त्वतः ॥
ज्ञात्वा वेदपरो नित्यं न स भूतेषु मुह्यति ।
विमुक्तः सर्वसंक्लेशैः सर्वद्वन्द्वातिगो मुनिः ॥
विमुक्तिः सर्वपापेभ्यः प्राप्नोति परमां गतिम् ।
ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः ॥
चत्वारश्चाश्रमाः प्रोक्ताः सर्वे गार्हस्थ्यमूलकाः ।
यः कश्चिदिह लोके वाप्याश्रमः संप्रकीर्त्तितः ॥
तस्यान्तगमनं श्रेयः कीर्त्तिरेषा सनातनी ।
संस्कारैः संस्कृतः पूर्वं यथावच्च कृतव्रतः ॥
जातो गुणविशिष्टायां समावर्त्तेत वेदवित् ।
स्वदारनिरतो दान्तो शिष्टाचारो जितेन्द्रियः ॥
पञ्चभिश्च महायज्ञैः श्रद्दधानो यजेत ह ।
देवतातिथिशिष्टाशी निरतो वेदकर्मसु ॥
इज्याप्रदानयुक्तश्च यथाशक्ति यथाविधि ।
अधीत्याध्यापनं कुर्यात्तथा यजनयाजने ॥
दानं प्रतिग्रहं चैतां षड्गुणां वृत्तिमाश्रयेत् ।
त्रीणि कर्माणि यानीह ब्राह्मणानां तु जीविका ॥
याजनाध्यापने चोभे शुद्धश्चापि प्रतिग्रहः ।
अवशेषाणि चान्यानि त्रीणि कर्माणि यानि तु ॥
दानमध्ययनं यज्ञो धर्मयुक्तानि तानि तु ।

तेष्वप्रमादं कुर्वीत त्रिषु कर्मसु कर्मकृत् ॥
दान्तो युक्तः क्षमायुक्तः सर्वभूतसमो मुनिः ।
एवं युक्तो जयेत् स्वर्गं गृहस्थः शंसितव्रतः ॥
गृहस्थो ब्रह्मचारी च वानप्रस्थोऽपि वा पुनः ।
य इच्छेन्मोक्षमास्थातुमुत्तमां वृत्तिमाश्रयेत् ॥
अभयं सर्वभूतेभ्यो दत्वा वै धर्ममाचरेत् ।
यात्रामात्रं च भुञ्जीत केवलं प्राणयात्रिकः ॥
धर्मलब्धं तथाश्नीयान्न काममनुवर्त्तयेत् ।
ग्रासादाच्छादनादन्यं न गृह्णीयात् कथंचन ॥
नाददीत परस्वानि न गृ यादयाचितम्
न शिल्पजीविकां जीवे रामं कामये था ॥
कृत्वा मौनं चरेद्गै धूमे भुक्तव ने ।
वृत्ते शरावसम्प भैक्ष्यं लिप्से मोक्षवित् ॥
लाभे तु न हृष्येत ना भे विमना भवेत् ।
अतिपू लाभाद्वि विजिगुप्सेत पण्डितः ॥
भुक्त न्नानि स्निग्धानि कषायकटुकानि च ।
स्वादयेत भुञ्जानो रसांश्च मधुरांस्तथा ॥
असंरोधेन भूतानां वृत्तिं लिप्सेत मोक्षवित् ।
शून्यागारमरण्यं वा वृक्षमूलं नदीं तथा ॥
प्रतिश्रयार्थं सेवेत पार्वतीं वा पुनर्गुहाम् ।
ग्रामैकरात्रिको ग्रीष्मे वर्षास्वेकत्र वा वसेत् ॥
सञ्चयांश्च न कुर्वीत स्नेहभावं विवर्जयेत् ।
इन्द्रियाण्युपसंहृत्य कूर्मोऽङ्गानीव सर्वशः ॥
क्षीणेन्द्रियमनोबुद्धिर्निरीक्षेत जितेन्द्रियः ।

निर्द्वन्द्वो निर्नमस्कारो निःस्वाहाकार एव च ॥
निर्ममो निरहङ्कारो निर्योगक्षेम एव च।
निश्चितः सर्वभूतेषु निरासङ्गो निराश्रमः ॥
सर्वज्ञः सर्वतो मुक्तो मुच्यते नात्र संशयः।
निश्चिन्त्य मध्यमं नित्यं हृदिस्थमपि सर्वदा ॥
सर्वभूतस्थमात्मानं ये पश्यन्ति न ते मृताः।
विमुक्तः सर्वसङ्गेभ्यो वायुराकाशगो यथा ॥
[illegible]क्रोशो निरातङ्कः प्राप्नोति परमाङ्गतिम्।
हि[illegible] गुणमयं सर्वं धर्मं जन्तुः शुभाशुभम् ॥
उभे स[illegible]नृते त्यक्त्वा मुच्यते नात्र संशयः।
आहुरेके म[illegible]त्मानो ये ज्ञानेषु प्रतिष्ठिताः ॥
क्षेत्रज्ञं सत्वयोरे[illegible]मित्येतन्नोप[illegible]द्यते।
पृथग्भूतं ततो नित्यमित्येतद्विचरितम् ॥
विषयो विषयित्वं च सम्बन्धत्वमिहो[illegible]।
विषयी पुरुषो नित्यं सत्वं च विषयः स्मृ[illegible] ॥
मशकोदुम्बुरेत्वैक्यं पृथक्त्वमपि दृश्यते।
मत्स्यो यथान्यः स्यादम्भु सम्प्रयोगस्तथानयोः।
सम्बन्धस्तोयविन्दूनां पर्णैः कोकनदस्य च।
भुज्यमानं न जानीते नित्यं सत्वमचेतनम् ॥
ज्ञातैव तु विजानाति यो भुङ्क्ते यच्च भुज्यते।
अनित्यद्वन्द्वसंयुक्तं सत्वमाहुर्गुणात्मकम् ॥
निर्द्वन्द्वो निष्कलो नित्यः क्षेत्रज्ञो निर्गुणात्मकः।
समासज्ञानमतत्वेन यदा सर्वत्र दृश्यते ॥
सर्वैरपि गुणैर्विद्वान् व्यतिषक्तो न लिप्यते।

यथा द्रव्यं च कर्त्ता च संयोगो ह्यनयोस्तथा ॥
यथा प्रदीपमादाय कश्चित्तमसि गच्छति ।
तथा सत्वप्रदीपेन गच्छन्ति परमर्षयः ॥
यावद्द्रव्यगुणस्तावत् सत्वतः संप्रकाशते ।
क्षीणद्रव्यगुणं ज्योतिरन्तर्ध्यानं न गच्छति ॥
व्यक्तः सत्वगुणस्त्वेवं पुरुषोऽव्यक्त उच्यते ।
एतद्विप्रा विजानीत हन्त भूयो ब्रवीमि वः ॥
सहस्रेणापि दुर्मेधा निवृत्तिर्माधिगच्छति ।
चतुर्थेनाप्यथांशेन बुद्धिमान् सुखमेधते ॥
एवं धर्मस्य विज्ञेयं संसाधनमुपायतः ।
उपायज्ञो हि मेधावी सुखमत्यन्तमश्नुते ॥
यथा च दीर्घमध्वानं पद्भ्यामेव प्रपद्यते ।
अदृष्टपूर्वं सहसा तत्वदर्शनवर्जितः ॥
तथैव च तदध्वानं रथेनेहाशुगामिना ।
यायादश्वप्रयुक्तेन तथा बुद्धिमतां गतिः ॥
एवं गच्छति मेधावी तत्वतो मोक्षधर्मवित् ।
समाज्ञाय महाबुद्धे उत्तरादुत्तरोत्तरम् ॥
यथा महार्णवं घोरमप्लवः संप्रगाहते ।
बाहुभ्यामेव संमोहाद्वधमृच्छत्यसंशयम् ॥
नौकया च विगाहज्ञो विभागज्ञस्त्वरित्रया ।
अक्लान्तः सलिलं गाहेत् क्षिप्रं स तरति ध्रुवम् ॥
तीर्णो गच्छेत् परं पारं नावमुत्सृज्य निर्ममः ।
तथा कर्मसु विज्ञेयं फलं भवति वा न वा ॥
पुरुषस्यात्मनि श्रेयः शुभाशुभनिदर्शनः ।

यथा कर्म कृतं लोके तथा तदुपपद्यते ॥
भूतानामथ पञ्चानामथैषामीश्वरं मनः ।
नियमे च विसर्गे च भूतानां मन एव वा ॥
अधिष्ठाता मनो नित्यं भूतानां महतां तथा।
बुद्धिमैश्वर्यमाचष्टे क्षेत्रज्ञः सर्व उच्यते ॥
इन्द्रियाणि मनो युङ्क्ते सदश्वानिव सारथिः।
इन्द्रियाणि मनो बुद्धिः क्षेत्रज्ञो हि युनक्ति वै ॥
महाभूतसमायुक्तं बुद्धिः संयमनं रथम्।
यमारुह्य स भूतात्मा समन्तात् परिधावति ॥
इन्द्रियग्रामसंयुक्तो मनः सारथिरेव च।
मनः संयमने नित्यं महाब्रह्ममयो रथः ॥
एवं यो वेत्ति विद्वान् वै सदा ब्रह्ममयं रथम्।
स धीरः सर्वलोकेषु न मोहमधिगच्छति ॥
द्व्यक्षरस्तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतम्।
ममेति तु भवेन्मृत्युर्न ममेति च शाश्वतम् ॥
कर्म केचित् प्रशंसन्ति कर्मबुद्धिरता नराः ।
ये तु बुद्धा महात्मानो न प्रशंसन्ति कर्म ते।
कर्मणा जायते जन्तुर्मूर्त्तिमत् षोडशात्मकः ॥
पुरुषं सृजतेऽविद्या त्वग्राह्यमविनाशिनम्।
तस्मात् कर्मसु निःस्नेहा ये केचित् पारदर्शिनः ॥
विद्यामयोऽयं पुरुषो न तु कर्ममयः स्मृतः ।
समेन सर्वभूतेन निस्पृहेण निरामिषा ॥
शक्या गतिरियं गन्तुं सर्वत्र समदर्शिना।
एतद्वः सर्वमाख्यातं मया विप्रर्षिसत्तमाः ॥

एवं ज्ञात्वा यतः क्षिप्रं ततः सिद्धिमवाप्स्यथ ।

गुरुरुवाच ।

इत्युक्ता गुरुणा तेन मुनयो ब्रह्मणा तथा ।
कृतवन्तो महात्मानस्तथा लोकानवाप्नुवन् ॥
त्वमप्येवं महाभाग यथोक्तं ब्रह्मणो वचः ।
सम्यगाचरशुद्धात्मा ततः सिद्धिमवाप्स्यसि ॥

श्रीभगवानुवाच ।

इत्युक्तः स तदा शिष्यो गुरुणा धर्ममुत्तमम् ।
चकार सर्वं कौन्तेय ततो मोक्षमवाप्तवान् ॥
कृतकृत्यश्च सहसा शिष्यः कुरुकुलोद्वह ।
तत्पदं समनुप्राप्तो यत्र गत्वा न शोचति ॥
त्वमप्येतन्महाभाग यथोक्तं ब्रह्मणो वचः ।
सम्यगाचरशुद्धात्मा ततो मोक्षमवाप्स्यसि ॥

अर्जुन उवाच ।

को न्वसौ ब्राह्मणः कृष्ण कश्च शिष्यो जनार्दन ।
श्रोतव्यं चेन्मयैतद्वै तन्ममाचक्ष्व वै विभो ॥

श्रीभगवानुवाच ।

अहं गुरुर्महाभाग मनः शिष्यं च विद्धि मे ।
त्वत्प्रीत्या गुह्यमेतच्च कथितं वै धनञ्जय ॥
मयि चेदस्ति वै भक्तिर्नित्यं कुरुकुलोद्वह ।
अध्यात्ममेतच्छ्रुत्वा तु सम्यगाचर सुव्रत ॥
ततस्त्वं सम्यगाचारो धर्मेऽस्मिन् कुरुनन्दन ।
सर्वपापविशुद्धात्मा मोक्षमाप्स्यसि केवलम् ॥

पूर्वमप्येतदेवोक्तं युद्धकाल उपस्थिते ।
मया तत्त्वं महाभाग तस्मादत्र मनः कुरु ॥

इति श्रीभक्तिसागरे अनुगीताख्यानं नाम पञ्चमस्तरङ्गः ।

युधिष्ठिर उवाच ।

धर्माः पितामहेनोक्ता राजधर्माश्रिताः शुभाः ।
धर्ममाश्रमिणां श्रेष्ठं वक्तुमर्हसि पार्थिव ॥

भीष्म उवाच ।

सर्वत्र विहितो धर्मः स्वर्गः सत्यफलोदयः ।
बहुद्वारस्य धर्मस्य नेहास्ति विफला क्रिया ॥
यस्मिन् यस्मिंस्तु विषये यो यो याति विनिश्चयम् ।
स तमेवाभिजानाति नान्यं भरतसत्तम ॥
यथा यथा च पर्य्येति लोकतन्त्रमसारवत् ।
तथा तथा विरागोऽत्र जायते नात्र संशयः ॥
एवं व्यवसिते लोके बहुदोषे युधिष्ठिर ।
आत्ममोचनिमित्तं वै यतेत मतिमान्नरः ॥

युधिष्ठिर उवाच ।

नष्टे धने वा दारे वा पुत्रे पितरि वा मृते ।
यया बुद्ध्या नुदेच्छोकं तन्मे ब्रूहि पितामह ॥

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
यथा सेनजितं विप्रः कश्चिदेत्याब्रवीत् सुहृत् ॥
पुत्रशोकाभिसन्तप्तं राजानं शोकविह्वलम् ।
विषसमनसं दृष्ट्वा विप्रो वचनमब्रवीत् ॥

किन्तु खल्वसि मूढस्त्वं शोच्यः किमनुशोचसि।
यदा त्वामपि शोचन्तः शोच्या यास्यन्ति तां गतिम्॥
त्वञ्चैवाहञ्च ये चान्ये त्वामुपासन्ति पार्थिव।
सर्वे तत्र गमिष्यामो यत एवागता वयम्॥

सेनजिदुवाच।

का बुद्धिः किं तपो विप्र कः समाधिस्तपोधन।
किं ज्ञानं किं श्रुतं चैव यत् प्राप्य न विसीदति॥

ब्राह्मण उवाच।

पश्यन्तमवसीदन्तं सुखदुःखविपर्यये।
आत्मानमनुशोचामि यो ममैष हृदि स्थितः।
पश्य भूतानि दुःखेन व्यतिषक्तानि सर्वतः॥
उत्तमाधममध्यानि तेषु तेष्विह कर्मसु॥
मोहजालेन बद्धानि दृष्ट्वा तानि ममाभवन्।
आत्मापि चायं न मम सर्वा वा पृथिवी मम॥
यथा मम तथान्येषामिति चिन्त्य न मे व्यथा।
एतां बुद्धिमहं प्राप्य न प्रहृष्ये न च व्यथे॥
यथा काष्ठञ्च काष्ठञ्च समेयातां महोदधौ।
समेत्य च व्यपेयातां तद्वद्भूतसमागमः॥
एवं पुत्राश्च पौत्राश्च ज्ञातयो बान्धवास्तथा।
तेषां स्नेहो न कर्तव्यो विप्रयोगो ध्रुवो हि तैः॥
अदर्शनादापतितः पुनश्चादर्शनं गतः।
न त्वसौ वेद न त्वं तं कः सन् किमनुशोचति॥
तृष्णार्तिप्रभवं दुःखं दुःखार्त्तिप्रभवं सुखम्।
सुखात् सञ्जायते दुःखं दुःखमेवं पुनःपुनः॥

सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम्।
सुखदुःखे मनुष्याणां चक्रवत् परिवर्त्तते॥
सुखी त्वं दुःखमापन्नः पुनरापत्स्यसे सुखम्॥
न नित्यं लभते दुःखं न नित्यं लभते सुखम्।
शरीरमेवायतनं सुखस्य दुःखस्य चाप्यायतनं शरीरम्॥
यद्यच्छरीरेण करोति कर्म तेनैव देही समुपाश्नुते तत्।
जीवितं च शरीरं च जात्यैव सह जायते॥
उभे सह विवर्द्धेते उभे सह विनश्यतः।
नालं सुखाय सुहृदो नालं दुःखाय शत्रवः॥
न च प्रज्ञालमर्थानां न सुखानामलं धनम्।
न बुद्धिर्धनलाभाय न जाड्यमसमृद्धये॥
लोकपर्यायवृत्तान्तं प्राज्ञो जानाति नेतरः।
बुद्धिमन्तं च शूरं च मूढं भीरुं जडं कविम्॥
दुर्बलं बलवन्तञ्च भागिनं भजते सुखम्।
ये च मूढतमा लोके ये च बुद्धेः परङ्गताः॥
ते नराः सुखमेधन्ते क्लिश्यत्यन्तरितो जनः।
शोकस्थानसहस्राणि भयस्थानशतानि च॥
दिवसे दिवसे मूढमाविशन्ति न पण्डितम्।
यन्निमित्तं भवेच्छोकस्तापो वा दुःखमेव वा॥
आयासो वा यतो मूलमेकाङ्गमपि तत्त्यजेत्।
यच्च कामसुखं लोके यच्च दिव्यं महत् सुखम्॥
तृष्णाक्षयसुखस्यैते कलां नार्हन्ति षोडशीम्।
पूर्वजन्मकृतं कर्म शुभं वा यदि वाशुभम्॥
प्राज्ञं मूढं तथा शूरं भजते यादृशं कृतम्।

किञ्चिदेव ममत्वेन यदा भवति कल्पितम्॥
तदेव परितापार्थं सर्वं संपद्यते तथा।
न बिभेति यदा चायं यदा चास्मान्न बिभ्यति॥
यदा नेच्छति न द्वेष्टि ब्रह्म सम्पद्यते तदा।
यदा न कुरुते धीरः सर्वभूतेषु पापकम्॥
कर्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा।
या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः॥
योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखम्।
अत्र पिङ्गलया गीता गाथाः शृणुम पार्थिव॥
यथा सा कृच्छ्रकालेऽपि लेभे धर्मं सनातनम्।
सङ्केते पिङ्गला वेश्या कान्तेनासीद्विना कृता॥
अथ कृच्छ्रगता शान्तां बुद्धिमास्थाय यत्तदा।

पिङ्गलोवाच।

उन्मत्ताऽहमनुन्मत्तं कान्तमन्ववसच्चिरम्।
अन्तिके रमणं शान्तं नैनमध्यगमं पुरा॥
एकस्थूणं नवद्वारमपिधास्याम्यगारकम्।
या हि कान्तमिहायान्तमयं कान्तेति मंस्यते॥
अकामाः कामरूपेण धूर्त्ता नरकरूपिणः।
न पुनर्वञ्चयिष्यन्ति प्रतिबुद्धाऽस्मि जागमि॥
अनर्थो हि भवेदर्थो दैवात् पूर्वं कृतेन च।
संबुद्धाऽहं निराकारा नाहमद्याजितेन्द्रिया॥
सुखं निराशः स्वपिति नैराश्यं परमं सुखम्।
आशामनाशां कृत्वा हि सुखं स्वपिति पिङ्गला॥

भीष्म उवाच।

एतैश्चान्यैश्च विप्रस्य हेतुमद्भिः सुभाषितैः।
पर्यवस्थापितो राजा सेनजिन्मुमुदे सुखी॥
अनवाप्तेषु कामेषु मृत्युरभ्येति मानवम्।
पुष्पाणीव विचिन्वन्तमन्यत्र गतमानसम्॥
वृकीवोरणमासाद्य मृत्युरादाय गच्छति।
श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम्॥
न हि प्रतीक्षते मृत्युः कृतं वास्य न वा ऽकृतम्।
को हि जानाति कस्याद्य मृत्युकालो भविष्यति॥
युवैव धर्मशीलः स्यादनित्यं खलु जीवितम्।
कृते धर्मे भवेत्कीर्त्तिरिह प्रेत्य च वै सुखम्॥
सञ्चिन्वानकमेवैकं कामानामवितृप्तकम्।
व्याघ्रः पशुमिवासाद्य मृत्युरादाय गच्छति॥
इदं कृतमिदं कार्यमिदमन्यत्कृताकृतम्।
एवमीहासुखासक्तं कृतान्तः कुरुते वशे॥
अमृतञ्चैव मृत्युश्च द्वयं देहे प्रतिष्ठितम्।
मृत्युरापद्यते मोहात् सत्येनापद्यतेऽमृतम्॥
यस्य वाङ्मनसी स्यातां सम्यक् प्रणिहिते सदा।
तपस्त्यागश्च योगश्च स वै धर्ममवाप्नुयात्॥
नास्ति विद्यासमो बन्धुर्नास्ति सत्यसमं तपः।
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम्॥
अकिञ्चनः सुखं शेते समुत्तिष्ठति चैव हि।
आकिञ्चन्यं सुखं लोके पथ्यं शिवमनामयम्॥
अकिञ्चनस्य शुद्धस्य उपपन्नस्य सर्वशः।

अवेक्षमाणस्त्रींल्लोकान्न तुल्यमिह लक्षये ॥
आकिञ्चन्यञ्च राज्यञ्च तुलया समतोलयम् ।
अत्यरिच्यत दारिद्र्यं राज्यादपि गुणाधिकम् ॥
आकिञ्चन्ये च राज्ये च विशेषः सुमहानयम् ।
नित्योद्विग्नो हि धनवान् मृत्योरास्यगतो यथा ॥
नैवास्याग्निर्न वाऽऽदित्यो न मृत्युर्न च दस्यवः ।
प्रभवन्ति धनत्यागाद्विमुक्तस्य निराशिषः ॥
तं वै सदा कामचरमनुपस्तीर्णशायिनम् ।
बाहूपधानं शाम्यन्तं प्रशंसन्ति दिवौकसः ॥
धनवान् क्रोधलोभाभ्यामाविष्टो नष्टचेतनः ।
तिर्यगक्षः शुष्कमुखः पापको भ्रुकुटीमुखः ॥
निर्दशन्नधरोष्ठञ्च क्रुद्धो दारुणभाषिता ।
कस्तमिच्छेत् परिद्रष्टुं दातुमिच्छति चेन्महीम् ॥
श्रियो ह्यभीक्ष्णं संवासो मोहयत्यविचक्षणम् ।
सा तस्य चित्तं हरति शारदाभ्रमिवानिलः ॥
अभिजातोऽस्मि सिद्धोऽस्मि नास्मि केवलमानुषः ।
इत्येभिः कारणैस्तस्य त्रिभिश्चित्तं प्रमाद्यति ॥
सम्प्रसक्तमना भोगान् विसृज्य पितृसञ्चितान् ।
परिक्षीणः परस्वानामादानं साधु मन्यते ॥
तमतिक्रान्तमर्यादमाददानं ततस्ततः ।
प्रतिषेधन्ति राजानो लुब्धा मृगमिवेषुभिः ॥
एवमेतानि दुःखानि तानीमानीह मानवम् ।
विविधान्युपपद्यन्ते गात्रसंस्पर्शजान्यपि ॥
तेषां परमदुःखानां बुद्ध्या भैषज्यमाचरेत् ।

नात्यक्त्वा सुखमाप्नोति नात्यक्त्वा विन्दते परम् ॥
नात्यक्त्वा चाभयः शेते त्यक्त्वा सर्वं सुखी भवेत्।
इत्येतद्धास्तिनपुरे ब्राह्मणेनोपवर्णितम् ॥
शम्याकेन पुरा मह्यं तस्मात्त्यागः परो मतः ।

भीष्म उवाच।

सर्वसाम्यमनायासः सत्यवाक्यञ्च भारत।
निर्वेदश्चाविधित्सा च यस्य स्यात् स सुखी नरः ॥
एतान्येव पदान्याहुः यं च वृद्धाः प्रशान्तये।
एष स्वर्गश्च धर्मश्च सुखञ्चानुत्तमं मतम् ॥
तस्मान्निर्वेदमेवेह गन्तव्यं सुखमिच्छता।
सुखं स्वपिति निर्विण्णो निराशश्चार्थसाधने ॥
अहो सम्यक् शुकेनोक्तं सर्वतः परिमुच्यता।
प्रतिष्ठता महारण्यं जनकस्य निवेशनात् ॥
यः कामानाप्नुयात् सर्वान् यश्चैतान् केवलांस्त्यजेत्।
प्रापणात् सर्वकामानां परित्यागो विशिष्यते।
नान्तं सर्वविधित्सानां गतपूर्वोऽस्ति कश्चन ॥
शरीरे जीविते चैव तृष्णा मन्दस्य जायते।
किन्त्वेवं जातु पुरुषः परेषां प्रेष्यतामियात् ॥
न पूर्वे नापरे जातु कामानामन्तमाप्नुवन्।
धनमस्येति पुरुषं यूनो निघ्नन्ति दस्यवः ॥
क्लिश्यन्ति विविधैर्दण्डैर्नित्यमुद्वेजयन्ति च।

भीष्म उवाच।

अत्राऽप्युदाहरन्तीममितिहासं पुरातनम्।
गीतं विदेहराजेन जनकेन महात्मना ॥

अनन्तं बत मे वित्तं यस्य मे नास्ति किञ्चन।
मिथिलायां प्रदीप्तायां न मे किञ्चित् प्रदह्यति ॥
पिङ्गला कुररः सर्पः सारङ्गान्वेषणं वने।
इषुकारः कुमारी च षडेते गुरवो मम ॥
सामिषं कुररं दृष्ट्वा वध्यमानं निरामिषैः।
आमिषस्य परित्यागात् कुररः सुखमेधते ॥
गृहारम्भोऽतिदुःखाय न सुखाय कदाचन।
सर्पः परकृतं वेश्म प्रविश्य सुखमेधते ॥
सुखं जीवन्ति मुनयो भैक्ष्यवृत्तिं समाश्रिताः।
अद्रोहेणैव भूतानां सारङ्गा इव पक्षिणः ॥
इषुकारो नरः कश्चिदिषावाहितमानसः।
समीपे नापि गच्छन्तं राजानं नाववुद्धवान् ॥
बहूनां कलहो नित्यं द्वयोर्वार्त्ता भवेदपि।
एकाकी विचरिष्यामि कुमारी शङ्खको यथा ॥

भीष्म उवाच।

अत्राप्युदाहरन्तीममितिहासं पुरातनम्।
प्रह्लादस्य च संवादं मुनेराजगरस्य च ॥
व्रजन्तं ब्राह्मणं कंचित्कल्यचित्तमनामयम्।
पप्रच्छ राजा प्रह्लादो बुद्धिमान् बुद्धिसम्मतम् ॥

प्रह्लाद उवाच।

स्वस्थः शक्तो मृदुर्दान्तो निर्विधित्सोऽनसूयकः।
सतां बहुमतो लोके प्राज्ञश्चरसि बालवत् ॥
नैव प्रार्थयसे लाभं नालाभेष्वनुशोचसि।
नित्यतृप्त इव ब्रह्मन् न किंचिदवमन्यसे ॥

इन्द्रियार्थाननादृत्य मुक्तश्चरसि साक्षिवत्।
का नु प्रज्ञा श्रुतं वा किं वृत्तिर्वा कुरुते मुने॥
क्षिप्रमाचक्ष्व मे ब्रह्मन् श्रेयो यदिह मन्यसे।
अनुयुक्तः स मेधावी लोकधर्मविधानवित्॥
उवाच श्लक्ष्णया वाचा प्रह्लादमनपार्थया।
पश्यन् प्रह्लादभूतानामुत्पत्तिमनिमित्ततः॥
ह्रासं वृद्धिं विनाशं च न प्रहृष्ये न च व्यथे।
स्वभावादेव संदृश्य वर्त्तमानाः प्रवृत्तयः॥
स्वभावनिरताः सर्वाः परितुष्ये न केनचित्।
पश्य प्रह्लादसंयोगात् विप्रयोगपरायणान्॥
सञ्चयांश्च विनाशान्तान् न क्वचिद्विदधे मनः।
अन्तवन्ति च भूतानि गुणयुक्तानि पश्यतः॥
उत्पत्तिनिधनज्ञस्य किं कार्यमवशिष्यते।
जलजानामपि ह्यन्तं पर्यायेणोपलक्षये॥
महतामपि कायानां सूक्ष्माणां च महोदधौ।
जङ्गमस्थावराणां च भूतानामसुराधिप॥
पार्थिवानामपि व्यक्तं मृत्युं पश्यामि सर्वशः।
अन्तरिक्षचराणां च दानवोत्तमपक्षिणाम्॥
उत्तिष्ठते यथाकालं मृत्युर्बलवतामपि।
दिवि सञ्चरमाणानि ह्रस्वानि च महान्ति च॥
ज्योतींष्यपि यथाकालं पतमानानि लक्षये।
इति भूतानि संपश्यन्ननुषक्तानि मृत्युना॥
सर्वसामान्यगो विद्वान् कृतकृत्यः सुखं स्वपे।
सुमहान्तमपि ग्रासं ग्रसे लब्धं यदृच्छया॥

शये पुनरभुञ्जानो दिवसानि बहून्यपि।
आस्ययत्यपि मामन्नं पुनर्बहुगुणं बहु॥
पुनरल्पं पुनः स्तोकं पुनर्नैवोपपद्यते।
कणान् कदाचित् खादामि पिण्याकमपि च ग्रसे॥
भक्षये शालिमांसानि भक्ष्यांश्चोच्चावचान् पुनः।
शये कदाचित् पर्यङ्के भूमावपि पुनः शये॥
प्रासादे वाऽपि मे शय्या कदाचिदुपपद्यते।
धारयामि च चीराणि शाणक्षौमाजिनानि च॥
महार्हाणि च वासांसि धारयाम्यहमेकदा।
कदाचित् पतितं चर्म उपभोग्यं यदृच्छया॥
प्रत्याचक्षे नवाप्येनमनुरुन्धे सुदुर्लभम्।
अनियतशयनाशनः प्रकृत्या दमनियमव्रतसत्यशौचयुक्तः।
अपगतफलसंचयः प्रहृष्टो व्रतमिदमाजगरं शुचिश्चरामि॥

भीष्म उवाच।

अजगरचरितं व्रतं महात्मा य इह नरोऽनुचरेद्विनीतरागः।
अपगतभयलोभमोहमन्युः स खलु सुखी विचरेदिमं विहारम्॥

प्रह्लादाजगरसंवादः।

भीष्म उवाच।

प्रज्ञा प्रतिष्ठा भूतानां प्रज्ञालाभः परो मतः।
प्रज्ञा निःश्रेयसी लोके प्रज्ञा स्वर्गो मतः सताम्॥
प्रज्ञया प्रापितोऽर्थोऽभूद्बलिरैश्वर्यसंक्षये।
प्रह्लादो नमुचिर्मङ्किः तस्याः किं विद्यते परम्॥
आत्मनानर्थयुक्तेन पापे निवसते मनः।
स्वकर्म कलुषं कृत्वा कष्टलोके विधीयते॥

दुर्भिक्षादेव दुर्भिक्षं क्लेशात् क्लेशं भयाद्भयम्।
मृतेभ्यः प्रसृता यान्ति दरिद्राः पापकारिणः॥
उत्सवादुत्सवं यान्ति स्वर्गात् स्वर्गं सुखात् सुखम्।
पुलाका इव धान्येषु पुत्तिका इव पक्षिषु॥
तद्विधास्ते मनुष्येषु येषां धर्मो न कारणम्।
सुशीघ्रमपि धावन्तं विधानमनुधावति॥
शेते सह शयानेन येन येन यथा कृतम्।
उपतिष्ठति तिष्ठन्तं गच्छन्तमनुगच्छति।
करोति कुर्वतः कर्म छायेवानुविधीयते॥
येन येन यथा यद्यत् पुरा कर्म समीहितम्।
तत्तदेव नरो भुङ्क्ते नित्यं विहितकर्मणा॥
स्वकर्मफलनिक्षेपं विधानपरिरक्षितम्।
भूतग्राममिमं कालः समन्तात् परिकर्षति॥
अचोद्यमानानि यथा पुष्पाणि च फलानि च।
स्वकालं नातिवर्तन्ते तथा कर्म पुराकृतम्॥
सम्मानश्चावमानश्च लाभालाभौ क्षयोदयौ।
प्रवृत्तावनुवर्तन्ते विधानान्ते पुनः पुनः॥
आत्मना विहितं दुःखमात्मना विहितं सुखम्।
गर्भशय्यामुपादाय भुज्यते पौर्वदेहिकम्॥
बालो युवा च वृद्धश्च यत् करोति शुभाशुभम्।
तस्यां तस्यामवस्थायां तत् फलं प्रतिपद्यते॥
यथा धेनुसहस्रेषु वत्सो विन्दति मातरम्।
तथा पूर्वकृतं कर्म कर्तारमनुगच्छति॥
सम्यन्धमग्रतो वस्त्रं पश्चाच्छुध्यति कर्मणा।

उपवासैः प्रतप्तानां दीर्घं सुखमनन्तकम् ॥
दीर्घकालेन तरसा सेवितेन तपोवने।
धर्मनिर्धूतपापानां संपद्यन्ते मनोरथाः ॥
शकुनानामिवाकाशे मत्स्यानामिव चोदके।
पदं यथा न दृश्येत तथा ज्ञानविदां गतिः॥
अलमन्यैरुपालब्धैः कीर्त्तितैश्च व्यतिक्रमैः।
पेशलं चानुरूपञ्च कर्त्तव्यं हितमात्मनः॥

भरद्वाज उवाच।

ब्राह्मणः केन भवति क्षत्रियो वा द्विजोत्तम।
वैश्यः शूद्रश्च विप्रर्षे तद् ब्रूहि वदतां वर ॥

भृगुरुवाच।

जातकर्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचिः।
वेदाध्ययनसंपन्नः षट्सु कर्मस्ववस्थितः ॥
शौचाचारस्थितः सम्यग्विघसाशी गुरुप्रियः।
नित्यव्रती सत्यपरः स वै ब्राह्मण उच्यते ॥
सत्यं दानमथोऽक्रोध आनृशंस्यं क्रिया घृणा।
तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः॥
क्षत्रजं सेवते कर्म वेदाध्ययनसङ्गतः।
दानादानरतिर्यस्तु स वै क्षत्रिय उच्यते॥
वणिज्या पाशुपाल्यं च कृष्यादानरतिः शुचिः।
वेदाध्ययनसंपन्नः स वैश्य इति संज्ञितः॥
सर्वभक्षरतिर्नित्यं सर्वकर्मकरोऽशुचिः।
त्यक्तवेदस्त्वनाचारः स वै शूद्र इति स्मृतः॥
शूद्रे चैतद्भवेल्लक्ष्यं द्विजे तच्च न विद्यते।

न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः॥
सर्वोपायैस्तु लोभस्य क्रोधस्य च विनिग्रहः।
एतत् पवित्रं ज्ञानानां तथा चैवात्मसंयमः॥
वार्यौ सर्वात्मना तौ हि श्रियोव्याघातार्थमुत्थितौ।
नित्यं क्रोधाच्छ्रियं रक्षेत्तपो रक्षेच्च मत्सरात्॥
विद्यां मानाय मानाभ्यामात्मानं तु प्रमादतः।
यस्य सर्वे समारम्भा निराशीर्बन्धनाद्द्विज॥
त्यागे यस्य हुतं सर्वं स त्यागी स च बुद्धिमान्।
अहिंसः सर्वभूतानां मैत्रायणगतिं चरेत्॥
परिग्रहान् परित्यज्य भवेद्बुद्ध्या जितेन्द्रियः।
अशोकं स्थानमातिष्ठेदिह चामुत्र चाभयम्॥
तपो नित्येन दान्तेन मुनिना संयतात्मना।
अजितं जेतुकामेन भाव्यं सङ्गेष्वसङ्गिना॥
सुखं वै ब्राह्मणो ब्रह्म निर्वेदेनाधिगच्छति।
शौचेन सततं युक्तः सदाचारसमन्वितः॥
सानुक्रोशश्च भूतेषु तद्द्विजातिषु लक्षणम्।
सत्यं ब्रह्म तपः सत्यं सत्यं विसृजति प्रजाः॥
सत्येन धार्यते लोकः स्वर्गं सत्येन गच्छति।
अनृतं तमसो रूपं तमसा नीयते ह्यधः॥
तमोग्रस्ता न पश्यन्ति प्रकाशं तमसावृताः।
स्वर्गः प्रकाश इत्याहुर्नरकं तम एव च॥
सत्यानृतं तदुभयं प्राप्यते जगतीचरैः।
तथाप्येवंविधा वृत्तिः लोके सत्यानृते भवेत्॥
शारीरमानसैर्दुःखैः सुखैश्चाप्यसुखोदयैः।

लोकसृष्टिं प्रपश्यन्ति न मुह्यन्ति विचक्षणाः ॥
सुखं च नित्यं भूतानामिह लोके परत्र च ।
राहुग्रस्तस्य सोमस्य यथा ज्योत्स्ना न भासते ॥
तथा तमोऽभिभूतानां भूतानां नश्यते सुखम् ।
हुतेन शाम्यते पापं स्वाध्याये शान्तिरुत्तमा ॥
दानेन भोगा नित्याहुस्तपसा स्वर्गमाप्नुयात् ।
दानं तु द्विविधं प्राहुः परत्रार्थमिहैव च ॥
सद्भ्यो यद्दीयते किंचित्तत्परत्रोपतिष्ठते ।
असद्भ्यो दीयते किञ्चित्तद्दानमिह भुज्यते ॥
यादृशं दीयते दानं तादृशं फलमश्नुते ।
स्वधर्मचरणे युक्ता ये भवन्ति मनीषिणः ॥
तेषां स्वर्गफलावाप्तिर्योऽन्यथा स विमुह्यति ।

भृगुभरद्वाजसंवादः ।

भीष्म उवाच ।

हन्त वक्ष्यामि ते पार्थ ध्यानयोगं चतुर्विधम् ।
यं ज्ञात्वा शाश्वतीं सिद्धिं गच्छन्तीह महर्षयः ॥
यथा स्वनिष्ठितं ध्यानं तथा कुर्वन्ति योगिनः ।
महर्षयो ज्ञानतृप्ता निर्वाणगततमानसाः ॥
नावर्तन्ते पुनः पार्थ मुक्ताः संसारदोषतः ।
जन्मदोषपरिक्षीणा स्वभावे पर्यवस्थिताः ॥
निर्द्वन्द्वा नित्यसत्त्वस्था विमुक्ता निष्परिग्रहाः ।
असंगान्यविवादीनि मनःशान्तिकराणि च ।
तत्र ध्यानेन संश्लिष्टमेकाग्रं धारयेन्मनः ॥
पिण्डीकृतेन्द्रियग्राममासीनः काष्ठवन्मुनिः ।

शब्दं न विन्देच्छ्रोत्रेण त्वचा स्पर्शं न विन्दयेत् ॥
रूपं न चक्षुषा विन्द्याज्जिह्वया न रसांस्तथा।
घ्रेयाण्यपि च सर्वाणि जह्याद्ध्यानेन योगवित् ॥
पञ्चवर्गप्रमाथीनि नेच्छेदेतानि वीर्यवान्।
ततो मनसि संगृह्य पञ्चवर्गं विचक्षणः ॥
समादध्यान्मनो भ्रान्तमिन्द्रियैः सह पञ्चभिः।
विसञ्चारी निरालम्बं पञ्चद्वारं चलाचलम् ॥
पूर्वं ध्यानपथे धीरः समादध्यान्मनोन्तरा।
इन्द्रियाणि मनश्चैव यदा पिण्डीकरोत्ययम् ॥
एष ध्यानपथः पूर्वो मया समनुवर्णितः।
तस्य तत्पूर्वसंरुद्धमात्मनः षष्ठमान्तरम् ॥
स्फुरिष्यति समुद्भ्रान्ता विद्युदन्धकारे यथा।
जलबिन्दुर्यथा लोलः पर्णस्थः सर्वतश्चलः ॥
एवमेवास्य चित्तञ्च भवति ध्यानवर्त्मनि।
समाहितं क्षणं किञ्चिद्ध्यानवर्त्मनि तिष्ठति ॥
पुनर्वायुपथं भ्रान्तं मनो भवति वायुवत्।
अनिर्वेदो गतक्लेशो गततन्द्रो नमत्सरी ॥
समादध्यात् पुनश्चेतो ध्यानेन ध्यानयोगवित्।
विचारश्च विवेकश्च वितर्कश्चोपजायते ॥
मुनेः समादधानस्य प्रथमं ध्यानमादितः।
मनसा क्लिश्यमानस्तु समाधानं च कारयेत् ॥
न निर्वेदं मुनिर्गच्छेत् कुर्यादेवात्मनो हितम्।
पांशुभस्मकरीषाणां यथा वै राशयश्चिताः ॥
सहसा वारिणा सिक्ता न यान्ति परिभावनाम्।

किञ्चित् स्निग्धं यथावत्स्याच्छुष्कचूर्णमभावितम् ॥
क्रमशस्तु शनैर्गच्छेत् सर्वं तत्परिभावनम्।
एवमेवेन्द्रियग्रामं शनैः सम्परिभावयेत्।
संहरेत् क्रमशश्चैव स सम्यक् प्रशमिष्यति।
स्वयमेवं मनश्चैव पञ्चवर्गं च भारत ॥
पूर्वं ध्यानपथे स्थाप्य नित्ययोगेन शाम्यति।
न तत्पुरुषकारेण न च दैवेन केनचित् ॥
सुखमेष्यति तत्तस्य यदेवं संयतात्मनः।
सुखेन तेन संयुक्तो रंस्यते ध्यानकर्मणि ॥
गच्छन्ति योगिनो ह्येवं निर्वाणं तं निरामयम्।
दुःखोपघाते शारीरे मानसे वाप्युपस्थिते ॥
यस्मिन्न शक्यते कर्तुं यतस्तन्नानुचिन्तयेत्।
चिन्त्यमानं हि चाभ्येति भूयश्चापि प्रवर्तते ॥
प्रज्ञया मानसं दुःखं हन्याच्छारीरमौषधैः।
एतद्धि ज्ञानसामर्थ्यं न बालैः शमतामियात् ॥
अनित्यं यौवनं रूपं जीवितं द्रव्यसञ्चयः।
आरोग्यं प्रियसंवासो गृद्ध्येत्तत्र न पण्डितः ॥
न जानपदिकं दुःखमेकः शोचितुमर्हसि।
अशोचन् प्रतिकुर्वीत यदि पश्येदुपक्रमम् ॥
सुखाद्बहुतरं दुःखं जीविते नात्र संशयः।
स्निग्धस्य चेन्द्रियार्थेषु मोहान्मरणमप्रियम् ॥
परित्यजति यो दुःखं सुखं वाप्युभयं नरः।
अभ्येति ब्रह्म सोऽत्यर्थं न ते शोचन्ति पण्डिताः ॥
दुःखमर्था हि युज्यन्ते पालनेन च ते सुखम्।

दुःखेन चाधिगम्यन्ते नाशं तेषां न चिन्तयेत् ॥
ज्ञानं ज्ञेयाभिनिर्वृत्तं बुद्धिज्ञानगुणं मनः।
प्रज्ञाकारणसंयुक्तं ततो बुद्धिः प्रवर्त्तते ॥
यदा तु कर्मगुणोपेता बुद्धिर्मनसि वर्त्तते।
तदा प्रज्ञायते ब्रह्म ध्यानयोगसमाधिना।
सेयं गुणवती बुद्धिर्गुणेष्वेवाभिवर्त्तते ॥
मनस्त्वपहृतं पूर्वमिन्द्रियार्थनिदर्शकम्।
न समचगुणोपेक्षि निर्गुणस्य निदर्शनम् ॥
सर्वाण्येतानि सवार्यं द्वाराणि मनसि स्थितः।
मनस्येकाग्रतां कृत्वा तत्परं प्रतिपद्यते ॥
यथा महान्ति भूतानि वर्त्तन्ते गुणसंचये।
तथेन्द्रियाण्युपादाय बुद्धिर्मनसि वर्त्तते ॥
यदा मनसि सा बुद्धिर्वर्त्ततेऽन्तरचारिणी।
व्यवसायगुणोपता तदा संपद्यते मनः ॥
गुणवद्भिर्गुणोपेतं यदा ध्यानगुणं मनः।
तदा सर्वान् गुणान् हित्वा निर्गुणं प्रतिपद्यते ॥
अव्यक्तस्येह विज्ञाने नास्ति तुल्यं निदर्शनम्।
यत्र नास्ति पदन्यासः कस्तं विषयमाप्नुयात् ॥
तपसा चानुमानेन गुणैर्जात्या श्रुतेन च।
निनीषेत्परमं ब्रह्म विशुद्धेनान्तरात्मना ॥
गुणहीनो हि तं मार्गं बहिः समनुवर्त्तते।
गुणाभावात् प्रकृत्या वा निस्तर्क्यं ज्ञेयसंमितम् ॥
नैर्गुण्यात् ब्रह्म चाप्नोति सगुणत्वान्निवर्त्तते।
गुणप्रचारिणी बुद्धिर्हुताशन इवेन्धने ॥

यथा पञ्च नियुक्तानि इन्द्रियाणि स्वकर्मभिः।
तथा हि परमं ब्रह्म विमुक्तं प्रकृतेः परम्॥
एवं प्रकृतितः सर्वे प्रवर्तन्ते शरीरिणः।
निवर्तन्ते निवृत्तौ च स्वर्गं चैवोपयान्ति च॥
पुरुषः प्रकृतिर्बुद्धिर्विषयाश्चेन्द्रियाणि च।
अहङ्कारोऽभिमानश्च समूहो भूतसंज्ञकः॥
श्रोत्रादीनि न पश्यन्ति स्वस्वमात्मानमात्मना।
सर्वज्ञः सर्वदर्शी च तानि सर्वाणि पश्यति॥
यथा हिमवतः पार्श्वं पृष्ठं चन्द्रमसो यथा।
न दृष्टपूर्वं मनुजैर्न च तन्नास्ति तावता॥
तद्वद् भूतेषु धर्मात्मा सूक्ष्मो ज्ञानात्मवानसौ।
अदृष्टपूर्वश्चक्षुर्भ्यां न चासौ नास्ति तावता॥
पश्यन्नपि यथा लक्ष्मजनः सोमे न विन्दति।
एवमस्ति न चोत्पन्नं न च तत्र परायणम्॥
रूपवन्तमरूपत्वादुदयास्तमने बुधाः।
धिया समनुपश्यन्ति तद्गताः सवितुर्गतिम्॥
तथा बुद्धिप्रदीपेन तद्गतस्थं विपश्चितः।
प्रत्यासन्नं निषीदन्ति ज्ञेयं ज्ञानाभिसंहितम्॥
न हि खल्वनुपायेन कश्चिदर्थोऽभिसिद्ध्यति।
सूत्रजालैर्यथा मत्स्यान् बध्नन्ति जलजीविनः॥
मृगैर्मृगाणां ग्रहणं पक्षिणां पक्षिभिर्यथा।
गजानाञ्च गजैरेवं ज्ञेयं ज्ञानेन गृह्यते॥
अहिरेव ह्यहेः पादान् पश्यतीति हि नः श्रुतम्।
तद्वन्मूर्त्तिषु मूर्त्तिस्थं ज्ञेयं ज्ञानेन पश्यति॥

यथा चन्द्रो ह्यमावास्यामलिगत्वान्न दृश्यते ।
न च नाशोऽस्य भवति यथा विद्धि शरीरिणाम् ॥
क्षीणकोशो ह्यमावास्यां चन्द्रमा न प्रकाशते ।
तद्वन्मूर्त्तिविमुक्तोऽसौ शरीरी नोपलभ्यते ॥
यथाऽकाशान्तरं प्राप्य चन्द्रमा भ्राजते पुनः ।
तद्वल्लिङ्गान्तरं प्राप्य शरीरी भ्राजते पुनः ॥
जन्म वृद्धिः क्षयश्चास्य प्रत्यक्षेणोपलभ्यते ।
यथा चन्द्रार्कनिर्मुक्तः स राहुर्नोपलभ्यते ॥
तद्वच्छरीरनिर्मुक्तः शरीरी नोपलभ्यते ।
ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः ॥
यथाऽऽदर्शतले शुद्धे पश्यत्यात्मानमात्मनि ।
प्रसूतैरिन्द्रियैर्दुःखी तैरेव नियमैः सुखी ॥
तस्मादिन्द्रियरूपेभ्य यच्छेदात्मानमात्मना ।
इन्द्रियेभ्यो मनः पूर्वं बुद्धिः परतरा ततः ॥
बुद्धेः परतरं ज्ञानं ज्ञानात् परतरं महत् ।
सव्यक्तात् प्रसृतं ज्ञानं ततो बुद्धिस्ततो मनः ॥
मनः श्रोत्रादिभिर्युक्तं शब्दादीन् साधु पश्यति ।
यस्तांस्त्यजति शब्दादीन् सर्वांलव्यक्तायस्तथा ॥
विमुञ्चन् प्राकृतान् भावांस्तान् मुच्काऽमृतमश्नुते ।
उद्यन् हि सविता यद्वत् सृजते रश्मिमण्डलम् ॥
स एवास्तमुपागच्छंस्तदेवात्मनि यच्छति ।
अन्तरात्मा तथा देहमाविश्येन्द्रियरश्मिभिः ॥
प्राप्येन्द्रियगुणान् यं च सोऽस्तमावृत्य गच्छति ।
प्रणीतं कर्मणा मार्गं नीयमानं पुनः पुनः ॥

प्राप्नोत्ययं कर्मफलं प्रवृत्तं धर्ममात्मवित् ।
विषया विनिवर्तन्ते निराहारस्य देहिनः ॥
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ।
बुद्धिः कर्मगुणैर्हीना यदा मनसि वर्तते ॥
तदासं पद्यते ब्रह्म तत्रैव प्रलयं गतम् ।
मनस्याकृतयो मग्ना मनस्त्वभिगतं मतिम् ॥
मतिस्त्वभिगता ज्ञानं ज्ञानं त्वभिगतं परम् ।
इन्द्रियैर्मनसः सिद्धिर्न बुद्धिं बुध्यते मनः ॥
न बुद्धिर्बुध्यते व्यक्तं सूक्ष्मत्वे तानि पश्यति ।
यदा तैः पञ्चभिः पञ्च युक्तानि मनसा सह ॥
तदा तद् दृश्यते ब्रह्म मणौ सूत्रमिवार्पितम् ।
तदेव च यथासूत्रं सुवर्णे वर्तते पुनः ॥
मुक्तास्वथ प्रवालेषु मृण्मये राजते तथा ।
तद्वद्गोषु मनुष्येषु तद्वद्धस्तिमृगादिषु ॥
तद्वत्कीटपतङ्गेषु प्रसक्तात्मा स्वकर्मभिः ।
येन येन शरीरेण यद्यत् कर्म करोत्ययम् ॥
तेन तेन शरीरेण तत्तत् फलमुपाश्नुते ।
यथा ह्येकरसा भूमिरोषध्यार्थानुसारिणी ॥
तथा कर्मानुगा बुद्धिरन्तरात्मानुदर्शिनी ।
ज्ञानपूर्वा भवेल्लिप्सा लिप्सा पूर्वाभिसंधिता ॥
ज्ञेयं ज्ञानात्मकं विद्यात् ज्ञानं सदसदात्मकम् ।
ज्ञानानां च फलानां च ज्ञेयानां कर्मणां तथा ॥
क्षयान्ते तत्फलं दिव्यं ज्ञातं ज्ञेये प्रतिष्ठितम् ।
महद्धि परमं भूतं यत् प्रपश्यन्ति योगिनः ॥

अबुद्धास्तं न पश्यन्ति ह्यात्मस्थं गुणबुद्धयः ।
मनसो महती बुद्धिर्बुद्धेः कालो महान् स्मृतः ॥
कालात् स भगवान् विष्णुर्यस्य सर्वमिदं जगत् ।
अनादित्वादमध्यत्वादनन्तत्वाच्च सोऽव्ययः ॥
अत्येति सर्वदुःखानि दुःखं ह्यन्तवदुच्यते ।
तद्‌ ब्रह्म परमं प्रोक्तं तद्धाम परमं पदम् ॥
तज्ज्ञात्वा कालविषयाद्विमुक्ता मोक्षमाश्रिताः ।
निःकल्मषं ब्रह्मचर्यमिच्छता चरितुं सदा ॥
निद्रा सर्वात्मना त्याज्या स्वप्नदोषमवेक्षता ।
स्वप्ने हि रजसा देही तमसा चाभिभूयते ॥
देशान्तरमिवापन्नश्चरत्यपगतस्पृहः ।
ज्ञानाभ्यासाज्जागरिते जिज्ञासार्थमनन्तरम् ॥
विज्ञानाभिनिवेशात्तु जागरत्यनिशं सदा ।

भीष्म उवाच ।

दुरन्तेष्विन्द्रियार्थेषु सक्ताः सीदन्ति जन्तवः ।
ये त्वसक्ता महात्मानस्ते यान्ति परमां गतिम् ॥
जन्ममृत्युजरादुःखैर्व्याधिभिर्मानसक्लमैः ।
दृष्ट्वेवं सततं लोकं घटेन्मोक्षाय बुद्धिमान् ॥
वाङ्मनोभ्यां शरीरेण शुचिः स्यादनहंकृतः ।
प्रशान्तो ज्ञानवान् भिक्षुः निरपेक्षश्चरेत् सुखम् ॥
अथवा मनसः संगं पश्यन् भूतानुकम्पया ।
तत्राप्युपेक्षां कुर्वीत ज्ञानकर्मफलं जगत् ॥
अहिंसा सत्यवचनं सर्वभूतेषु चार्जवम् ।
क्षमा चैवाप्रमादश्च यस्यैते स सुखी भवेत् ॥

तस्मात् समाहितं बुद्ध्या मनो भूतेषु धारयेत् ।
नापध्यायेन्न स्पृहयेन्न बुद्ध्या चिन्तयेदसत् ॥
वाचा मोघप्रयोगेण मनोज्ञं तत् प्रवर्त्तते ।
विवक्षता च तद्वाक्यं धर्मं सूक्ष्ममवेक्षता ॥
सत्यां वाचमहिंसाञ्च वदेदनपवादिनीम् ।
कल्कापेतान्निःपरुषामनृशंसामपैशुनाम् ॥
इदमल्पं च वक्तव्यमविक्षिप्तेन चेतसा ।
प्राक् प्रबुद्धो हि संसारो विरागाद्वाहरेद्यदि ॥
बुद्ध्याप्यनुगृहीतेन मनसा कर्म तामसम् ।
रजोभूतैर्हि करणैः कर्मणा प्रतिपद्यते ॥
स दुःखं प्राप्य लोकेऽस्मिन् नरकायोपपद्यते ।
निःसंदग्धमनीहो वै युक्तः सर्वपरिग्रहैः ॥
विविक्तचारी लघ्वाशी तपस्वी नियतेन्द्रियः ।
ज्ञानदग्धपरिक्लेशः प्रयोगरतिरात्मवान् ॥
निःप्रचारेण मनसा परं तदधिगच्छति ।
निगृहीतेन्द्रियस्यास्य कुर्वाणस्य मनो वशे ॥
देवताः संप्रकाशन्ते हृष्टा यान्ति तमीश्वरम् ।
कणकल्माषपिण्याकशाकयावकसक्तवः ? ॥
तथा मूलं फलं भैक्ष्यं पर्यायेणोपयोजयेत् ।
आहारं नियमं चैव देशे काले च सात्विकम् ॥
उष्णीषवान् यथा वस्त्रैस्त्रिभिर्भवति संवृतः ।
संवृतोऽयं तथा देही सत्वराजसतामसैः ॥

युधिष्ठिर उवाच ।

येन वृत्तेन वृत्तज्ञो जनको मिथिलाधिपः ।

जगाम मोक्षं धर्मज्ञो भोगानुत्सृज्य मानुषान्॥

भीष्म उवाच।

अत्राप्युदाहरन्तीममितिहासं पुरातनम्।
येन वृत्तेन वृत्तज्ञः स जगाम महत्सुखम्॥
जनको जनदेवस्तु मिथिलायां जनाधिपः।
और्ध्वदेहिकधर्माणामासीद्युक्तो विचिन्तने॥
तस्य स्म शतमाचार्या वसन्ति सततं गृहे।
दर्शयन्तः पृथग्धर्मान्नानापाषण्डवादिनः॥
स तेषां प्रेत्यभावेन प्रेत्यजातौ विनिश्चये।
आगमस्थः स भूयिष्ठमात्मतत्त्वेन तुष्यति॥
तत्र पञ्चशिखो नाम कापिलेयो महामुनिः।
परिधावन्महीं कृत्स्नां जगाम मिथिलामथ॥
सर्वसन्यासधर्म्माणां तत्त्वज्ञानविनिश्चये।
सुपर्यवसितार्थं च निर्द्वन्द्वो नष्टसंशयः॥
ऋषीणामाहुरेकं यं कामादवसितं नृषु।
शाश्वतं सुखमत्यन्तमन्विच्छन् स सुदुर्लभम्॥
यमाहुः कापिलं संख्याः परमर्षिं प्रजापतिम्।
स मन्ये तेन रूपेण विस्मापयति हि स्वयम्॥
आसुरेः प्रथमं शिष्यं यमाहुश्चिरजीविनम्।
पञ्चस्रोतसि यः सत्रमास्ते वर्षसहस्रिकम्॥
यत्र चासीनमागत्य कापिलं मण्डलं महत्।
इष्टिमन्त्रेण संयुक्तो भूयश्च तमसाऽऽसुरिः॥
क्षेत्रक्षेत्रज्ञयोर्व्यक्तिं बुबुधे देहदर्शनः।
यत्तदेकाक्षरं ब्रह्म नानारूपं प्रदृश्यते॥

आसुरिर्मण्डले तस्मिन् प्रतिपेदे तदव्ययम्।
तस्य पञ्चशिखः शिष्यो मानुष्याः पयसा भृतः॥
ब्राह्मणी कापिली नाम काचिदासीत् कुटुम्बिनी।
तस्याः पुत्रत्वमागत्य स्त्रियास्तत् पिबति स्तनौ॥
ततः स कापिलेयत्वं लेभे बुद्धिञ्च नैष्ठिकीम्।
एतन्मे भगवानाह कापिलेयस्य संभवम्।
तस्य तत्कापिलेयत्वं सर्ववित्त्वमनुत्तमम्॥
सामान्यं जनकं ज्ञात्वा धर्मज्ञो ज्ञानमुत्तमम्।
उपेत्य शतमाचार्यान् मोहयामास हेतुभिः॥
जनकस्त्वभिसंरक्तः कापिलेयानुदर्शनात्।
उत्सृज्य शतमाचार्यान् पृष्ठतोऽनुजगाम तम्॥
तस्मै परमकल्याणं प्रणताय च धर्मतः।
अब्रवीत् परमं यत्तत्सांख्ये मोक्षं विधीयते॥
जातिनिर्वेदमुक्त्वा स कर्मनिर्वेदमब्रवीत्।
यद्दर्थधर्मसंसर्गः कर्मणां च फलोदयः॥
तमनाश्वासिकं मोहं विनाशि चलमध्रुवम्।
दृश्यमाने विनाशे च प्रत्यक्षे लोकसाक्षिके॥
आगमात् परमस्तीति ब्रुवन्नपि पराजितः।
अनात्मा ह्यात्मनो मृत्युः क्लेशो मृत्युजरामयः॥
आत्मानं मन्यते मोहात्तदसम्यक् परं मतम्।
अथ चेदेवमप्यस्ति यल्लोकेनोपपद्यते॥
अजरोऽयममृत्युश्च राजाऽसौ मन्यते यथा।
अस्ति नास्तीति चाप्येतत्तस्मिन्नसति लक्षणे॥
किमधिष्ठाय तद्रूपाल्लोकयात्रा विनिश्चयम्।

प्रत्यक्षं ह्येतयोर्मूलं कृतान्तैतिह्ययोरपि ॥
प्रत्यक्षो ह्यागमो भिन्नः कृतान्तो वा न किंचन ।
यत्र तत्रानुमानेऽस्मिन् कृतं भावयतेपि च ॥
अन्यो जीवः शरीरस्य नास्तिकानां मते स्थितः ।
मृते कर्मनिवृत्तिश्च प्रमाणमिति निश्चयः ॥
नन्वेते हेतवः सन्ति यत्किंचिन्मूर्त्तिसंस्थितः ।
एवमर्थैरनर्थैश्च दुःखिताः सर्वजन्तवः ॥
आगमैरपकृष्यन्ते हस्तिपैर्हस्तिनो यथा ।
यथा रुरुः शृङ्गमथो पुराणं हित्वा त्वचं वाप्युरगो यथा वा ॥
विहाय गच्छत्यनवेक्षमाणस्तथा विमुक्तः प्रजहाति दुःखम् ।
द्रुमं यथा वाप्युदके पतन्तमुत्सृज्य पक्षी निपतत्यसक्तः ॥
तथा ह्यसौ दुःखसुखे विहाय मुक्तः परार्ध्यां गतिमेत्य लिङ्गः ।
अपि च भवति मैथिलेन गीतं नगरमुपाहितमग्निनाभिवीक्ष्य ॥
न खलु मदिह दह्यतेऽत्र किंचित्स्वयमिदमाह किमस्य भूमिपालः ।
इदममृतपदं निशम्य राजा स्वयमिह पञ्चशिखेन भाष्यमाणम् ॥
निखिलमभिसमीक्ष्य निश्चितार्थः परमसुखी विजहार वीतशोकः ।
इति जनकमैथिलपञ्चशिखयोगीश्वरयोः संवादः ॥

इति श्रीभक्तिसागरे सेनजिदुपाख्यान-शम्याकभीष्मसंवाद-भृगुभरद्वाजसंवाद-जनकपञ्चशिखसंवादनिरूपणन्नाम षष्ठस्तरङ्गः ।

युधिष्ठिर उवाच ।

यदिदं कर्मलोकेऽस्मिन् शुभं वा यदि वाऽशुभम् ।
पुरुषं योजयत्येव फलयोगेन भारत ॥
कर्त्ताऽस्ति तस्य पुरुष उताहो नेति संशयः ।
एतदिच्छामि तत्त्वेन त्वत्तः श्रोतुं पितामह ॥

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
प्रह्लादस्य च संवादमिन्द्रस्य च युधिष्ठिर ॥
असक्तं धूतपाप्मानं कुले जातं बहुश्रुतम् ।
अस्तब्धमनहङ्कारं सत्त्वस्थं समये रतम् ॥
तुल्यनिन्दास्तुतिं दान्तं शून्यागारनिवेशनम् ।
चराचराणां भूतानां विदितं प्रभवाव्ययम् ॥
अक्रुध्यन्तमहृष्यन्तमप्रियेषु प्रियेषु च ।
काञ्चने वाऽथ लोष्टे वा उभयोः समदर्शनम् ॥
शक्रः प्रह्लादमासीनमेकान्ते संयतेन्द्रियम् ।
बुभुत्समानस्तत्प्रज्ञामभिगम्येदमब्रवीत् ।
यैः कश्चित् सर्वतो लोके गुणैः स्यात् पुरुषो नृषु ॥
भवत्यनपगान् रुवांस्तान् गुणान् लक्षयामहे ।
अथ ते लक्ष्यते बुद्धिः समा बालजनैरिह ॥
आत्मानं मन्यमानः सन् श्रेयः किमिह मन्यसे ।
बद्धः पाशैश्च्युतः स्थानाद्द्विषतां वशमागतः ॥
श्रिया विहीनः प्रह्लाद शोचितव्येन शोचसि ।
प्रज्ञालाभात्तु दैत्येन्द्र उताहो धृतिमत्तया ॥
प्रह्लाद स्वस्थरूपोऽसि पश्य व्यसनमात्मनः ।
इति सञ्चोदितस्तेन धीरो निश्चितनिश्चयः ॥
उवाच श्लक्ष्णया वाचा स्वां प्रज्ञामनुवर्तयन् ।

प्रह्लाद उवाच ।

प्रवृत्तिं च निवृत्तिं च भूतानां यो न बुध्यते ।
तस्य स्तम्भो भवेद्बाल्यान्नास्ति स्तम्भोऽनुपश्यतः ॥

स्वभावात् संप्रवर्त्तन्ते निवर्त्तन्ते तथैव च।
सर्वे भावास्तथा भावाः पुरुषार्थो न विद्यते॥
पुरुषार्थस्य चाभावे नास्ति कश्चित् स्वकारकः।
स्वयं न कुर्वत स्तस्य जातु मानो भवेदिह॥
यस्तु कर्त्तारमात्मानं मन्यते साध्वसाधु वा।
तस्य दोषवती प्रज्ञा अतत्त्वज्ञेति मे मतिः॥
यदि स्यात् पुरुषः कर्त्ता शक्रात्मश्रेयसे ध्रुवम्।
आरम्भास्तस्य सिद्धेयुर्न तु जातु पराभवेत्॥
अनिष्टस्य हि निर्वृत्तिर्निवृत्तिर्हि प्रियस्य च।
लच्यते यतमानानां पुरुषार्थस्ततः कुतः॥
अनिष्टस्याभिनिर्वृत्तिमिष्टसंवृत्तिमेव च।
अप्रयत्नेन पश्यामः केषांचित्तु स्वभावतः॥
प्रतिरूपतराः केचिद्दृश्यन्ते बुद्धिमत्तराः।
विरूपेभ्योऽल्पबुद्धिभ्यो लिप्समाना धनागमम्॥
स्वभावप्रेरिताः सर्वे निविशन्ते गुणाद्यदा।
शुभाशुभास्तदा तत्र कस्यचिन्मानकारणम्॥
स्वभावादेव तत्सर्वमिति मे निश्चिता मतिः।
आत्मप्रतिष्ठा प्रज्ञा वा मम नास्ति ततोऽन्यथा॥
कर्मजं त्विह मन्यन्ते फलयोगं शुभाशुभम्।
कर्मणां विषयं कृत्स्नमहं वच्यामि तं शृणु॥
यथा वेदयते कश्चिदोदनं वायसो वदन्।
एवं सर्वाणि कर्माणि स्वभावस्यैव लक्षणम्॥
विकारानेव यो वेद न वेद प्रकृतिं पराम्।
तस्य स्तम्भोऽभिमानश्च भवेदाश्यान् प्रश्यतः॥

स्वभावभाविनो भावान् सर्वानेवेह निश्चयान् ।
बुद्ध्यमानस्य दर्पो वा मानो वा किं करिष्यति ॥
वेद धर्मविधिं कृत्स्नं भूतानामप्यनित्यताम् ।
तस्माच्छक्र न शोचामि सर्वं ह्येवेदमन्तवत् ॥
निर्ममो निरहङ्कारो निराशीर्मुक्तबन्धनः ।
स्वस्थोऽप्यपेतः पश्यामि भूतानां प्रभवाप्ययौ ॥
कृतप्रज्ञस्य दान्तस्य वितृष्णस्य निराशिषः ।
नायासो विद्यते शक्र पश्यतो लोकविद्यया ॥
प्रकृतौ च विकारे च न मे बुद्धिर्न च द्विषे ।
द्वेष्टारं च न पश्यामि यो मामद्य समापयेत् ॥
नोर्ध्वं नार्वाक् न तिर्यक् च न क्वचिच्छक्र कामये ।
न हि ज्ञेयेन विज्ञानेनाज्ञाने शर्म विद्यते ॥

शक्र उवाच ।

येनैषा लभ्यते प्रज्ञा येन शान्तिरवाप्यते ।
प्रब्रूहि तमुपायं मे सम्यक् प्रह्लाद पृच्छतः ॥

प्रह्लाद उवाच ।

आर्जवेनाप्रमादेन प्रसादेनात्मवत्तया ।
वृद्धशुश्रूषया चैव पुरुषो लभते महत् ॥
स्वभावाल्लभते प्रज्ञां शान्तिमेति स्वभावतः ।
स्वभावादेव तत्सर्वं यत्किंचिदनुपश्यति ॥
इत्युक्तो दैत्यपतिना शक्रो विस्मयमागमत् ।
प्रीतिमांश्च तदा राजन्स्तद्वाक्यं प्रत्यपूजयत् ॥
स तदाभ्यर्च्य दैत्येन्द्रं त्रैलोक्यपतिरीश्वरः ।
असुरेन्द्रमुपामन्त्र्य जगाम स्वं निवेशनम् ॥

मोक्षधर्मे शक्रप्रह्लादसंवादः ।

युधिष्ठिर उवाच ।

यया बुद्ध्या महीपाल भ्रष्टश्रीर्विचरेन्महीम् ।
कालदण्डविनिष्पिष्टस्तन्मे ब्रूहि पितामह ॥

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
वासवस्य च संवादं बलेर्वैरोचनस्य च ॥
पितामहमुपागम्य प्रणिपत्य कृताञ्जलिः ।
सर्वानेवासुरान् जित्वा बलिं पप्रच्छ वासवः ॥
यस्य स्म ददतो वित्तं न कदाचन हीयते ।
तं बलिं नाधिगच्छामि ब्रह्मन्नाचक्ष्व मे बलिम् ॥
स वायुर्वरुणश्चैव स रविः स च चन्द्रमाः ।
सोऽग्निस्तपति भूतानि जलञ्च सभवत्युत ॥
तं वलिं नाधिगच्छामि ब्रह्मन्नाचक्ष्व मे बलिम् ।

ब्रह्मोवाच ।

नैतत्ते साधु भगवन् यदेनमनुपृच्छसि ।
पृष्टस्तु नानृतं ब्रूयात्तस्माद्वच्यामि ते बलिम् ॥
उष्ट्रेषु यदि वा गोषु खरेष्वश्वेषु वा पुनः ।
वरिष्ठो भविता जन्तुः शून्यागारं शचीपते ॥

शक्र उवाच ।

यदि स्म बलिना ब्रह्मन् शून्यागारे समेयिवान् ।
हन्यामेतं न वा हन्यां तद् ब्रह्मन्ननुशाधि माम् ॥

ब्रह्मोवाच ।

मा स्म शक्र बलिं हिंसीर्मा बलिर्वधमर्हति ।
न्यायस्तु शक्र प्रष्टव्यस्त्वया वासव काम्यया ॥

भीष्म उवाच ।

एवमुक्तो भगवता महेन्द्रः पृथिवीं तदा ।
चचारैरावतस्कन्धमधिरुह्य श्रिया वृतः ॥
ततो ददर्श स बलिं खरवेषेण संवृतम् ।
यथाख्यातं भगवता शून्यागारकृतालयम् ॥

शक्र उवाच ।

खरयोनिमनुप्राप्तस्तुषभक्षोऽसि दानव ।
इयन्ते योनिरधमा शोचस्याहो न शोचसि ॥
अदृष्टं बत पश्यामि द्विषतां वशमागतम् ।
श्रिया विहीनं मित्रैश्च भ्रष्टवीर्यपराक्रमम् ॥
तत्तद्यानसहस्रैस्त्वं ज्ञातिभिः परिवारितः ।
लोकान् प्रतापयन् सर्वान् यास्यस्मान् वितर्कयन् ॥
त्वन्मुखाश्चैव दैतेया व्यतिष्ठंस्तव शासने ।
अकृष्टपच्या च मही तवैश्वर्ये बभूव ह ॥
इदं च तेऽद्य व्यसनं शोचस्याहो न शोचसि ।
यदाऽतिष्ठः समुद्रस्य पूर्वकूले विलेलिहन् ॥
ज्ञातिभ्यो विभजन् वित्तं तदासीत्ते मनः कथम् ।
यत्ते सहस्रसमिता ननृतुर्देवयोषितः ॥
छत्रं तवासीत् सुमहत् सौवर्णं रत्नभूषितम् ।
यूपस्तवासीत् सुमहान् सौवर्णो यजतस्तव ॥
यत्राददः सहस्राणि अयुतानां गवां दश ।
न ते पश्यामि भृङ्गारं न छत्रं व्यजनञ्च च ॥
ब्रह्मदत्तां च ते मालां न पश्याम्यसुराधिप ।

बलिरुवाच।

न त्वं पश्यसि भृङ्गारं न छत्रं व्यजनं न च।
ब्रह्मदत्तां च मे मालां न त्वं पश्यसि वासव॥
गुहायां निहितानि त्वं मम रत्नानि पृच्छसि।
यदा मे भविता कालस्तदा त्वं तानि द्रक्ष्यसि॥
न त्वेतदनुरूपं ते यशसो वा कुलस्य वा।
समृद्धार्थो समृद्धार्थं यन्मां कथयितुमिच्छसि॥
न हि दुःखेषु शोचन्ते न प्रहृष्यन्ति चर्द्धिषु।
कृतप्रज्ञा ज्ञानतृप्ताः चान्ताः सन्तो मनीषिणः॥
त्वं तु प्रकृतया बुद्ध्या पुरन्दर विकत्थसे।
यदाहमिव भावी स्यास्तदा नैवं वदिष्यसि॥

भीष्म उवाच।

पुनरेव तु तं शक्रः प्रहसन्निदमब्रवीत्।
निश्वसन्तं यथा नागं प्रत्याहाराय भारत॥

शक्र उवाच।

यज्जघान सहस्रेण ज्ञातिभिः परिवारितः।
लोकान् प्रतारयन् सर्वान् पाश्यस्मान् वितर्कयन्॥
दृष्ट्वा सुकृपणां चेमामवस्थामात्मनो बले।
ज्ञातिमित्रपरित्यक्तः शोचस्याहो न शोचसि॥
प्रीतिं प्राप्यातुलां पूर्वं लोकांश्चात्मवशे स्थितान्।
विनिपातमिमं चाद्य शोचस्याहो न शोचसि॥

बलिरुवाच।

अनित्यमुपलक्ष्येऽहं कालपर्यायधर्मतः।
तस्माच्छक्र न शोचामि सर्वं ह्येवेदमन्तवत्॥

अन्तवन्त इमे देहा भूतानां च सुराधिप ।
तेन शक्र न शोचामि नापराधादिदं मम ॥
जीवितं च शरीरं च जात्यैव सह जायते ।
उभे सह विवर्द्धेते उभे सह विनश्यतः ॥
तदीदृशमहं भावमवशः प्राप्य केवलम् ।
यदेवमभिजानामि का व्यथा मे विजानतः ॥
भूतानां निधनं निष्ठा स्रोतसामिव सागरः ।
नैतत् सम्यग्विजानन्तो नरा मुह्यन्ति वज्रधृक् ॥
ये त्वेवं नाभिजानन्ति रजोमोहपरायणाः ।
ते कृच्छ्रं प्राप्य सीदन्ति बुद्धिर्येषां विनश्यति ॥
बुद्धिलाभात्तु पुरुषः सर्वं नुदति किल्बिषम् ।
विपाप्मा लभते सत्त्वं सत्त्वस्थः संप्रसीदति ॥
ततस्तु ये निवर्त्तन्ते जायन्ते वा पुनः पुनः ।
कृपणाः परितप्यन्ति तैरार्थैरभिनोदिताः ॥
यस्तु शचीवंशस्यस्य शक्तोऽपि कुरुते दयाम् ।
हस्तप्राप्यस्य वीरस्य तच्चैव पुरुषं विदुः ॥
अनिश्चयो हि युद्धेषु द्वयोर्विवदमानयोः ।
एकः प्राप्नोति विजयमेकश्चैव पराजयम् ॥
सुखदुःखे हि पुरुषः पर्यायेनाधिगच्छति ।
पर्यायेनासि शक्रस्त्वं प्राप्तः शक्र न कर्मणा ॥
कालः काले नयति मां त्वाञ्च कालो नयत्ययम् ।
न मातृपितृशुश्रूषा न च दैवतपूजनम् ॥
नान्यो गुणसमाचारः पुरुषस्य सुखावहः ।
न विद्या न तपो दानं न मित्राणि न बान्धवाः ॥

अशक्नुवन्ति परित्रातुं नरं कालेन पीडितम्।
न गामिनमनर्थं हि प्रतिघातशतैरपि॥
अशक्नुवन्ति परिश्योदुद्धृते बुद्धिबलं नराः।
अर्थसिद्धिमनर्थं च जीवितं मरणं तथा॥
सुखदुःखफलं चैव न द्वेष्मि न च कामये।
हन्तं हन्ति हतो ह्येव यो नरो हन्ति कञ्चन॥
उभौ तौ न विजानीतो यश्च हन्ति हतश्च यः।
हत्वा जित्वा च मघवन् यः कश्चित् पुरुषायते॥
अकर्त्ता ह्येव भवति कर्त्ता त्वेन करोति तत्।
को हि लोकस्य कुरुते विनाशप्रभवावुभौ॥
कृतं हि तत्कृतेनैव कर्ता तस्यापि चापरः।
महाविद्योऽल्पविद्यश्च बलवान् दुर्बलस्तथा॥
दर्शनीयो विरूपश्च सुभगो दुर्भगश्च यः।
सर्वं कालः समादत्ते गम्भीरः स्वेन तेजसा॥
तस्मिन् काले च संप्राप्ते का व्यथा मे विजानतः।
दग्धमेवानुदहति हतमेवानुहन्यते॥
नश्यते नष्टमेवाग्रे लब्धव्यं लभते नरः।
नास्य द्वीपः कुतः पारं नावारः संप्रदृश्यते॥
नोत्तमस्य प्रपश्यामि विधेर्दिव्यस्य चिन्तयन्।
यदि ते पश्यतः कालो भूतानि न विनाशयेत्॥
स्यान्मे हर्षश्च दर्पश्च क्रोधश्चैव शचीपते।
तुषभक्षन्तु मां ज्ञात्वा प्रविविक्तजने गृहे॥
विभ्रन्त गार्दभं रूपमागत्य परिगर्हसे।
इच्छन्नहं विकुर्यां हि रूपाणां बहुधात्मनः॥

विभीषणानि पानीच्य पलायेथास्त्वमेव मे ।
कालः सर्वं समादत्ते कालः सर्वं प्रयच्छति ॥
कालेन विहितं सर्वं मा कृथाः शक्र पौरुषम् ।
पुरा सर्वं प्रव्यथितं मयि क्रुद्धे पुरन्दर ॥
नमस्तस्यै दिशेऽप्यस्तु यस्यां वैरोचनो बलिः ।
इति मामभ्यपद्यन्त बुद्धिमात्सर्यमाश्रिताः ॥
नाहं तदनुशोचामि नात्मभ्रंशं शचीपते ।
एवं मे निश्चिता बुद्धिः शास्तुस्तिष्ठाम्यहं वशे ॥
दृश्यते हि कुले जातो दर्शनीयः प्रतापवान् ।
दुःखं जीवन्सहामात्यो भवितव्यं हि तत्तथा ॥
कल्याणरूपसंपन्नो दुर्भगः शक्र दृश्यते ।
अलक्षणो विरूपश्च सुभगो दृश्यते परः ॥
नैतदस्य कृतं शक्र नैतच्छक्र त्वया कृतम् ।
यत्त्वमेवं गतो वज्रिन् यच्चाप्येवं गता वयम् ॥
न कर्म भवताऽप्येतत् कृतं मम शतक्रतो ।
ऋद्धिर्वाऽप्यथवानर्द्धिः पर्यायकृतमेव तत् ॥
पश्यामि त्वा विराजन्तं देवराजमवस्थितम् ।
श्रीमन्तं द्युतिमन्तं च गर्जमानं ममोपरि ॥
एवं नैतन्न मे कालो ममाक्रम्य स्थितो भवान् ।
पातयेयमहं त्वाद्य सवज्रमपि मुष्टिना ॥
न तु विक्रमकालोऽयं क्षमाकालोऽयमागतः ।
कालः स्थापयते सर्वं कालः पचति वै तदा ॥
मां चेदभ्यागतः कालो दानवेश्वरपूजितम् ।
गर्जन्तं प्रतपन्तं च कमन्यं नागमिष्यते ॥

द्वादशानान्तु भवतामादित्यानां महात्मनाम् ।
तेजांस्येकेन सर्वेषां देवराजभृतानि मे ॥
अहमेव ददाम्यापो विसृजामि च वासव ।
तपामि चैव त्रैलोक्यं विद्योताम्यहमेव च ॥
संरक्षामि विलुम्पामि ददाम्यहमथाददे ।
संयच्छामि नियच्छामि लोकेषु प्रभुरीश्वरः ॥
तदद्य वै निवृत्तं मे प्रभुत्वममराधिप ।
कालसैन्यावगाढस्य सर्वन्न प्रतिभाति मे ॥
नाहं कर्त्ता न चैव त्वं नान्यः कर्त्ता शचीपते ।
पर्यायेण हि भुज्यन्ते लोकाः शक्र यदृच्छया ॥
बहूनीन्द्र सहस्राणि समतीतानि वासव ।
बलवीर्योपपन्नानि यथैव त्वं शचीपते ॥
त्वामप्यतिबलं शक्र देवराजं बलोत्कटम् ।
प्राप्ते काले महावीर्यः कालः संशमयिष्यति ॥
य इदं सर्वमादत्ते तस्माच्छक्र स्थिरो भव ।
मया त्वया च पूर्वैश्च न स शक्यो निवर्त्तितुम् ॥
यामेतां प्राप्य जानीषे राज्यश्रियमनुत्तमाम् ।
स्थिता मयीति तन्मिथ्या नैषा ह्येकत्र तिष्ठति ॥
स्थिता हीन्द्रसहस्रेषु त्वद्विशिष्टतमेष्वियम् ।
माञ्च लोला परित्यज्य त्वामगाद्विबुधाधिप ॥
नैवं शक्र पुनः कार्षीः शान्तो भवितुमर्हसि ।
त्वमप्येवंविधं ज्ञात्वा क्षिप्रमन्यं गमिष्यति ॥

मोक्षधर्मे बलिवासवसंवादः ।

भीष्म उवाच ।

अनिर्वार्येण शोकेन शरीरं चोपतप्यते ।
अमित्राश्च प्रहृष्यन्ति शोके नास्ति सहायता ॥
तस्माच्छक्र न शोचामि सर्वं ह्येवेदमन्तवत् ।
सन्तापाद्भ्रश्यते रूपं संतापाद्भ्रश्यते श्रियः ॥
संतापाद्भ्रश्यते चायुर्धर्मश्चैव सुरेश्वर ।
विनीय खलु तद्दुःखमागतं वैमनस्यजम् ॥
ध्यातव्यं मनसा हृद्यं कल्याणं स विजानता ।
यदा यदा हि पुरुषः कल्याणे कुरुते मनः ॥
तदा तस्य प्रसिध्यन्ति सर्वाकामा न संशयः ।

एकः शास्ता न द्वितीयोऽस्ति शास्ता
गर्भे शयानं पुरुषं शास्ति शास्ता ।
तेनानुशिष्टः प्रवणादिवोदकं
यथा नियुक्तोऽस्मि तथा करोमि ॥

यथा यथास्य प्राप्तव्यं प्राप्नोत्येव तथा तथा ।
भवितव्यं यथा यच्च भवत्येव तथा तथा ॥
यत्र यत्रैव संयुक्तो धाता गर्भे पुनः पुनः ।
तत्र तत्रैव वसति न यत्र स्वयमिच्छति ॥
भावो योऽयमनुप्राप्तो भवितव्यमिदं मम ।
इति यस्य सदा भावो न स मुह्येत्कदाचन ॥
पर्यायैर्हन्यमानानामभियोक्ता न विद्यते ।
दुःखमेतत्त्वयं द्वेष्टा कर्त्ताऽहमिति मन्यते ॥
ऋषींश्च देवांश्च महासुरांश्च त्रैविद्यवृद्धांश्च महामुनींश्च ।
कालापदो नोपनयन्ति लोके परापरज्ञा हि न संभ्रमन्ति ॥

न पण्डितः क्रुध्यति नापि सज्जते न चापि संसीदति न प्रहृष्यति ।
न चार्थकृच्छ्राद्व्यसनेषु शोचते स्थितः प्रकृत्या हिमवानिवाचलः ॥
यमर्थसिद्धिः परमा न हर्षयेत्तथैव कालव्यसनं न हर्षयेत् ।
सुखं च दुःखं च तथैव मध्यमं निषेवते यः स धुरन्धरो नरः ॥
यां यामवस्थां पुरुषोऽधिगच्छति तस्यां रमेतापरितप्यमानः ।
एवं प्रवृद्धं प्रणुदन्मनोजम्सन्तापमायासकरं शरीरात् ॥
न मन्त्रबलवीर्येण प्रज्ञया पौरुषेण च ॥
न शीलेन न वृत्तेन तथा नैवार्थसंपदा ।
अलभ्यं लभ्यते मर्त्यस्तत्र का परिदेवना ॥
यदेवमनुजातस्य धातारो विदधुः पुरा ।
तदेवानुचरिष्यामि किं मे मृत्युः करिष्यति ॥
लब्धव्यान्येव लभते गन्तव्यान्येव गच्छति ।
प्राप्तव्यान्येव प्राप्नोति दुःखानि च सुखानि च ॥
एतद्विदित्वा कार्त्स्न्येन यो न मुह्यति मानवः ।
कुशली सर्वदुःखेषु स वै सर्वधनो नरः ॥

इति शक्रनमुचिसंवादः ।

भीष्म उवाच ।

पुत्रदारैः सुखैश्चैव विमुक्तस्य धनेन वा ।
मग्नस्य व्यसने कृच्छ्रे धृतिः श्रेयस्करी नृप ॥
धैर्येण युक्तं सततं शरीरं न व्यशीर्यते ।
विशोकता शुभं धत्ते चारोग्यमुत्तमम् ॥
आरोग्याच्च शरीरस्य स पुनर्विन्दते श्रियम् ।
यश्च प्राज्ञो नरस्तात सात्विकीं वृत्तिमाश्रितः ॥
तस्यैश्वर्यं च धैर्य्यं च व्यवसायश्च कर्मसु ।

वेदज्ञानि द्वयान्याहुः प्रवत्कृणीतराणि च ॥
प्रवत्कृणि विशिष्टानि सर्वधर्मोपधारणात् ।
सधर्म्माः साखिला वेदाः प्रवत्कृभ्यो विनिःसृताः ॥
प्रवत्कृणि द्वयान्याहुरात्मज्ञानीतराणि च ।
आत्मज्ञानि विशिष्टानि जन्मजन्मोपधारणात् ॥
धर्मद्वयं हि यो वेद स धर्मज्ञः स धर्मवित् ॥
ज्ञानवानेव कर्माणि कुर्वन् सर्वं च सिद्ध्यति ।
एषा पूर्वतरा वृत्तिर्ब्राह्मणस्य विधीयते ॥
तत्र चेद् विधिः सोऽस्याद् ज्ञानं चेत्पुरुषं प्रति ।
उपपत्त्युपलब्धिभ्यां वर्णयिष्यामि तच्छृणु ॥
पौरुषं कारणं केचिदाहुः कर्मसु मानवाः ।
दैवमेके प्रशंसन्ति स्वभावमपरे जनाः ॥
पौरुषं कर्म दैवन्तु फलवृत्तिस्वभावतः ।
त्रयमेतत्पृथग्भूतमविवेकन्तु केचन ॥
एतद्देवं च नैवंच न चोभे नानुभे तथा ।
कर्मस्था विप्र यं ब्रूयुः सत्वस्थाः समदर्शिनः ॥
आरम्भयज्ञाः क्षत्राश्च हविर्यज्ञा विशः स्मृताः ।
परिचारयज्ञाः शूद्राश्च जपयज्ञा द्विजातयः ॥
परिनिष्ठितकार्यं हि स्वाध्यायेन द्विजो भवेत् ।
कुर्यादन्यं न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥
त्रेतादौ केवला वेदा यज्ञा वर्णाश्रमास्तथा ।
संरोधादायुषस्त्वेष तत्राधर्मेण पीडिताः ॥
गवां भूमेश्च ये चापामोषधीनां च ये रसाः ।
अधर्मान्तर्हिता वेदा यज्ञा वर्णाश्रमास्तथा ॥

विक्रियन्ते स्वधर्मस्थाः स्थावराणि चराणि च ।
नान्यत्र विद्या तपसो नान्यत्रेन्द्रियनिग्रहात् ॥
नान्यत्र सर्वसन्त्यागात्सिद्धिं विन्दति कश्चन ।
विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ॥
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ।
स हि सर्वेषु भूतेषु जङ्गमेषु ध्रुवेषु च ॥
वसत्येको महानात्मा येन सर्वमिदं ततम् ।
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ॥
यदा पश्यति भूतात्मा ब्रह्म संपद्यते तदा ।
यावानात्मनि वेदात्मा तावानात्मा परात्मनि ॥
य एवं सततं वेद सोऽमृतत्वाय कल्पते ।
सर्वभूतात्मभूतस्य सर्वभूतहितस्य च ॥
देवापि मार्गे मुह्यन्ति अपदस्य पदैषिणः ।
शकुन्तानामिवाकाशे मत्स्यानामिव चोदके ॥
यथा गतिर्न दृश्येत तथा ज्ञानविदां गतिः ।
कालः पिबति भूतानि सर्वाण्येवात्मनात्मनि ॥
यस्मिंस्तु पच्यते कालस्तं वेदेह न कश्चन ।
अक्षरं च क्षरं चैव द्वैधीभावो ऽयमात्मनः ॥
क्षरः सर्वेषु भूतेषु दिव्यं त्वमृतमक्षरम् ।
नवद्वारं पुरं गत्वा हंसो हि नियतं वशी ॥
दिशः सर्वस्य भूतस्य स्थावरस्य चरस्य च ।
हंसोक्तं च क्षरं दैव कूटस्थं यत्तदक्षरम् ॥
तद्विद्वानक्षरं प्राप्य जहाति प्राणजन्मनाम् ।

व्यास उवाच ।

पृच्छतस्तव सत्पुत्र यथावदिव तत्वतः ।
सांख्यज्ञानेन संयुक्तं यदेतत्कीर्तितं मया ॥
योगकृत्यं तु ते कृत्स्नं वर्तयिष्यामि तच्छृणु ।
एकत्वं बुद्धिमनसोरिन्द्रियाणां च सर्वशः ॥
आत्मनो व्यापिनस्तात ज्ञानमेतदनुत्तमम् ।
तदेतदनुशान्तेन दान्तेनाध्यात्मशालिना ॥
आत्मारामेण बुद्धेन बोद्धव्यं शुचिकर्मणा ।
भोगदोषान् समुच्छिद्य पञ्च यान् कवयो विदुः ॥
कामं क्रोधं च लोभं च भयं स्वप्नं च पञ्चमम् ।
क्रोधं शमेन जयति कामं संकल्पवर्जनात् ॥
सत्वसंसेवनाद्धीरो निद्रा मुच्छेत्तुमर्हति ।
धृत्या शिश्नोदरं रक्षेत् पाणिपादं च चक्षुषा ॥
चक्षुःश्रोत्रे च मनसा मनो वाचं च कर्मणा ।
अप्रमादाद्भयं जह्याद्दम्भं प्राज्ञोपसेवनात् ॥
एवमेतान्योगदोषान् जयेन्नित्यमतन्द्रितः ।
अग्नींश्च ब्राह्मणांश्चार्चेदेवताः प्रणमेव च ॥
वर्जयेदुशतीं वाचं हिंसायुक्तां मनोनुदाम् ।
ध्यानमध्ययनं दानं सत्यं ह्रीरार्जवं क्षमा ॥
शौचमाचारसंशुद्धिरिन्द्रियाणां च निग्रहः ।
एतैर्विवर्द्धते तेजः पाप्मानं चापकर्षति ॥
सिध्यत्यस्य च सर्वार्था विज्ञानं च प्रवर्द्धते ।
समः सर्वेषु भूतेषु लब्धा लब्धेन वर्त्तयेत् ॥
धूतपाप्मा तु तेजस्वी लघ्वाहारो जितेन्द्रियः ।

कामक्रोधौ वशे कृत्वा निनीषेद् ब्रह्मणः पदम् ॥
मनसश्चेन्द्रियाणां च कृत्वैकाग्र्यं समाहितः ।
पूर्वरात्रापरार्द्धे वा धारयेन्मन आत्मनि ॥
जन्तोः पञ्चेन्द्रियस्यास्य यदेकं छिद्रमिन्द्रियम् ।
ततोऽस्य स्रवति प्रज्ञा दृत्ते पादादिवोदकम् ॥
मनस्तु पूर्वमादद्यात् कूर्मीणामिव मत्स्यहा ।
ततः श्रोत्रं ततश्चक्षुः जिह्वा घ्राणं च योगवित् ।
तत एतानि संयम्य मनसि स्थापयेद्यतिः ॥
यदैतान्यवतिष्ठन्ति मनःषष्ठान्यथात्मनि ।
प्रसीदन्ति च संस्थाप्य तदा ब्रह्म प्रकाशते ॥
विधूम इव दीप्तार्च्चिरादित्य इव दीप्तिमान् ।
विद्युताग्निरिवाकाशे दृश्यतेऽऽत्मा तथात्मनि ॥
सर्वतस्तच्च सर्वं च व्यापकत्वाच्च दृश्यते ।
तं पश्यन्ति महात्मानो ब्राह्मणा ये मनीषिणः ॥
धृतिमन्तो महाप्राज्ञाः सर्वभूतहिते रताः ।
एवं परिमितं कालमाचरन् शंसितव्रतः ॥
आसीनो हि रहस्यैको गच्छेदक्षरसाम्यताम् ।
कुर्यात् परिचयं योगी त्रयैकाख्ये नियतो मुनिः ॥
गिरिशृङ्गे तथा चैत्ये निरुद्विग्नस्थलेषु च ।
एकाग्रं चिन्तयेन्नित्यं योगान्नोद्वेजयेन्मनः ॥
येनोपायेन शक्येत सन्नियन्तुं चलं मनः ।
तं च युक्तो निषेवेत न चैव विचलेत्ततः ॥
एवं स्वस्थात्मनः साधोः सर्वत्र समदर्शिनः ।
षण्मासान्नित्ययुक्तस्य शब्दब्रह्मातिवर्त्तते ॥

एतस्मिन्नियतो मार्गे विरमन्नवमो ह्यितः ।
अपि वर्णावकृष्टस्तु नारीवाधर्मकाङ्क्षिणी ॥
तावप्येतेन मार्गेण गच्छेतां परमां गतिम् ।

शुक उवाच ।

यदिदं वेद वचनं कुरु कर्म्म त्यजेति वा ।
कां दिशं विद्यया यान्ति कां च गच्छन्ति कर्म्मणा ॥
एतद्वै वेत्तुमिच्छामि तद्भवान् प्रब्रवीतु मे ।
एतच्चान्यच्च वैरूप्यो वर्त्तते प्रतिकूलतः ॥

भीष्म उवाच ।

इत्युक्तः प्रत्युवाचेदं पराशरसुतस्तु ताम् ।
कर्मविद्या मयावेतौ व्याख्यास्यामि चराचरौ ॥
यां दिशं विद्यया यान्ति याञ्च गच्छन्ति कर्मणा ।
शृणुष्वैकमना वत्स गह्वरं ह्येतदन्तरम् ॥
अस्ति धर्म्म इति प्रोक्तं नास्तीत्यत्रैव यो वदेत् ।
तस्य पक्षस्य सदृशमिमं मम भवेदथ ॥
द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः ।
प्रवृत्तिलक्षणो धर्मो निवृत्तौ च सुभाषितः ॥
कर्मणा बध्यते जन्तुर्विद्यया तु प्रमुच्यते ।
तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥
कर्मणा जायते प्रेत्य मूर्त्तिमान् षोडशात्मकः ।
कर्म त्वेके प्रशंसन्ति स्वल्पबुद्धिरता नराः ॥
तेन ते देहजालानि रमयन्त उपासते ।
विद्यया जायते नित्यमव्यक्तं ह्यव्ययात्मकम् ॥
येऽस्य बुद्धिं परां प्राप्ताः कर्म्मनैपुण्यदर्शिनः ।

न ते कर्म प्रशंसन्ति कूपं नद्यां पिबन्ति च ॥
कर्मणः फलमाप्नोति सुखदुःखे भवाभवौ।
विद्यया तदवाप्नोति यत्र गत्वा न शोचति ॥
यत्र गत्वा न म्रियते यत्र गत्वा न जायते।
न पुनर्जायते यत्र यत्र गत्वा न वर्त्तते ॥
यत्र तद् ब्रह्म परममध्यात्ममचलं ध्रुवम्।
अव्याकृतमनायासममृतं चापि योगि च ॥
द्वन्द्वैर्न यत्र बाध्यन्ते मानसेन च कर्म्मणा।
समाः सर्वत्र मैत्राश्च सर्वभूतहिते रताः ॥
विद्यामयोऽन्यः पुरुषस्तात कर्ममयोऽपरः।
देवो यः संश्रितस्तस्मिन्नविन्दुरिव पुष्करे ॥
क्षेत्रज्ञं तं विजानीयान्नित्यं योगजितात्मकम्।
तमो रजश्च सत्वं च विद्धि जीवगुणात्मकम् ॥
जीवमात्मगुणां विंद्यादात्मानं परमात्मनः।
सचेतनं जीवगुणं वदन्ति स चेष्टते जीवयते च सर्वम् ॥
ततः परं क्षेत्रविदो वदन्ति प्राकल्पयद्यो भुवनानि सप्त।
विघसाशी भवेन्नित्यं नित्यञ्चामृतभोजनः ॥
अमृतं यज्ञशेषं स्याद्भोजनं हविषा समम्।
भृतशेषं तु योऽश्नाति तमाहुर्विघसाशिनम् ॥
विघसंभृतशेषन्तु यज्ञशेषमथामृतम्।
आचार्यो ब्रह्मलोकेशः प्राजापत्ये पिता प्रभुः ॥
अतिथिस्त्विन्दुलोकस्य देवलोकस्य चर्त्विजः।
जामयोऽप्सरसां लोके वैश्वदेवे तु ज्ञातयः ॥
सम्बन्धिवान्धवा दिक्षु पृथिव्यां मातृमातुलौ।

वृद्धबालातुरकृशास्त्वाकाश्यप्रभविष्णवः ॥
भ्राता ज्येष्ठः समः पित्रा भार्या पुत्रः स्वका तनुः ।
छाया स्वा दासवर्गश्च दुहिता कृपणं परम् ॥
तस्मादेतैरधिक्षिप्तः सहेन्नित्यमसंज्वरः ।
गृहधर्मपरो विद्वान् धर्मशीलो जितक्लमः ॥
तत्वार्थबद्धः कर्माणि धर्मं वा किञ्चिदाचरेत् ।
गृहस्थवृत्तयस्तिस्रस्तासां निश्रेयसं परम् ॥
कुम्भधान्यैरुञ्छशिलैः कापोतीवास्थितैस्तथा ।
यस्मिंश्चैते वसन्त्यर्हास्तद्राष्ट्रमभिवर्द्धते ॥
स्वर्गलोको गृहस्थानामुदारमनसां हितः ।
स्वर्गो विमानसंयुक्तो वेददृष्टः सुपुष्टिदः ॥

व्यास उवाच ।

गृहस्थस्तु यदा पश्येद्वली पलितमात्मनः ।
अपत्यस्यैव चापत्यं वनमेव तदाश्रयेत् ॥
तृतीयमायुषो भागं वानप्रस्थाश्रमे वसेत् ।
तानि चाग्नीन् परिचरेद्यजमानो दिवौकसः ॥
नियतो नियताहारः षष्ठभक्तोऽप्रमत्तकः ।
तदग्निहोत्रं ता गावो वेदाङ्गानि च सर्वशः ॥
अफालकृष्टं व्रीहियवं नीवारं विघसानि च ।
हवींषि संप्रयच्छेत मखेष्वत्रापि पञ्चसु ॥
वानप्रस्थाश्रमेऽप्येताश्चतस्रो वृत्तयः स्मृताः ।
सद्यः प्रक्षालकाः केचित्केचिन्मासिकसंचयाः ॥
वार्षिकं संचयं केचित् केचिद्द्वादशवार्षिकम् ।
कुर्वन्त्यतिथिपूजार्थं यज्ञतन्त्रार्थमेव च ॥

अब्भावकाशा वर्षासु हेमन्ते जलसंश्रयाः।
ग्रीष्मे च पञ्चतपसः शश्वच्छ मितभोजनाः॥
भूमौ विपरिवर्त्तन्ते तिष्ठन्ति प्रपदैरपि।
स्थानासनैर्वर्त्तयन्ति सवनेष्वभिचिन्तने॥
दन्तोलूखलिकाः केचिदश्मकुट्टास्तथा परे।
शुक्लपक्षे पिबन्त्येके यवागूं क्वथितां सकृत्॥
कृष्णपक्षे पिबन्त्यन्ये भुञ्जते वा यथागमम्।
मूलैरेके फलैरेके पुष्पैरेके दृढव्रताः॥
वर्त्तयन्ति यथान्यायं वैखानसगतिं श्रिताः।
एताश्चान्याश्च विविधा दीक्षास्तेषां मनीषिणाम्॥
चतुर्थे चायुषः शेषे वानप्रस्थाश्रमं त्यजेत्।
सद्यस्कारां निरूप्येष्टिं सर्वान्वेदान् सदक्षिणान्॥
आत्मयाजी चात्मरतिरात्मक्रीडात्मसंश्रयः।
आत्मन्यग्नीन् समारोप्य त्यक्त्वा सर्वपरिग्रहान्॥
सद्यस्कांश्च यजेद्यज्ञान् निष्टांश्चैवेह सर्वदा।
त्रींश्चैवाग्नीन्यजेत्सम्यगात्मन्येवात्मनिःसृतात्॥
केशलोमनखान् हृत्वा वानप्रस्थो मुनिस्ततः।
आश्रमादाश्रमं पुण्यं पूतो गच्छति कर्मभिः॥
अभयं सर्वभूतेभ्यो दत्वा यः प्रव्रजेद्द्विजः।
लोकास्तेजोमयास्तस्य प्रेत्य चानन्त्यमश्नुते॥

शुक उवाच।

वर्त्तमानस्तथैवाच वानप्रस्थाश्रमे यथा।
योक्तव्योत्मा कथं शक्त्या वेद्यं चैकाक्षतापरम्॥

व्यास उवाच।

प्राप्य संस्कारमेताभ्यामाश्रमाभ्यां ततः परम्।

यत्कार्ल्यं परमार्थन्तु तदिहैकमनाः शृणु ॥
कषायं याचयित्वा यः श्रेणिस्थानेषु च त्रिषु।
तद्भवानेवमभ्यस्य वर्त्ततां श्रूयतां तथा ॥
एक एव चरेद्धर्मसिध्यर्थमसहायवान्।
एकश्चरति यः पश्यन्न जहाति मह्नीयते ॥
अनग्निरनिकेतश्च ग्राममन्नार्थमाश्रयेत्।
अश्वस्तनविधानः स्यान्मुनिर्भावसमाहितः ॥
लघ्वाशी नियताहारः सकृदन्ननिषेविता।
कपालं वृक्षमूलानि कुचेलमसहायवान् ॥
उपेक्षा सर्वभूतानामेतावद्भिक्षुलक्षणम्।
यस्मिन् वाचः प्राविशन्ति कूपे त्रस्ता द्विपा इव।
न वक्तारं पुनर्यान्ति स कैवल्याश्रमे वसेत् ॥
नैव पश्येन्न शृणुयादवाच्यं जातु कस्यचित्।
ब्राह्मणानां विशेषेण नैव ब्रूयात् कथंचन ॥
यद् ब्राह्मणस्य कुशलं तदेव सततं वदेत्।
तूष्णीमासीत निन्दायां कुर्वन् भैषज्यमात्मनः ॥
येन पूर्णमिवाकाशं भवत्येकेन सर्वदा।
शून्यं येन जनाकीर्णं तद्देवा ब्राह्मणं विदुः ॥
येन केन चिदाच्छन्नो येन केन चिदाशितः।
यत्र क्वचन शायी च तं देवा ब्राह्मणं विदुः ॥
अहेरिव गणाद्भीतः सौहित्यान्नरकादिव।
कुणपादिव च स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः ॥
न क्रुध्येन्न प्रहृष्येच्च मानितो मानितश्च यः।
सर्वभूतेष्वभयदस्तं देवा ब्राह्मणं विदुः ॥

नाभिनन्देत मरणं नाभिनन्देत जीवितम्।
कालमेवं प्रतीक्षेत निदेशं भृतको यथा॥
अनभ्याहतचित्तः स्यादनभ्याहतवान् भवेत्।
निर्युक्तः सर्वपापेभ्यो निरमित्रस्य किं भयम्॥
अभयं सर्वभूतेभ्यो भूतानामभयं यतः।
तस्य मोहाद्विमुक्तस्य भयं नास्ति कुतश्च न॥
यथा नागपदेऽन्यानि पदानि पदगामिनाम्।
सर्वाण्येवापि धीयन्ते पदजातानि कौञ्जरे॥
एवं सर्वमहिंसायां धर्मार्थमपि धीयते।
अमृतः सन्निवसति यो हिंसां न प्रपद्यते॥
अहिंसकः समः सत्यो धृतिमान् संयतेन्द्रियः।
शरण्यः सर्वभूतानां गतिमाप्नोत्यनुत्तमाम्॥
एवं प्रज्ञा न तृप्तस्य निर्भयस्य निराशिषः।
न मृत्युरतिगो भावः स मृत्युमधिगच्छति॥
विमुक्तं सर्वसङ्गेभ्यो मुनिमाकाशवत्स्थितम्।
अस्वमेकचरं शान्तं तं देवा ब्राह्मणं विदुः॥
निराशिषमनारम्भं निर्नमस्कारमस्तुतिम्।
निर्मुक्तबन्धनैः सर्वैस्तं देवा ब्राह्मणं विदुः॥
सर्वाणि भूतानि सुखे वसन्ति सर्वाणि दुःखस्य भृशं त्रसन्ति।
तेषां भयोत्पादनजातखेदः कुर्यान्न कर्माणि हि श्रद्दधानः॥
सर्वात्मानं महात्मानं विधूममिव पावकम्।
तपस्यन्ति महात्मानो ब्राह्मणा ये मनीषिणः॥
यथा पुष्पफलोपेतो बहुशाखो महाद्रुमः।
आत्मनो नाभिजानीते क्व मे पुष्पं क्व मे फलम्।

अन्यो ह्यन्तरात्मास्ति यः सर्वमनुपश्यति ॥
ज्ञानदीपनदीपेन पश्यन्नात्मानमात्मना ।
सर्वतः स्रोतसङ्घोरां नदीं लोकप्रवाहिनीम् ॥
लोभमोहतृणच्छन्नां कामक्रोधसरीसृपाम् ।
सत्यतीर्थानृतक्षोभां क्रोधपङ्कां सरिद्वराम् ॥
अव्यक्तप्रभवां शीघ्रां दुस्तरामकृतात्मभिः ।
प्रतरस्व नदीं बुद्ध्या कामग्राहसमाकुलाम् ॥
संसारसागरगमां योनिपातालदुस्तराम् ।
आत्मजन्मोद्भवां तात जिह्वा वार्त्तां दुरासदाम् ॥
यां तरन्ति कृतप्रज्ञा धृतिमन्तो मनीषिणः ।
तान्तीर्णः सर्वतो मुक्तो विधूतात्मात्मविच्छुचिः ॥
उत्तमां बुद्धिमास्थाय ब्रह्मभूयाद्भविष्यसि ।
सन्तीर्णः सर्वसंसारात् प्रसन्नात्मा विकल्मषः ॥
भूमिष्ठानीव भूतानि पर्वस्थानि शामय ।
अक्रुध्यन्न प्रहृष्यंश्च न नृशंसमतिस्तथा ॥
ततो द्रक्ष्यसि सर्वेषां भूतानां प्रभवाव्ययम् ।
एवं वै सर्वधर्मेभ्यो विशिष्टं मेनिरे बुधाः ॥
धर्मं धर्मविदां श्रेष्ठा मुनयस्तत्त्वदर्शिनः ।
आत्मनो व्यापिनी ज्ञानमिदं पुत्रानुशासनम् ॥
प्रयताय प्रवक्तव्यं हितायानुगताय च ।
आत्मज्ञानमिदं पुण्यं सर्वगुह्यतमं महत् ॥
अब्रवं यदहं तात आत्मसाक्षिकमञ्जसा ।
नैव स्त्री न पुमानेव नैव चेदं नपुंसकम् ॥
अदुःखमसुखं ब्रह्म भूतभव्यभवात्मकम् ।

नैतज्ज्ञात्वा पुमान् स्त्री वा पुनर्भवमवाप्नुते ॥
यथा मतानि सर्वाणि कथितानि मया तव।
तत्प्रीतियुक्तेन गुणान्वितेन पुत्रेण सत्पुत्र दमान्वितेन ॥
पृष्टोऽसि संप्रीतिमता हितार्थं ब्रूयात्सुतस्येह यदुक्तमेतद्।
यदा वायं न बिभ्येति यदा वास्मान्न बिभ्यति ॥
यदा नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा।
यदा न कुरुते भावं सर्वभूतेषु पापकम् ॥
कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा।
कामबन्धनमेवैकं नान्यदस्तीह बन्धनम् ॥
कामबन्धनमुक्तो हि ब्रह्मभूयाय कल्पते।
कामतो मुच्यमानस्तु धूमाभ्रादिव चन्द्रमाः ॥
विरजाः कालमाकाङ्क्षन् धीरो धैर्येण वर्तते।
आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ॥
सकामकामो न तु कामकामः स वै कामात्स्वर्गमुपैति देही।
वेदस्योपनिषत्सत्यं सत्यस्योपनिषद्दमः ॥
दमस्योपनिषद्दानं दानस्योपनिषत्तपः।
तपसोपनिषत्त्यागः त्यागस्योपनिषत्सुखम् ॥
सुखस्योपनिषत्स्वर्गः स्वर्गस्योपनिषच्छमः।
निष्प्रचारं मनः कृत्वा प्रतिष्ठाप्य च सर्वशः ॥
यामयं लभते तुष्टिं सा न शक्या ह्यतोऽन्यथा।
येन तृप्यत्यभुञ्जानो येन तृप्यत्यवित्तवान् ॥
येनास्नेहो बलं धत्ते यस्तं वेद स वेदवित्।
संगुप्तान्यात्मनो द्वाराण्यभिधाय विचिन्तयन् ॥
यो ह्यास्ते ब्राह्मणः शिष्टः स आत्मरतिरुच्यते।

समाश्रिते परे सत्त्वे क्षीणकाममवस्थितम् ॥
सर्वतः सुखमन्वेति वपुश्चन्द्रमसं यथा।
अविशेषाणि भूतानि गुणांश्च बहवो मुनेः ॥
सुखेनापोह्यते दुःखं भास्करेण तमो यथा।
तमतिक्रान्तकर्माणमतिक्रान्तगुणक्षयम् ॥
ब्राह्मणं विषयाश्लिष्टं जरामृत्यू न विन्दतः।

व्यास उवाच।

हृदि कामद्रुमश्चित्रो मोहसंचयसंभवः।
क्रोधमानमहास्कन्धो विधित्सापरिषेचनः ॥
तस्य चाज्ञायमाधारः प्रमादः परिषेचनम्।
सोऽभ्यसूयापलाशो हि पुरादुष्कृतसारवान् ॥
संमोहचिन्ताविटपः शोकशाखोभयाङ्कुरः।
मोहनीभिः पिपासाभिर्लताभिरनुवेष्टितः ॥
उपासते महावृक्षं खलु ध्वांस्तं फलेप्सवः।
आयासैः संयताः पाशैः फलदं परिवेष्ट्य तम् ॥
यस्तान् पाशान् वशे कृत्वा तं वृक्षमपकर्षति।
गतः स दुःखयोरन्तं त्यजमानस्तयोर्द्वयोः ॥
आरोहत्यकृतप्रज्ञः सन्तापेन हि पादपम्।
स तमेव ततो हन्ति विषग्रन्थिरिवातुरम् ॥
तस्यानुगतमूलस्य मूलमुद्धृयते बलात्।
योगप्रसादात् कृतिना साम्येन परमासिना ॥
एवं यो वेद कामस्य केवलस्य निवर्तनात्।
वधं वै कामशास्त्रस्य स सुखान्यभिवर्त्तते।
दुष्टापूर्त्तादसाधूनां द्विगुणा जायते प्रजा।

लुब्धेभ्यो जायते लुब्धः समेभ्यो जायते समः ॥
यज्ञाद्यज्ञा प्रभवति नभसोऽम्भ इवामलम् ।
अग्नौ प्रास्ताहुतिर्ब्रह्मन्नादित्यमुपगच्छति ॥
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ।
यथा सर्वरसैस्तृप्ते नाभिनन्दति किंचन ॥
प्रक्ष्मानः फलं यज्ञे न यजेरन् कथञ्चन ।
जायतेऽसाधवो धूर्त्ता लुब्धा वित्तप्रयोजनाः ॥
ब्राह्मं वेदमधीयन्तस्तोषयन्त्यमरानपि ।
अखिलं दैवतं सर्वं ब्रह्म ब्रह्मणि संश्रितम् ॥
नैव ते स्वर्गमिच्छन्ति न यजन्ति यशोधनैः ।
सतां वर्त्मानुवर्त्तन्तो यजन्ते त्वविहिंसया ॥

इति मोक्षधर्मे शुकानुप्रश्नः ।

चिरकारिषु धीरेषु गुणोद्देश्य समाश्रयान् ।
चिरेण मित्रं बध्नीयाच्चिरेण च कृतं त्यजेत् ॥
चिरेण हि कृतं मित्रं चिरन्धारणमर्हति ।
रागे दर्पे च माने च द्रोहे पापे च कर्मणि ॥
अप्रिये चैव कर्त्तव्ये चिरकारी प्रशस्यते ।
बन्धूनां सुहृदाञ्चैव भृत्यानां स्त्रीजनस्य च ॥
अव्यक्तेष्वपराधेषु चिरकारी प्रशस्यते ।
एवं सर्वेषु कार्येषु विमृश्य पुरुषस्ततः ॥
चिरेण निश्चयं कृत्वा चिरं न परितप्यते ।
चिरं धारयते रोषं चिरं कर्म नियच्छति ॥
पश्चात्तापकरं कर्म न किञ्चिदुपपद्यते ।

चिरं वृद्धानुपासीत चिरमन्वास्य पूजयेत् ॥
चिरं धर्म्मं निषेवेत कुर्याच्चान्वेषणं चिरम् ।
चिरमन्वास्य विदुषश्चिरं शिष्टान्निषेव्यच ॥
चिरं विनीय चात्मानं चिरं यात्यनवज्ञताम् ।
ब्रुवतश्च परस्यापि वाक्यं धर्मोपसंहितम् ॥
चिरं पृष्टोऽपि च ब्रूयाच्चिरं न परितप्यते ।
चिरकारी हि मेधावी नापराध्यति कर्मसु ॥
चिरकारी महाप्राज्ञो गौतमस्याभवत्सुतः ।
चिरेण सर्वकार्याणि विमृश्यार्थान्प्रपद्यते ॥
चिरं सञ्चयत्यर्थांश्चिरं जाग्रंश्चिरं स्वपन् ।
चिरं कार्याभिपन्नस्य चिरकारी तथोच्यते ॥
व्यभिचारे तु कस्मिंश्चिद्व्यतिक्रम्याऽपरान् सुतान् ।
पित्रोक्तः कुपितेनाथ जहीमां जननीमिति ॥
स चिरेण तथोक्त्वा च स्वभावाच्चिरकारिकः ।
विमृश्य चिरकारित्वाच्चिन्तयामास वै चिरम् ॥
पितुराज्ञां कथं कुर्मं न हन्यां मातरं कथम् ।
पितुराज्ञापरो धर्मः स्वधर्मो मातृलक्षणम् ॥
अस्वतन्त्रं च पुत्रत्वं किं तु मां मानुपीडयेत् ।
स्त्रियं हत्वा मातरं च को हि जातु सुखी भवेत् ।
पितरं वाप्यवज्ञाय कः प्रतिष्ठामवाप्नुयात् ॥
मुच्यते बन्धनात् पुष्पं फलं वृन्तात्प्रमुच्यते ।
क्लिश्यन्नपि सुतस्नेहैः पिता पुत्रं न मुञ्चति ॥
एवं विचिन्तितं तावत्पुत्रस्य पितृगौरवम् ।
पिता ह्यल्पतरं स्थानं चिन्तयिष्यामि मातरम् ॥

यो ह्ययं मम सञ्जातो मर्त्त्यत्वे यावभौतिकः ।
अस्य मे जननीहेतुः पावकस्य यथारणिः ॥
मातृदेहारणिः पुंसां सर्वस्यार्त्तस्य निर्वृतिः ।
श्रिया हीनोऽपि यो गेहमवेति प्रतिपद्यते ॥
पुत्रपौत्रोपपन्नोऽपि जननीं यः समाश्रितः ।
अपि वर्षशतस्यान्ते सद्विहाय नवच्चरेत् ॥
समर्थं वा ऽसमर्थं वा कृशं वाप्यथवाऽकृशम् ।
रक्षत्येव सुतं माता नान्यः पोष्टा विधानतः ॥
तदा सवृद्धो भवति तदा भवति दुःखितः ।
तदा शून्यं जगत्तस्य यदा मात्रा वियुज्यते ॥
कुक्षिसंधारणाद्धात्री जननाज्जननी स्मृता ।
अङ्गानां वर्द्धनादम्बा वीरसूत्वेन वीरसूः ॥
स्त्रिया हि परमो भर्ता दैवतं परमं स्मृतम् ।
नापराधोऽस्ति नारीणां नर एवापराध्यति ॥
सर्वकार्यापराध्यत्वान्नापराध्यति चाङ्गना ।
एवं विमृशतस्तस्य चिरकारितया बहु ॥
दीर्घः कालो व्यतिक्रान्तस्ततोऽस्याभ्यागमत्पिता ।
मेधातिथिर्महाप्राज्ञो गौतमस्तपसि स्थितः ॥
विमृश्य तेन कालेन पत्न्याः संस्था व्यतिक्रमम् ।
सोऽब्रवीद्भृशसन्तप्तो दुःखेनाश्रूणि वर्त्तयन् ॥
श्रुतधैर्य्यप्रभावेन पश्चात्तापमुपागतः ।
आश्रमं मम संप्राप्तस्त्रिलोकेशः पुरन्दरः ॥
अतिथिव्रतमास्थाय ब्राह्मणं रूपमास्थितः ।
स मया सांत्वितो वाग्भिः स्वागतेनाभिपूजितः ॥

अर्घ्यं पाद्यं यथान्यायं मया च प्रतिपादितः ।
परवानस्मि वेत्युक्तः प्रणायिष्यति तेन च ॥
अत्र वा कुशले जातस्त्रिया नास्ति व्यतिक्रमः ।
एवं न स्त्री न चैवाहं नाध्वगस्त्रिदशेश्वरः ॥
अपराध्यति धर्मस्य प्रमादस्त्वपराध्यति ।
ईर्ष्याजं व्यसनं प्राहुस्तेन चैवोर्द्धरेतसः ॥
ईर्ष्यया त्वहमाक्षिप्तो मग्नो दुष्कृतसागरे ।
हत्वा साध्वीं च नारीं च व्यसनित्वाच्च वासिताम् ॥
भर्त्तव्यत्वेन भर्त्ता च को नु मां तारयिष्यति ।
अन्तरेण मयाज्ञप्तश्चिरकारीत्युदारधीः ॥
यद्यद्य चिरकारी स्यात्स मां त्रायेत किल्बषात् ।
चिरकारिक भद्रं ते भद्रं ते चिरकारिक ॥
यद्यद्य चिरकारी त्वं ततोऽसि चिरकारिकः ।
त्राहि मां मातरं चैव तपो यच्चार्ज्जितं मया ॥
आत्मानं पातकेभ्यश्च भवाद्य चिरकारिकः ।
सहजं चिरकारित्वमतिप्रज्ञतया तव ॥
सफलं ते तथा तेऽस्तु भवाद्य चिरकारिक ।
एवं स गौतमो राजन् महर्षिर्दुःखितस्तदा ॥
चिरकारिं ददर्शाथ पुत्रं स्थितमथान्तिके ।
चिरकारी तु पितरं दृष्ट्वा परमदुःखितः ॥
शस्त्रं त्यक्त्वा ततो मूर्द्ध्ना प्रसादायोपचक्रमे ।
गौतमस्तं ततो दृष्ट्वा शिरसा पतितं भुवि ॥
पत्नीं वै वनिगकारां परामभ्युपगमन्मुदम् ।
नहिसन्ति न संभेदं पत्नीला महात्मनः ॥

विजने चाश्रमस्थेन पुत्त्रश्चापि समाहितः।
ततः पित्रा चिरं स्तुत्वा चिरश्चाघ्राय मूर्द्धनि॥
चिरं दोर्भ्यां परिष्वक्तश्चिरं जीवेत्युदाहृतः।
एवं स गौतमः पुत्त्रं प्रीतिहर्षसमन्वितः॥
अभिनन्द्य महाप्राज्ञः स्त्रिया सह परन्तप।
उपास्य वहुलास्तस्मिन्नाश्रमे सुमहातपाः॥
समाः स्वर्गगतो विप्रः पुत्त्रेण सहितस्तदा।
मोक्षधर्मे चिरकारिकोपाख्यानं नाम॥

इति श्रीभक्तिसागरे परमार्थनिरूपणे शक्रप्रह्लादसंवाद-बलिवासवसंवाद-शक्रनमुचिसंवाद-शुकानुप्रश्न चिरकारिकोपाख्याननिरूपणनाम सप्तमस्तरङ्गः।

भीष्म उवाच।

ईश्वरोयं सततं देही नृपते पुण्यपापयोः।
ततो ज्ञानसमुत्थेन तमसा रुध्यतेऽपि च॥
यथाञ्जनमयो वायुः पुनर्मानः शिलं रजः।
अनुप्रविश्य तद्वर्णो दृश्यते रञ्जयन् दिशः॥
तथा कर्मफलैर्देही रञ्जितस्तमसा वृतः।
विवर्णो वर्णमाश्रित्य देहेषु परिवर्त्तते॥
ज्ञानेन हि सदा जन्तुरज्ञानप्रभवं तमः।
व्यपोहति तदा ब्रह्म प्रकाशति सनातनम्॥
अत्राप्युदाहरन्तीममितिहासं पुरातनम्।
अस्मिन्नर्थे पुरा गीतं शृणुष्वैकमना नृप।
यथा दैत्येन वृत्रेण भ्रष्टैश्वर्येण चेष्टितम्॥
निर्जितेनासहायेन हृतराज्येन भारत।

अशोचतो शत्रुमध्ये बुद्धिमास्थाय केवलम् ॥
भ्रष्टैश्वर्यं पुरावृत्तमुशना वाक्यमब्रवीत् ।
कच्चित्पराजितस्याद्य न व्यथा तेऽस्ति दानव ॥

वृत्र उवाच ।

सत्येन तपसा चैव विदित्वा संशयं ह्यहम् ।
न शोचति न हृष्यामि भूतानामागतिं गतिम् ॥
कालसञ्चोदिता जीवा मज्जन्ति नरकेऽवशाः ।
परितुष्टानि सर्वाणि दिव्यान्याहुर्मनीषिणः ॥
क्षपयित्वा तु तत्कालं गणितं कालनोदिताः ।
सावशेषेण कालेन सम्भवन्ति पुनः पुनः ॥
तिर्यग्योनिसहस्राणि गत्वा नरकमेव च ।
निर्गच्छन्त्यवशा जीवाः कामबन्धनबन्धनाः ॥
एवं संसरमाणांश्च जीवानहमदृष्टवान् ।
यथा कर्म तथा लाभ इति शास्त्रानुशासनम् ॥
तिर्यग्गच्छन्ति नरकं मानुष्यं दैवमेव च ।
सुखे दुःखे प्रिये द्वेष्ये चरित्वा पूर्वमेव च ॥
कृतान्तविधिसंयुक्तः सर्वो लोकः प्रपद्यते ।
गतं गच्छन्ति चाध्वानं सर्वभूतानि सर्वदा ॥
कालसंख्यानसंख्यातं सृष्टिस्थितिपरायणम् ।
तं भाषमाणं भगवानुशना प्रत्यभाषत ॥
धीमन्दुष्टप्रलापांस्त्वं तात कस्मात्प्रभाषसे ।

वृत्र उवाच ।

प्रत्यक्षमेतद्भवतस्तथान्येषां मनीषिणाम् ।
मया यज्जयलुब्धेन पुरा तप्तं महत्तपः ॥

गन्धानादाय भूतानां रसांश्च विविधानपि।
अवर्द्धंस्त्रीन्समाक्रम्य लोकान् वै स्वेन तेजसा ॥
ज्वालामालापरिक्षिप्तो वैहायसचरस्तथा।
अजेयस्सर्वभूतानामसन्नित्यमपेतभीः ॥
ऐश्वर्यं तपसा प्राप्तं भ्रष्टं तच्च स्वकर्मणा।
धृतिमास्थाय भगवन्नशोचामि ततस्त्वहम् ॥
युयुत्सुना महेन्द्रेण पुरा सार्द्धं महात्मना।
ततो मे भगवान् दृष्टो हरिर्नारायणः प्रभुः ॥
नूनं तु तपसस्तस्य सावशेषं ममास्ति वै।
यदहं प्रष्टुमिच्छामि भगवन् कर्मणः फलम् ॥
ऐश्वर्यं वै महद् ब्रह्म वर्णे कस्मिन् प्रतिष्ठितम्।
निवर्त्तते वापि पुनः कथमैश्वर्यमुत्तमम् ॥
कस्माद् भूतानि जीवन्ति प्रवर्त्तन्ते यथा पुनः।
किं वा फलं परं प्राप्य जीवस्तिष्ठति शाश्वतः ॥
केन वा कर्मणा शक्यमथ ज्ञानेन केन वा।
तदवाप्तुं फलं विप्र तन्मे व्याख्यातुमर्हसि ॥
इतीदमुक्तः स मुनिस्तदानीं प्रत्याह यत्तच्छृणु राजसिंह।
मयोच्यमानः पुरुषर्षभत्वमनन्यचित्तः सह सोदनीयैः ॥

उशनोवाच।

नमस्तस्मै भगवते देवाय प्रभविष्णवे।
यस्य पृथ्वीतलं तात साकाशं वाहुगोचरम् ॥
मूर्द्धा यस्य त्वनन्तं च स्थानं दानवसत्तम।
तस्याहं ते प्रवक्ष्यामि विष्णोर्माहात्म्यमुत्तमम् ॥
तयोः संवदतोरेवमाजगाम महामुनिः।

सनत्कुमारो धर्मात्मा संशयच्छेदनाय वै ॥
सुपूजितो सुरेन्द्रेण मुनिनोशनसा तथा।
निषसादासने राजन् महार्हे मुनिपुङ्गवः ॥
तमासीनं महाप्राज्ञमुशना वाक्यमब्रवीत्।
ब्रूह्यस्मै दानवेन्द्राय विष्णोर्माहात्म्यमुत्तमम् ॥
सनत्कुमारस्तु ततः श्रुत्वा प्राह वचोऽर्थवत्।
विष्णोर्माहात्म्यसंयुक्तं दानवेन्द्राय धीमते ॥
शृणु सर्वमिदं दैत्य विष्णोर्माहात्म्यमुत्तमम्।
विष्णौ स्थितं जगत्सर्वमिति विद्धि परन्तप ॥
सृजत्येष महाबाहो भूतग्रामं चतुर्विधम्।
एष वा च्चियते काले काले विसृजते पुनः ॥
अस्मिन् गच्छन्ति विलयमस्माच्चाप्रभवत्युत।
नैव ज्ञानवता शक्यस्तपसा नैव चेज्यया ॥
संप्राप्तुमिन्द्रियाणान्तु संयमेनैव शक्यते।
बाह्ये चाभ्यन्तरे चैव कर्मणा मनसि स्थितः ॥
निर्मलीकुरुते बुद्ध्या सोऽमुत्रानन्त्यमश्नुते।
यथा हिरण्यकर्त्ता वै तप्तमग्नौ विशोधयेत् ॥
बहुशोऽतिप्रयत्नेन महतात्मकृतेन ह।
तद्वज्जातिशतैर्जीवः शुध्यते येन कर्मणा ॥
यत्नेन महता चैवाप्येकजातौ विशुध्यते।
लीलयाल्पं यथा गात्रात्प्रमृज्यादात्मनो रजः ॥
बहुयत्नेन महता दोषनिर्हरणं तथा।
यथा चाल्पेन माल्येन वासितं तिलसर्षपम् ॥
न मुञ्चति स्वकं गन्धं तद्वत्सूक्ष्मस्य दर्शनम्।

तद्देव बहुभिर्माल्यैर्वास्यमानं पुनः पुनः ॥
विमुञ्चति स्वकं गन्धं माल्यगन्धे च तिष्ठति ।
एवं जातिशतैर्युक्तो गुणैरेवं प्रसङ्गिषु ॥
बुद्धा निवर्त्तते दोषो यत्नेनासज्जिन ह ।
कर्मणा स्वानुरक्तानि विरक्तानि च दानव ॥
यथा कर्मविशेषांश्च प्राप्नुवन्ति तथा शृणु ।
यथावत्संप्रवर्त्तन्ते यस्मिंस्तिष्ठन्ति वा विभो ॥
तत्तेनुपूर्व्यामाख्यास्ये तदिहैकमनाः शृणु ।
अनादिनिधनः श्रीमान् हरिर्नारायणः प्रभुः ॥
स वै सृजति भूतानि स्थावराणि चराणि च ।
एष सर्वेषु भूतेषु चरस्थाचर एव च ॥
एकादशविकारात्मा जगत्पिबति रश्मिभिः ।
पादौ तस्य महीं विद्धि मूर्द्धानं दिवमित्युत ॥
बाहवस्तु दिशो दैत्य श्रोत्रमाकाशमेव च ।
तस्य तेजोमयः सूर्यो मनश्चन्द्रमसि स्थितम् ॥
बुद्धिर्ज्ञानगता नित्यं रजस्त्वपस्तु प्रतिष्ठितः ।
भ्रुवोरनन्तरास्तस्य ग्रहा दानवसत्तम ॥
नक्षत्रचक्रं नेत्राणि पादयोर्भूश्च दानव ।
रजस्तमश्च सत्वं च विद्धि नारायणात्मकम् ॥
सोऽश्रमाणां फलं तात कर्मणस्तत्फलं विदुः ।
अकर्मणः फलं चैव स एव परमव्ययः ॥
छन्दांसि यस्य रोमाणि त्वक्षरं च सरस्वती ।
बह्वाश्रयो बहुसुखो धर्मो हृदि समाश्रितः ॥
स ब्रह्म परमो धर्मस्तपश्च सदसच्च सः ।

श्रुतिशास्त्रग्रहोपेतः षोडशर्त्विक्क्रतुश्च सः ॥
पितामहश्च विष्णुश्च सोऽश्विनौ स पुरन्दरः ।
मित्रोऽथ वरुणश्चैव यमोऽथ धनदस्तथा ॥
ते पृथग्दर्शनास्तस्य स विन्दति तथैकताम् ।
एकस्य विद्धि देवस्य सर्वं जगदिदं वशे ॥
नानाभूतस्य दैत्येन्द्र तस्यैकत्वं तदव्ययम् ।
जन्तुः पश्यति ज्ञानेन ततः सत्वं प्रकाशते ॥
शतं सहस्राणि चतुर्दशेह परा गतिर्जीवगुणस्य दैत्य ।
आरोहणं तत्क्रममेव विद्धि स्थानं तथा निःसरणं च तेषाम् ॥
सप्तैव संहारमुपप्लवानि संभाव्य सन्तिष्ठति जीवलोके ।
ततोऽव्ययं स्थानमनन्तमेति देवस्य विष्णोरथ ब्रह्मणश्च ॥
शुद्धां गतिं तां परमां परैति शुद्धेन नित्यं मनसा विचिन्वत् ।
ततो ऽव्ययस्थानमुपैति ब्रह्म दुष्प्रापमभ्येति स शाश्वतं वै ॥
इत्येतदाख्यातमहीनसत्व नारायणस्येह वरं मया ते ।

वृत्र उवाच ।

एवं विषादो न च मेऽस्ति कश्चित्सम्यक् च पश्यामि वचस्तवैतत् ।
श्रुत्वा तु ते वाचमहीन सत्व विकल्मषोस्म्यद्यतथा विपाप्मा ॥
प्रवृत्तमेतद्भगवन् महर्षेर्महाद्युतेश्चक्रमनन्तवीर्यम् ।
विष्णोरनन्तस्य सनातनं तत्स्थानं विसर्गा यत्र सर्वे प्रवृत्ताः ॥
स वै महात्मा पुरुषोत्तमो वै तस्मिन् जगत्सर्वमिदं प्रतिष्ठितम् ।

भीष्म उवाच ।

एवमुक्त्वा स कौन्तेय वृत्रः प्राणानवासृजत् ।
योजयित्वा तथात्मानं परं स्थानमवाप्तवान् ॥

इति सनत्कुमारवृत्रसंवादः ।

युधिष्ठिर उवाच।

अयं स भगवान् देवः पितामह जनार्दनः।
सनत्कुमारो वृत्राय यत्तदाख्यातवान् पुरा॥

भीष्म उवाच।

मूलस्थायी महादेवो भगवान् स्वेन तेजसा।
तत्स्थः सृजति तान् भावान्नानारूपान्महामनाः॥
तुरीयार्द्धेन तस्येमं विद्धि केशवमच्युतम्।
तुरीयार्द्धेन लोकांस्त्रीन्भावयत्येष बुद्धिमान्॥
अर्वाक्स्थितस्तु यः स्थायी कल्पान्ते परिवर्त्तते।
स शेते भगवानप्सु योऽसावतिबलः प्रभुः॥
तान्विधाता प्रसन्नात्मा लोकांश्च इति शाश्वतान्।
सर्वाण्यशून्यानि करोत्यनन्तः सनातनः संचरते च लोकान्॥
स चानिरुद्धः सृजते महात्मा तत्स्थं जगत्सर्वमिदं विचित्रम्।

जैमिनिरुवाच।

कस्मान्मानुषतां प्राप्तः कृतकृत्योऽपि स प्रभुः।
वासुदेवोऽखिलाधारः सर्वकारणकारणम्॥

पक्षिण ऊचुः।

नमस्कृत्य सुरेशाय विष्णवे प्रभविष्णवे।
पुरुषायाप्रमेयाय शाश्वतायाव्ययाय च॥
चतुर्व्यूहात्मने तस्मै त्रिगुणायागुणाय च।
वरिष्ठाय गरिष्ठाय वरेण्यायामिताय च॥
यज्ञाङ्गायाखिलाङ्गाय वेदान्तैरीरिताय च।
यस्मादणुतरं नास्ति यस्मान्नास्ति बृहत्तरम्॥
येन विश्वमिदं व्याप्तमेतेन जगदादिना।

आविर्भावतिरोभावदृष्टादृष्टविलक्षणम् ॥
वदन्ति यत्सृष्टमिदं तथैवाप्युपसंहृतम् ।
ब्रह्मणे वादिदेवाय नमस्कृत्वा समाधिना ॥
ऋत्विग्भिरागतो यन्नं वत्कीर्य: पुनाति जगत्त्रयम् ।
प्रवक्ष्यामो मतं कृत्स्नं व्यासस्याद्भुतकर्मणः ॥
येन भारतमुद्दिश्य धर्माद्याः प्रकटीकृताः ।
आपो नारा इति प्रोक्ता मुनिभिस्तत्त्वदर्शिभिः ॥
अयनन्तस्य ताः पूर्वं तेन नारायणः स्मृतः ।
स देवो भगवान्पूर्वं व्याप्य नारायणो विभुः ॥
चतुर्द्धा संस्थितो ब्रह्मन् सगुणो निर्गुणस्तथा ।
एका मूर्त्तिरनिर्देश्या शुक्लां पश्यन्ति तां बुधाः ॥
ज्वालामालोपरुद्धाङ्गी निष्ठा सा योगिनां परा ।
दूरस्था चान्तिकस्था च विज्ञेया सा गुणातिगा ॥
वासुदेवाभिधाना सा निर्ममत्वेन दृश्यते ।
रूपवर्णादयस्तस्या न भावाः कल्पनामयाः ॥
अस्त्येव सा सदा शुद्धा सुप्रतिष्ठैकरूपिणी ।
द्वितीया पृथिवी मूर्द्ध्ना शेषाख्याधारयत्यधः ॥
तामसी सा समाख्याता तिर्य्यक्त्वं समुपाश्रिता ।
तृतीया कर्मकुरुते प्रजापालनतत्पराम् ॥
सत्त्वोद्रिक्ता तु सा ज्ञेया सत्त्वसंस्थानकारिणी ।
चतुर्थी जलमध्यस्था शेते पन्नगतल्पगा ॥
रजस्तस्या गुणः सर्गं स करोति सदैव हि ।
यां तृतीया हरेर्मूर्त्तिः प्रजापालनतत्परा ॥
सा तु धर्मव्यवस्थानं करोति नियतं भुवि ।

प्रोद्धृता न सुरा हन्ति धर्मव्युच्छित्तिकारिणः ॥
याति देवान्सतत्वस्थान् धर्मरक्षापरायणान् ।
यदा यदा हि धर्मस्य ग्लानिः समुपजायते ॥
अभ्युत्थानमधर्मस्य तदात्मानं सृजत्यसौ ।
भूत्वा पुरा वराहेण तुण्डेनायोनिरस्य च ॥
एकया दंष्ट्रयोत्खाता नलिनीव वसुन्धरा ।
कृत्वा नृसिंहरूपं च हिरण्यकशिपुर्हतः ॥
विप्रचित्तिमुखाश्चान्ये दानवा विनिपातिताः ।
वामनादींस्तथैवान्यान्न संख्यातुं समुत्सहे ॥
अवतारांश्च तस्येमान् माथुरः सांप्रतस्त्वयम् ।
इति सा सात्विकी मूर्त्तिरवतारं करोति वै ॥
प्रद्युम्नेति च सा ख्याता रक्षाकर्मण्यवस्थिता ।
देवत्वेऽथ मनुष्यत्वे तिर्य्यग्योनौ च संस्थिता ॥
गृह्णाति तत्स्वभावं च वासुदेवेच्छया सह ।
इत्येतत्ते समाख्यातं कृतकृत्योपि यत्प्रभुः ॥
मानुषत्वं गतो विष्णुरनादिनिधनोऽव्ययः ।
इति चतुर्व्यूहावतारकथनम् ॥

युधिष्ठिर उवाच ।

शोकदुःखाच्च मृत्योश्च त्रसन्ते प्राणिनः सदा ।
उभयं नो यथा न स्यात्तन्मे ब्रूहि पितामह ॥

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
नारदस्य च संवादं समङ्गस्य च भारत ॥

नारद उवाच।

उरसैव प्रणमसे बाहुभ्यां तरसीव च।
संप्रहृष्टमना नित्यं विशोक इव लक्ष्यसे॥
उद्वेगं न हि ते कश्चित्सुसूक्ष्ममपि लक्षये।
नित्यतृप्त इव स्वस्थो बालवच्च विचेष्टसे॥

समंग उवाच।

भूतं भव्यं भविष्यच्च सर्वं वै तत्तु नारद।
तेषां तत्त्वानि जानाति ततो न विमना ह्यहम्॥
अगाधाश्चाप्रतिष्ठाश्च गतिमन्तश्च नारद।
अन्धा जडाश्च जीवन्ति पश्यास्मानपि जीवतः॥
विहितेनैव जीवन्ति अरोगा हि दिवौकसः।
बलवन्तोऽबलाश्चैव तस्मादस्मान् सभाजय॥
सहस्रिणोऽपि जीवन्ति जीवन्ति शतिनस्तथा।
शोकेन चान्ये जीवन्ति पश्यास्मानपि जीवतः॥
यदा न शोचेन हि किन्तु तत्स्याद्धर्मेण वा नारद कर्मणा वा।
कृतान्तवश्यानि यदा सुखानि दुःखानि कायं न विधर्षयन्ति॥
यस्मै प्राज्ञः कथयन्ते मनुष्याः प्रज्ञामूलो हीन्द्रियाणां प्रसादः।
मुह्यन्ति शोचन्ति तथेन्द्रियाणि प्रज्ञालाभो नास्ति मूढेन्द्रियस्य॥
मूढस्य दर्पः स पुनर्मोह एव मूढस्य नायं न परोस्ति लोकः।
न ह्येव दुःखानि सदा भवन्ति सुखस्य वा नित्यशो लाभ एव॥
भवात्मकं सम्परिवर्त्तमानं न मादृशः संज्वरं जातु कुर्यात्।
इष्टान् भोगान्नानुरुन्ध्येत्सुखं वा न चिन्तयेद् दुःखमभ्यागतं वा॥
समाहितेन स्पृहयेत् परेषां नानागतञ्चाभिनन्देच्च लाभम्।
न चापि हृष्येद्विपुलेऽर्थलाभे तथाऽर्थनाशे न च वै विसीदेत्॥

न बान्धवा न च वित्तं कुलीनं न च श्रुतं न च मन्त्रा न वीर्यम् ।
दुःखात्त्रातुं सर्व एवोत्सहन्ते परत्र शीलेन तु यान्ति शान्तिम् ॥
नास्ति बुद्धिरयुक्तस्य न योगाद्विन्दते सुखम् ।
धृतिश्च दुःखत्यागश्चोभयं तु सुखं नृप ॥
प्रियं हि हर्षजननं हर्ष उत्सेक वर्द्धनम् ।
उत्सेको नरकायैव तस्मात्तान् संत्यजाम्यहम् ॥
एतान् शोकभयोत्सेकान् मोहनान् सुखदुःखयोः ।
पश्यामि साक्षिवल्लोके देहस्यास्य विचेष्टनात् ॥
अर्थकामौ परित्यज्य विशोकोऽधिगतज्वरः ।
तृष्णामोहौ तु संत्यज्य चरामि पृथिवीमिमाम् ॥
न च मृत्योर्न वा धर्मान्नलोभान्न कुतश्च न ।
पीतामृतस्येवात्यन्तमिह चामुत्र चाभयम् ॥
तेन नारद संप्राप्तो न मां शोकः प्रबाधते ।
इति मोक्षधर्मे समंगनारदसंवादः ॥

युधिष्ठिर उवाच ।

अतत्त्वज्ञस्य शास्त्राणां सततं संशयात्मनः ॥
अकृतव्यवसायस्य श्रेयो ब्रूहि पितामह ।

भीष्म उवाच ।

गुरुपूजा च सततं वृद्धानां पर्युपासनम् ॥
श्रवणं चैव शास्त्राणि कूटस्थं श्रेय उच्यते ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ॥
गालवस्य च संवादं देवर्षेर्नारदस्य च ।
वीतमोहक्लमं विप्रं ज्ञानतृप्तं जितेन्द्रियम् ॥
श्रेयस्कामं जितात्मानं नारदं गालवोऽब्रवीत् ।

भगवन्नाश्रमाः सर्वे पृथगाचारदर्शनाः॥
इदं श्रेय इदं श्रेय इति सर्वे प्रबोधिताः।
तांस्तु विप्र स्थितान्दृष्ट्वा शास्त्रैः शास्त्राभिनन्दितः॥
स्वशास्त्रैः परितुष्टांश्च श्रेयो नोपलभामहे।
शास्त्रं यदि भवेदेकं श्रेयो व्यक्तं भवेत्तदा॥
शास्त्रैश्च बहुभिर्भूयः श्रेयो गुह्यं प्रवेशितम्।
एतस्मात्कारणाच्छ्रेयः कलिलं प्रतिभाति मे॥
ब्रवीतु भगवांस्तन्मे उपपन्नोऽस्म्यधीहि भो।

नारद उवाच।

आश्रमास्तात चत्वारो यथा संकल्पिताः पृथक्।
तान् सर्वाननुपश्य त्वं समाश्रित्येति गालव॥
तेषां तेषां तथा हि त्वमाश्रमाणां ततस्ततः।
नाना रूपं गुणोद्देशं तस्य विप्र स्थितं पृथक्॥
नयन्ति चैव ते सम्यगभिप्रेतमसंशयम्।
ऋत्ववपश्यंस्तथा सम्यगाश्रयाणां परां गतिम्॥
यत्त्वनिश्रेयसं सम्यक् तथैवासंशयात्मकम्।
अनुग्रहं च मित्राणाममित्राणां च निग्रहम्॥
संग्रहं च निसर्गस्य श्रेय आहुर्मनीषिणः।
निवृत्तिः कर्मणः पापात्सततं पुण्यशीलता॥
सद्भिश्च समुदाचारः श्रेय एतदसंशयम्।
मार्दवं सर्वभूतेषु व्यवहारेषु चार्जवम्॥
वाक् चैव मधुरा प्रोक्ता श्रेय एतदसंशयम्।
दैवतेभ्यः पितृभ्यश्च संविभागोऽतिथिष्वपि॥
असन्त्यागश्च भृत्यानां श्रेय एतदसंशयम्।

सत्यस्य वचनं श्रेयः सत्यज्ञानं तु दुष्करम्॥
यद् भूतहितमत्यन्तमेतत्सत्यं ब्रवीम्यहम्।
अहङ्कारस्य च त्यागः प्रणयस्य च निग्रहः॥
सन्तोषश्चैकचर्या च कूटस्थं श्रेय उच्यते।
धर्मेण वेदाध्ययनं वेदाङ्गानां तथैव च॥
ज्ञातार्थानां च जिज्ञासा श्रेय एतदसंशयम्।
शब्दरूपरसस्पर्शान् सह गन्धेन केवलान्॥
नात्यर्थमुपसेवेत श्रेयसोऽर्थी कथञ्चन।
नात्यर्थमुपसेवेत श्रेयसोर्थी कथञ्चन॥
नक्तंचर्या दिवास्वप्नमालस्यं पैशुनं मदम्।
अतियोगमयोगञ्च श्रेयसोऽर्थी परित्यजेत्॥
आत्मोत्कर्षं न मार्गेत परेषां परिनिन्दया।
स्वगुणैरेव मार्गेत विप्रकर्षं पृथग्जनात्॥
निर्गुणास्त्वेव भूयिष्टमात्मसंभाविता नराः।
दोषैरन्यान् गुणवतः क्षिपन्त्यात्मगुणक्षयात्॥
अनुच्यमानास्तु पुनस्ते मन्यन्ते महाजनान्।
गुणवत्तरमात्मानं स्वेन मानेन दर्पिताः॥
अब्रुवन् कस्यचिन्निन्दामात्मपूजामवर्णयत्।
विपश्चिद्गुणसंपन्नः प्राप्नोत्येव महद्यशः॥
अब्रुवन् वाति सुरभिर्गन्धः सुमनसां शुचिः।
तथैवाव्याहरन्भाति विमलो भानुरम्बरे॥
एवमादीनि वान्यानि परित्यक्तानि मेधया।
ज्वलन्ति यशसा लोके यान्ति न व्याहरन्ति च॥
न लोके दीप्यते सूर्यः केवलात्मप्रशंसया।

असदुच्चैरपि प्रोक्तः शब्दः समुपशाम्यति ॥
दीप्यते त्वेव लोकेषु शनैरपि सुभाषितम्।
दर्शयन्त्यन्तरात्मानमग्नौ रूपमिवांशुमान् ॥
एतस्मात् कारणात् प्रज्ञां मृगयन्ते पृथग्विधाम्।
प्रज्ञालाभो हि भूतानामुत्तमः प्रतिभाति मे ॥
नापृष्टः कस्यचिद् ब्रूयान्न वान्यायेन पृच्छतः।
जानन्नपि हि मेधावी जडवल्लमुपाविशेत् ॥
ततो वासं परीक्षेत धर्मनित्येषु साधुषु।
मनुष्येषु वदान्येषु स्वधर्मनिपुणेषु च ॥
चतुर्णां यत्र वर्णानां कर्मव्यतिकरो भवेत्।
न तत्र वासं कुर्वीत श्रेयोर्थी वै कथंचन ॥
निरारम्भोप्ययमिह यथा लब्धोपजीविनः।
पुण्यं पुण्येषु विमलं पापं पापेषु चाप्नुयात् ॥
अपामग्नेस्तथेन्दोश्च स्पर्शं वेदयते यथा।
तथा पश्यामहे स्पर्शमुभयोः पुण्यपापयोः ॥
अपश्यन्तो तु विषयं भुञ्जते विघशासिनः।
भुञ्जानाश्चात्मविषयान् विषयान्विद्धि कर्मणाम् ॥
यत्रागमयमानानामसत्कारेण पृच्छताम्।
प्रब्रूयाद् ब्राह्मणो धर्मं त्यजेत्तं देशमात्मवान् ॥
शिष्योपाध्यायिका वृत्तिर्यत्र स्यात्सुसमाहिता।
यथावच्छास्त्रसंपन्ना कस्तं देशं परित्यजेत् ॥
आकाशस्था ध्रुवं यत्र दोषं ब्रूयुर्विपश्चिताम्।
आत्मपूजाभिकामा वै को वसेत्तत्र पण्डितः ॥
यत्र संलोडिता लुब्धैः प्रायशो धर्मसेवितः।

प्रदीप्तमिव शैलान्तं कस्तं देशं न सन्त्यजेत् ॥
यत्र धर्ममनाशङ्कास्चरेयुर्वीतमत्सराः ।
चरेत्तत्र वसेच्चैव पुण्यशीलेषु साधुषु ॥
धर्ममर्थनिमित्तं च चरेयुर्यत्र मानवाः ।
नताननुवसेज्जातु ते हि पापकृतो जनाः ॥
कर्मणा यत्र पापेन वर्तन्ते जीवितेप्सवः ।
व्यवधावेत्ततस्तूर्णं ससर्पाच्छरणादिव ॥
येन खट्वां समारूढः कर्मणानुशयी भवेत् ।
आदितस्तन्न कर्त्तव्यमिच्छता भवमात्मनः ॥
यत्र राजा च राज्ञश्च पुरुषाः प्रत्यनन्तराः ।
कुटुम्बिनामग्रभुजस्त्यजेत्तद्राष्ट्रमात्मवान् ॥
श्रोत्रियास्त्वग्रभोक्तारो धर्मनित्याः सनातनाः ।
याजनाध्यापने युक्ता यत्र तद्राष्ट्रमावसेत् ॥
स्वाहास्वधावषट्कारा यत्र सम्यगनुष्ठिताः ।
अजस्रं चैव वर्तन्ते वसेत्तत्राविचारयन् ॥
अशुचीन् यत्र पश्येत ब्राह्मणान्वृत्तिकर्षितान् ।
त्यजेत्तद्राष्ट्रमासन्नमुपसृष्टमिवामिषम् ॥
प्रीयमाणा नरा यत्र प्रयच्छेयुरयाचिताः ।
स्वस्थचित्तो वसेत्तत्र कृतकृत्य इवात्मवान् ॥
यत्र दण्डो विनीतेषु सत्कारश्च कृतात्मसु ।
चरेत्तत्र वसेच्चैव पुण्यशीलेषु साधुषु ॥
उपसृष्टेष्वदान्तेषु दुराचारेष्वसाधुषु ।
अविनीतेषु लुब्धेषु सुमहद्दण्डधारणम् ॥
यत्र राज्यं धर्मनित्यो राज्यं धर्मेण पालयेत् ।

अपास्य कामान् कामेशो वसेत्तत्राविचारयन् ॥
तथाशीला हि राजानः सर्वान्विषयवासिनः ।
श्रेयसा योजयन्त्याशु श्रेयसि प्रत्युपस्थिते ॥
गच्छतस्ते मया तात श्रेय एतदुदाहृतम् ।
न हि शक्यं प्रधानेन श्रेयः संख्यातुमात्मनः ॥
एवं प्रवर्तमानस्य वृत्तिं प्रणिहितात्मनः ।
तपसैवेह बहुलं श्रेयोऽप्युक्तं भविष्यति ॥
इति मोक्षधर्मे नारदगालवसंवादे श्रेयोवाचिकं नाम ।

युधिष्ठिर उवाच ।

कथन्तु युक्तः पृथिवीं चरेदस्मद्विधो नृपः ।
नित्यं कैश्च गुणैर्युक्तः सङ्गपाशाद्विमुच्यते ॥

भीष्म उवाच ।

अत्र ते वर्त्तयिष्येऽहमितिहासं पुरातनम् ।
अरिष्टनेमिना प्रोक्तं सगरायान्वपृच्छते ॥

सगर उवाच ।

किं श्रेयः परमं ब्रह्मन् कृत्वेह सुखमश्नुते ।
कथं शोचेच्च न क्षुभ्येदेतदिच्छामि वेदितुम् ॥

भीष्म उवाच ।

एवमुक्तस्तदा तार्क्ष्यः सर्वशास्त्रविशारदः ।
विबुध्य सम्पदं चाग्र्यां सद्वाक्यमिदमब्रवीत् ॥
सुखं मोक्षसुखं लोके नच लोकोऽवगच्छति ।
प्रसंक्तस्त्वत्र पशुषु धनधान्यसमाकुलाः ॥
सक्तबुद्धिरशान्तात्मा न स शक्यश्चिकित्सितुम् ।

स्नेहपाशान्वितो मूढो न स मोक्षाय कल्पते ॥
स्नेहजानिह ते पाशान् वक्ष्यामि शृणु तानिह ।
संभाव्य पुत्रान् कालेन यौवनस्थान्निवेश्य च ॥
समर्थान् जीवने ज्ञात्वा मुक्तश्चर यथासुखम् ।
भार्यां पुत्रवतीमृद्धां लालितां पुत्रवत्सलाम् ॥
ज्ञात्वा प्रजहि काले तु परार्थमनुदृश्य च ।
सापत्यो निरपत्यो वा मुक्तश्चर यथासुखम् ॥
उपपत्त्योपलब्धेषु लाभेषु च समो भव ।
एष तावत् समासेन तव संकीर्त्तितो मया ॥
मोक्षार्थो विस्तरेणाथ भूयो वक्ष्यामि तच्छृणु ।
मुक्ता वीतभया लोके चरन्ति सुखिनो नराः ॥
सक्तभावा विनश्यन्ति नरास्तत्र न संशयः ।
आहारसंचयास्तत्र यथा कीटपिपीलिकाः ।
असक्ताः सुखिनो लोके सक्ताश्चैव विनाशिनः ॥
स्वजनेन च ते बुद्धिः कर्त्तव्या मोक्षबुद्धिना ।
इमे मया विना भूताः भविष्यन्ति कथं त्विति ॥
स्वयमुत्पद्यते जन्तुः स्वयमेव विवर्द्धते ।
सुखं दुःखं तथा मृत्युं स्वयमेवाधिगच्छति ॥
भोजनाच्छादने चैव मात्रा पित्रा च संग्रहम् ॥
स्वकृतेनापि गच्छन्ति लोकेनान्यकृतं पुनः ।
धात्रया विहितभक्ष्याणि सर्वभूतानि मेदिनी ॥
लोकेऽपि परिधावन्ति रचितानि स्वकर्मभिः ।
स्वयं मृत्पिण्डभूतस्य परतन्त्रस्य सर्वदा ॥
को हेतुः स्वजनं द्वेष्टुं रक्षितुं वा दृढात्मनः ।

स्वजनं च यथा मृत्युर्हन्त्येव भुवि सर्वतः ॥
कृतेऽपि यत्ने महति न तु बोद्धव्यमात्मना।
जीवन्तमयि चैवैनं भरणे रक्षणे तथा ॥
असमाप्ते परित्यज्य पश्चादपि भविष्यति।
यदा मृतश्च स्वजनं न ज्ञास्यति कथञ्चन ॥
सुखिनं दुःखिनं वापि ननु बोद्धव्यमात्मना।
एवं विज्ञाय लोकेऽस्मिन् कः कस्येत्यभिनिश्चितः ॥
मोक्षे संवेशय मनो भूयश्चाप्युपपादयम्।
क्षुत्पिपासादयो भावा यतो यस्येह देहिनः ॥
क्रोधो लोभस्तथा मोहः सत्त्ववान्मुक्त एव सः।
द्यूते पाने तथा स्त्रीषु मृगयायाञ्च यो नरः ॥
न प्रमाद्यति वै मोहात्सततं मुक्त एव सः।
दिवसे दिवसे नाम रात्रौ रात्रौ तथा सदा ॥
भोक्तव्यमिति यः खिन्नो दोषबुद्धिः स मुच्यते।
आत्मभावस्तथा स्त्रीषु मुक्त एव पुनः पुनः।
यः पश्यति सदा युक्तो यथावन्मुक्त एव सः।
सम्भवञ्च विनाशं च भूतानां चेष्टितं यथा ॥
यस्तत्त्वतो विजानाति लौकिके मुक्त एव सः।
क्षौमं तथैव वसनं कौशेयं वल्कलानि च ॥
आविकञ्चर्मवासश्च यस्य स्यान्मुक्त एव सः।
सुखदुःखे समे यस्य लाभालाभौ जयाजयौ ॥
इच्छाद्वेषौ भयोद्वेगौ सर्वथा मुक्त एव सः।
रक्तमूत्रपुरीषाणां दोषाणां सञ्चयन्तथा ॥
शरीरं दोषबहुलं दृष्ट्वा चेदं विमुच्यते।

अर्थांश्च विविधाँल्लोके क्लेशांश्च विविधांस्तथा ॥
दुःखं चैव कुटुम्बार्थे यः पश्यति स मुच्यते ।
वलीपलितसंयोगं कार्श्यं वैवर्ण्यमेव च ॥
कुब्जभावं च जरया यः पश्यति स मुच्यते ।
पुंस्त्वोपघातं कालेन दर्शनोपरमं तथा ॥
बाधिर्यं प्राणनाशञ्च यः पश्यति स मुच्यते ।
गतानृषींस्तथा देवानसुरांश्च तथा गतान् ॥
लोकादस्मात्परं लोकं यः पश्यति स मुच्यते ।
प्रभावैरन्वितास्तैस्तैः पार्थिवेन्द्राः सहस्रशः ॥
ये गता पृथिवीं त्यक्त्वा इति ज्ञात्वा विमुच्यते ।
अपत्यानाञ्च वैगुण्यं जनवैगुण्यमेव च ॥
पश्यन्भूयिष्टगो लोके को मोक्षं नाभिपूजयेत् ।
शास्त्राल्लोकाच्च यो बुद्धः सर्वं पश्यति मानवः ॥
असारमिव मानुष्यं सर्वथा मुक्त एव सः ।
एतच्छ्रुत्वा मम वचो भवांश्चरतु मुक्तवत् ॥
गार्हस्थ्यं यदि ते मोक्षे कृता बुद्धिरविक्लवा ।
तत्तस्य वचनं श्रुत्वा सम्यक्स पृथिवीपतिः ॥
मोक्षायैव गुणैर्युक्तः पालयामास वै प्रजाः ।
इति मोक्षधर्मे सगरारिष्टनेमिसंवादः ॥

इति श्रीभक्तिसागरे परमार्थनिरूपणे सनत्कुमारवृत्रसंवाद-
चतुर्व्यूहावतारकथन-समंगनारदसंवाद-सगराऽरि-
ष्टनेमिसंवादनिरूपणं नामाष्टमस्तरङ्गः ।

युधिष्ठिर उवाच।

अतः परं महाबाहो यच्छ्रेयस्तद् ब्रवीहि मे।
न तृप्तास्म्यमृतस्येव वचसस्ते पितामह॥
किं कर्म पुरुषः कृत्वा शुभं पुरुषसत्तम।
श्रेयः परमवाप्नोति प्रेत्य चेह च तद्वद॥

भीष्म उवाच।

अत्र ते वर्त्तयिष्यामि यथापूर्वं महायशः।
पराशरं महात्मानं पप्रच्छ जनको नृपः॥
किं श्रेयः सर्वभूतानामस्मिंल्लोके परत्र च।
यद्भवेत्प्रतिपत्तव्यं यद्भवान् प्रब्रवीतु मे॥
ततः स तपसा युक्तः सर्वधर्मविधानवित्।
नृपायानुग्रहमना मुनिर्वाक्यमथाब्रवीत्॥

पराशर उवाच।

धर्म एव परः श्रेयानिह लोके परत्र च।
तस्माद्धि परमं नास्ति यथा प्राहुर्मनीषिणः॥
नाबीजाज्जायते किंचिन्नाकृत्वा सुखमेधते।
सुकृतैर्विन्दते सौख्यं प्राप्य देहक्षयं नरः॥
चक्षुषा मनसा वाचा कर्मणा च चतुर्विधम्।
कुरुते यादृशं कर्म तादृशं प्रतिपद्यते॥
कल्याणं यदि वा पापं न तु नाशोऽस्य विद्यते।
कदाचित्सुकृतं तात कूटस्थमिव तिष्ठति॥
मज्जमानस्य संसारे यावद्दुःखाद्विमुच्यते।
ततो दुःखक्षयं कृत्वा सुकृतं कर्म सेवते॥

सुकृतक्षयाद् दुःकृतं च तद्विद्धि मनुजाधिप।
नायं परस्य सुकृतं दुःकृतं चापि सेवते॥
करोति यादृशं कर्म तादृशं प्रतिपद्यते।
परेषां यदि सूयेत तन्नकुर्याज्जनेश्वर॥
यो ह्यसूयुस्तथा युक्तः सोऽवहासं नियच्छति।
भीरू राजन्यो ब्राह्मणः सर्वभक्ष्यो वैश्योऽहीनो हीनवर्णोऽलसश्च॥
विद्वांश्चाशीलोवृत्तहीनः कुलीनः सत्याद्भ्रष्टो ब्राह्मणः स्त्री च दुष्टा।
रागी युक्तः पचमानोऽत्महेतोर्मूर्खो वक्ता नृपहीनं च राष्ट्रम्॥
एते सर्वे शोच्यतां यान्ति राजन् यश्चायुक्तः स्नेहहीनः प्रजासु।
आयुर्हि सुलभं लब्ध्वा नापकर्षेद्विशाम्पते॥
उत्कर्षार्थं प्रयतते नरः पुण्येन कर्मणा।
अज्ञानाद्धि कृतं पापं तपसैवाभिनिर्नुदेत्॥
पापं हि कर्म फलति पापमेव स्वयं कृतम्।
तस्मात्त्वीदं न सेवेत कर्म दुःखफलोदयम्॥
पापानुबन्धं यत्कर्म यद्यपि स्यान्महाफलम्।
तन्न सेवेत मेधावी शुचिः कुशलिनं यथा॥
किं कष्टमनुपश्यामि फलं पापस्य कर्मणः।
प्रत्यासन्नस्य हि ततो नात्मा तावद्विरोचते॥
विरक्तं शोध्यते वस्त्रं न तु कृष्णोपसंहितम्।
प्रयत्नेन मनुष्येन्द्र पापमेवं निबोध मे॥
स्वयं कृत्वा तु यः पापं शुभमेवानुतिष्ठति।
प्रायश्चित्तं नरः कर्तुमुभयं सोऽश्नुते पृथक्॥
अज्ञानात्तु कृता हिंसामहिंसा व्यपकर्षति।
इत्याहुर्ब्रह्मशास्त्रज्ञा ब्राह्मणा वेदपारगाः॥

अहन्तु तावत्पश्यामि कर्म यद्वर्त्तते कृतम्।
गुणयुक्तं प्रकाशं वा पापेनानुपसंहितम्॥
यथा सूक्ष्माणि कर्म्माणि फलन्तीह यथातथम्।
बुद्धियुक्तानि तानीह कृतानि मनसा सह॥
भवत्यल्पफलं कर्म सेवितं नित्यमुल्बणम्।
अबुद्धिपूर्वं धर्मज्ञ कृतमुग्रेण कर्मणा॥
कृतानि यानि कर्माणि दैवतैर्मुनिभिस्तथा।
न चरेत्तानि धर्मात्मा श्रुत्वा वापि न कुत्सयेत्॥
संचिन्त्य मनसा राजन् विदित्वा शक्तिमात्मनः।
करोति यः शुभं कर्म स वै भद्राणि पश्यति॥

पराशर उवाच।

कः कस्य वोपकुरुते कश्च कस्मै प्रयच्छति।
प्राणी करोत्ययं कर्म सर्वमात्मार्थमात्मना॥
गौरवेण परित्यक्तं निःस्नेहं परिवर्जयेत्।
सोदर्यं भ्रातरमपि किमुतान्यं पृथग्जनम्॥
विशिष्टस्य विशिष्टाच्च तुल्यौ दानप्रतिग्रहौ।
तयोः पुण्यतरन्दानं तद्द्विजस्य प्रयच्छतः॥
न्यायागतं धनं वर्णैं न्यायेनैव विवर्द्धितम्।
संरक्ष्यं यत्नमास्थाय धर्मार्थमिति निश्चयः॥
न धर्मार्थी नृशंसेन कर्मणा धनमर्जयेत्।
शक्तितः सर्वकार्य्याणि कुर्यान्नर्द्धिमनुस्मरेत्॥
देवतातिथिभृत्येभ्यः पितृभ्यश्चात्मनस्तथा।
ऋणवान् जायते मर्त्त्यस्तस्मादनृणतां व्रजेत्।
स्वाध्यायेन महर्षिभ्यो देवेभ्यो यज्ञकर्मणा।

पितृभ्यः श्राद्धदानेन नृणामभ्यर्चनेन च।
वाचः शेषावहार्येण पालनेनात्मनोऽपि च॥
यथावद्भृत्यवर्गस्य चिकीर्षेत्कर्म आदितः।
प्रयत्नेन च संसिद्धा धनैरपि विवर्जिता.॥
सम्यग्धुत्वा हुतवहं मुनयः सिद्धिमागताः।
न तु वृद्धिमिहान्विच्छेत् कर्म कृत्वा जुगुप्सितम्॥
येऽर्था धर्मेण ते सत्या ह्यधर्मेण धिगस्तु तान्।
सर्वं वै शाश्वतं लोके न जह्याद्धनकाङ्क्षया॥
आहिताग्निः स धर्मात्मा शिष्टः पुण्यकृदुत्तमः।
वेदा हि सर्वे राजेन्द्र स्थितास्त्रिष्वग्निषु प्रभो॥
स चाप्यग्न्यांहितो विप्रः क्रिया यस्य न हीयते।
श्रेयो ह्यनग्निता ऽग्नित्वमग्निहोत्रं न निःक्रयम्॥
अग्निरात्मा च माता च पिता जनयिता तथा।
गुरुश्च नरशार्दूल परिचर्या यथातथम्॥

मानं त्यक्त्वा यो नरो वृद्धसेवी विद्वान् क्लीमान् पश्यति प्रीतियोगात्।
दाक्ष्येण युक्तो धर्मवान् यः सुशीलो लोके ह्यस्मिन्पूज्यते सद्भिरार्यः॥

नित्यं त्रयाणां वर्णानां शुश्रूषुः शूद्र उच्यते॥
क्षत्रधर्मा वैश्यधर्मा नावृत्तिः पतति द्विजः।
शूद्रधर्मा यदा तु स्यात्तदा पतति वै द्विजः॥
वाणिज्यं पाशुपाल्यं च तथा शिल्पोपजीवनम्।
शूद्रस्यापि विधिं धत्ते यदा वृत्तिर्न जायते।
रङ्गावतरणं चैव तथा रूपोपजीवनम्॥
मद्यमांसोपजीव्यं च विक्रयं लोहचर्मणोः।
शूद्रेणापि न कर्तव्यं कर्म लोके विगर्हितम्॥

कृतपूर्वं तु त्यज्यते महान् धर्म इति श्रुतिः ।
संसिद्धः पुरुषो लोके यदाचरति पातकम् ॥
मदेनाभिप्लुतमनास्तच्च न ग्राह्यमुच्यते ।
श्रूयते च पुराणेषु प्रजा धिग्दण्डशासनाः ॥
दान्ता धर्मप्रधानाश्च न्यायधर्मानुवर्तिनः ।
धर्म एव सदा नृणामिह राजन् प्रशस्यते ।
धर्मवृद्धा गुणानेव सेवन्ते हि नरा भुवि ॥
तस्मादहं प्रब्रवीमि त्वां राजन् संचिन्त्य शास्त्रतः ।
संसिद्धाधिगमं कुर्यात्कर्म हिंसात्मकं त्यजेत् ॥
न संकरेण द्रविणं प्रचिन्वीयाद्विचक्षणः ।
धर्मार्थं न्यायमुत्सृज्य न तत्कल्याणमुच्यते ॥
अथ जातिसहस्राणि बहूनि परिवर्त्तते ।
तस्माद् गुणेषु रज्येथा मा दोषेषु कथं च न ॥
मानुषेषु महाराज धर्माधर्मौ प्रवर्त्ततः ।
न तथान्येषु भूतेषु मनुष्यरहितेष्विव ।
यदा व्ययेत ह्यलेखं मनो भवति तस्य वै ।
नानृतं चैव भवति तदा कल्याणमर्हति ॥

पराशर उवाच ।

एष धर्मविधिस्तात गृहस्थस्य प्रकीर्तितः ।
तयोर्विधिन्तु वक्ष्यामि तन्मे निगदतः शृणु ॥
प्रायेणात्र गृहस्थस्य ममत्वं नाम जायते ।
समागतं नरश्रेष्ठ भावै राजसतामसैः ॥
गृहाण्याश्रित्य गावश्च क्षेत्राणि च धनानि च ।
दाराः पुत्राश्च पौत्राश्च भवन्तीह नरस्य वै ॥

एवं तस्य प्रवृत्तस्य नित्यमेवानुपश्यतः ।
रागद्वेषौ विवर्द्धेते ह्यनित्यत्वमपश्यतः ॥
रागद्वेषाभिभूतं च नरं द्रव्यवशानुगम् ।
मोहजाता रतिर्नाम समुपैति नराधिप ॥
रत्यर्थं भोगिनस्त्यक्ता स वै रतिपरायणः ।
लाभं ग्राम्यसुखादन्यं रतितो नानुपश्यति ॥
ततो लोभाभिभूतात्मा सङ्गाद्वर्द्धयते जनम् ।
पुष्ट्यर्थं चैव तस्येह जनस्यार्थं चिकीर्षति ॥
स जानन्नपि वा कार्यमर्थार्थं सेवते नरः ।
बालः स्नेहपरीतात्मा तच यावन्न तप्यते ॥
ततो मानेन संपन्नो रचन्नात्मपराजयम् ।
करोति येन भोगी स्यामिति तस्माद्विनश्यति ॥
तपोवृद्धिप्रयुक्तानां शाश्वतं ब्रह्मवादिनाम् ।
अन्विच्छतां शुभं कर्म नराणां त्यज्यतां सुखम् ॥
स्नेहायतननाशाच्च धननाशाच्च पार्थिव ।
आधिव्याधिप्रतापाच्च निर्वेदमुपगच्छति ॥
निर्वेदादात्मसंबोधः संबोधाच्छास्त्रदर्शनम् ।
शास्त्रार्थदर्शनाद्राजंस्तप एवानुपश्यति ॥
दुर्लभो हि मनुष्येन्द्र नरः प्रत्यवमर्षवान् ।
यो वै प्रियसुखे चीणस्तपः कर्तुं व्यवस्यति ॥
तपः सर्वगतं तात हीनस्यापि विधीयते ।
जितेन्द्रियस्य दान्तस्य स्वर्गमार्गप्रदर्शकम् ॥
मर्त्यलोके च राजानो ये वान्ये गृहमेधिनः ।
महाकुलेषु दृश्यन्ते तत्सर्वं तपसः फलम् ॥

नाप्राप्यं तपसः किञ्चित्त्रैलोक्येऽपि परन्तप ।
सुखिनो दुःखिनो वापि नरो लोभं परित्यजेत् ॥
अवेक्ष्य मनसा शास्त्रं बुद्ध्या च नृपसत्तम ।
असन्तोषोऽसुखायेति लोभादिन्द्रियसंभ्रमः ॥
ततोऽस्य नश्यति प्रज्ञा विद्येवाभ्यासवर्जिता ।
नष्टप्रज्ञो यदा तु स्यात्तदा न्यायं न पश्यति ॥
तस्मात्सुखक्षये प्राप्ते पुमानुग्रन्तपश्चरेत् ।
यदिष्टं तत्सुखं प्राहुर्द्वेष्यादुःखमिहोच्यते ॥
सुखे तु वर्त्तमानो वै दुःखे वापि नरोत्तम ।
सुवृत्ताद्यो न चलते शास्त्रचक्षुः स मानवः ॥
क्रियमाणं यदा कर्म नाशं गच्छति मानुषम् ।
तेषां नान्यदृते लोके तपसः कर्म विद्यते ॥
यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम् ।
न कश्चिद्याति पुरुषं दिष्टान्तवशमागतम् ॥
सावशेषसुखं वापि कश्चिन्नैवापकर्षति ।
गृहस्थानां च सर्वेषां विनाशमभिकाङ्क्षताम् ॥
निधनं शोभनं तात पुलिनेषु क्रियावताम् ।
आपन्ने तूत्तरां काष्ठां सूर्ये यो निधनं व्रजेत् ॥
नक्षत्रे च मुहूर्त्ते च पुण्ये राजन् स पुण्यकृत् ।
विषमुद्बन्धनं दाहो दस्युहस्तात्तथा वधः ॥
दंष्ट्रिभ्यश्च पशुभ्यश्च प्राकृतो वध उच्यते ।
न चैभिः पुण्यकर्माणो युज्यन्ते चाभिसन्धिजैः ॥
एवंविधैश्च बहुभिरपरैः प्राकृतैरपि ।
ऊर्द्ध्वं भित्वा प्रतिष्ठन्ते प्राणाः पुण्यवतां नृप ॥

२५

मध्यतो मध्यपुण्यानामधो दुष्कृतकर्मणाम्।
एकः शत्रुर्न द्वितीयोऽस्ति शत्रुरज्ञानतुल्यः पुरुषस्य राजन्॥
येनावृत्तः कुरुते संप्रयुक्ते घोराणि कर्माणि सुदारुणानि।
इयं हि योनिः प्रथमा यां प्राप्य जगतीपते॥
आत्मा वै शक्यते त्रातुं कर्मभिः शुभलक्षणैः।
छित्वा धर्ममयं पाशं यदा धर्मेऽभिरज्यते॥
दत्वाऽभयकृतं दानं तदा सिद्धिमवाप्नुते।
यो ददाति सहस्राणि गवां यश्च शतानि च॥
अभयं सर्वभूतेभ्यस्तदा नमति वर्त्तते।
वसन् विषयमध्येऽपि न वसत्येव बुद्धिमान्॥
स वसत्येव दुर्बुद्धिरसत्सु विषयेष्वपि।
न धर्मः श्लिष्यति प्राज्ञं पयः पुष्करपर्णवत्॥
अप्राज्ञमधिकं पापं श्लिष्यते जतुकाष्ठवत्।
वीतरागो जितक्रोधः सम्यग्भवति यः सदा॥
विषये वर्त्तमानोऽपि न स पापेन युज्यते।
मर्यादायां धर्मसेतुर्निबद्धो नैव सीदति॥
पुष्टस्रोत इवासक्तः स्फीतो भवति सञ्चयः।
यथा भानुगतं तेजो मणिः शुद्धः समाधिना॥
आदत्ते राजशार्दूल तथा योगः प्रवर्त्तते।
प्रसक्तबुद्धिर्विषयेषु यो नरो न बुध्यते ह्यात्महितं कदाचन॥
स सर्वभावानुगतेन चेतसा नृपामिषेणेव झषो विकृष्यते।
सङ्घातवान्मर्त्यलोकः परस्परमपाश्रितः॥
कदलीगर्भनिःसारो नौरिवाप्सु निमज्जति।
न धर्मकालः पुरुषस्य निश्चितो न चापि मृत्युः पुरुषं प्रतीक्षते॥

सदा हि धर्मस्य क्रियैव शोभना यदा नरो मृत्युमुखे निवर्त्तते।
यथान्धः स्वगृहे युक्ते ह्यभ्यासादेव गच्छति ॥
तथा युक्तेन मनसा प्राज्ञो गच्छति तां गतिम्।
मरणं जन्मनि प्रोक्तं जन्म वै मरणाश्रितम् ॥
अविद्वान्मोक्षधर्मेषु बद्धो भ्रमति चक्रवत्।
बुद्धिमार्गप्रयातस्य सुखं त्विह परत्र च ॥
विस्ताराः क्लेशसंयुक्ताः संक्षेपास्तु सुखावहाः।
परार्थं विस्तराः सर्वे त्यागादात्महितं विदुः ॥
परार्थे वर्त्तमानस्तु स्वं कार्यं योऽभिमन्यते।
इन्द्रियार्थेष्वसक्तः स्वकार्यात्परिहीयते ॥
अहोरात्रमये लोके जरारूपेण संसरन्।
मृत्युर्ग्रसति भूतानि पवनं पन्नगो यथा ॥
स्वयं कृतानि कर्माणि जातो जन्तुः प्रपद्यते।
नाकृत्वा लभते कश्चित्किञ्चिदत्र प्रियाप्रियम् ॥
शयानं यान्तमासीनं प्रवृत्तं विषयेषु च।
शुभाशुभानि कर्माणि प्रपद्यन्ते नरं सदा ॥
यथा भारावसन्ना हि नौर्यथाम्भसि तन्तुना।
तथा मनोऽनुयोगाद्वै शरीरं प्रविकर्षति ॥
स्नेहपाशैर्बहुविधैरासक्तमनसो नराः।
प्रकृतिस्था विसीदन्ति जले सैकतवेश्मवत् ॥
व्यवसायं समाश्रित्य सहायोऽधिगच्छति।
न तस्य कश्चिदारम्भः कदाचिदवसीदति ॥
अद्वैतमनसं शूरं युक्तं धीरं विपश्चितम्।
न श्रीः सन्त्यजते नित्यमादित्यमिव रश्मयः ॥

स्वरूपनामात्मकृतं च विस्तरं कुलान्वयं द्रव्यसमृद्धिसंचयम्।
नरो हि सर्वो लभते यथा कृतं शुभाशुभेनात्मकृतेन कर्मणाम्॥

भीष्म उवाच।

इत्युक्तो जनको राजन् यथातथ्यं मनीषिणा।
श्रुत्वा धर्मविदां श्रेष्ठः परां मुदमवाप ह॥

इति पराशरजनकसंवादः।

भीष्म उवाच।

रागं मोहं तथा स्नेहं कामं क्रोधं च केवलम्।
योगाच्छित्त्वादितो दोषान् पञ्चैतान् प्राप्नुवन्ति तान्॥
यथैवानिमिषाः स्थूला जालं छित्त्वा पुनर्जलम्।
प्राप्नुवन्ति तथा योगात्तत्पदं वीतकल्मषाः॥
तथैव वागुरां छित्त्वा बलवन्तो यथा मृगाः।
प्राप्नुयुर्विमलं मार्गं विमुक्ताः सर्वबन्धनैः॥
लोभजानि तथा राजन् बन्धनानि बलान्विताः।
छित्त्वा योगात्परं मार्गं गच्छन्ति विमलं परम्॥
अबलाश्च मृगा राजन् वागुरासु तथा परे।
विनश्यन्ति न सन्देहस्तद्वद्योगबलादृते॥
यथा च शकुनाः सूक्ष्मं प्राप्य जालमरिन्दम।
तत्र सक्ता विपद्यन्ते मुच्यन्ते न बलान्विताः॥
अल्पकश्च यथा वह्निः स्वयं शाम्यति दुर्बलः।
आक्रान्त इन्धनैः स्थूलैस्तद्वद्योगबलः प्रभो॥
स एव च यथा वह्निर्विभो जातबलः पुनः।
समीरणगतः क्षिप्रं दहेत्कृत्स्नां महीमपि॥
तद्वज्जातबलो योगी दीप्ततेजा महाबलः।

बलानि योगप्राप्तानि मयैतानि विशाम्पते ।
निर्दर्शनार्थं सूक्ष्माणि वक्ष्यामि च पुनस्तव ॥
आत्मनश्च समाधाने धारणं प्रति वा विभो ।
निदर्शनानि सूक्ष्माणि शृणु मे भरतर्षभ ॥
अप्रमत्तो यथा धन्वी लक्ष्यं हन्ति समाहितः ।
युक्तः सम्यक् तथा योगी मोक्षं प्राप्नोत्यसंशयम् ॥
ईशते नृपते सर्वं योगस्यामिततेजसः ॥
आत्मनां च सहस्राणि बहूनि भरतर्षभ ।
योगी कुर्याद्बलं प्राप्य तैश्च सर्वैश्चरेन्महीम् ॥
प्राप्नुयाद्विषयान् कश्चित्पुनश्चोग्रं तपश्चरेत् ।
संक्षिपेच्च पुनस्तात सूर्यस्तेजो गुणानिव ॥
बलस्थस्य हि योगस्य बन्धनेशस्य पार्थिव ।
विमोक्षे प्रभविष्णुत्वमुपपन्नमसंशयम् ॥
अन्तकाल इवादित्यः कृत्स्नं संशोधयेज्जगत् ॥
दुर्बलश्च यथा राजन् स्रोतसा ह्रियते नरः ।
बलहीनस्तथा योगी विषयैर्ह्रियतेऽवशः ॥
तदेव च यथा स्रोतो विष्टम्भयति वारणः ।
तद्वद्योगवशं लब्ध्वा गूहते विषयान् बहून् ॥
न यमो नान्तकः क्रुद्धो न मृत्युर्भीमविक्रमः ।
यथा च नावं कौन्तेय कर्णधारः समाहितः ।
महार्णवगतां शीघ्रं नयेत्पार्थिवसत्तम ॥
तद्वदात्मसमाधानं युक्त्वा योगेन तत्ववित् ।
दुर्गमं स्थानमाप्नोति हित्वा देहमिमं नृप ॥
सारथिश्च यथा युक्त्वा सदश्वान्सुसमाहितः ।

देशमिष्टं नयत्याशु धन्विनं पुरुषर्षभ ॥
तथैव नृपते योगी महाव्रतसमाहितः ।
प्राप्नोत्याशु परं स्थानं लक्ष्यं मुक्त इवाशुगः ॥
आवेश्यात्मनि चात्मानं योगी तिष्ठति योऽचलः ।
पापं हन्ति पुनीतानां पदमाप्नोति सोऽजरम् ॥
कणानां भक्षणे युक्तः पिण्याकस्य च भारत ।
स्नेहानां वर्जने युक्तो योगी बलमवाप्नुयात् ॥
भुञ्जानो यावकं रूक्षं दीर्घकालमरिन्दम ।
एकाहारो विशुद्धात्मा योगी बलमवाप्नुयात् ॥
पक्षान् मासानृतूंश्चैवानहः संवत्सरांस्तथा ।
अपः पीत्वा पयो मिश्रा योगी बलमवाप्नुयात् ॥
अखण्डमपि वा मास सततं मनुजेश्वर ।
उपोष्य सम्यक् शुद्धात्मा योगी बलमवाप्नुयात् ॥
कामं जित्वा तथा क्रोधं शीतोष्णे वर्षमेव च ।
भयं शोकं यथा श्वासं पौरुषान् विषयांस्तथा ॥
अरतिं दुर्जयं चैव घोरं तृष्णां च पार्थिव ।
स्पर्शं निद्रां तथा तन्द्रां दुर्जयां नृपसत्तम ॥
दीपयन्ति महात्मानः सूक्ष्ममात्मानमात्मना ।
वीतरागामहाप्रज्ञाध्यानाध्ययनसंपदा ॥
दुर्गस्त्वेषमतः पन्था ब्राह्मणानां विपश्चिताम् ।
यः कश्चिद्व्रजति ह्यस्मिन् क्षेमेण भरतर्षभ ॥
यथा कश्चिद्वनं घोरं वनसर्पसरीसृपम् ।
श्वभ्रवत्तोयहीनं च दुर्गमं बहुकण्टकम् ॥
अभक्तमटवीप्रायं दावदग्धमहीरुहम् ।

पन्थानं तस्कराकीर्णं क्षेमेणाभिपतेद्युवा ॥
योगमार्गं तथासाद्य यः कश्चिद् व्रजति द्विजः ।
क्षेमेणोपरमेन्मार्गाद्बहुदोषो हि स स्मृतः ॥
सुस्थेयं क्षुरधारासु निश्चितासु महीपते ।
धारणासु तु योगस्य दुःस्थेयमकृतात्मभिः ॥
विपन्ना धारणास्तात नयन्ति न शुभां गतिम् ।
नेतृहीना यथा नावः पुरुषानर्णवे नृप ॥
यस्तु तिष्ठति कौन्तेय धारणासु यथाविधि ।
मरणं जन्मदुःखञ्च सुखञ्च स विमुञ्चति ॥
नानाशास्त्रेषु निष्पन्नं योगेष्विदमुदाहृतम् ।
परं योगस्य यत्कृत्यं निश्चितं तद्द्विजातिषु ॥
किं तेषां जीवितेनेह पशुवच्चेष्टितेनेह किम् ।
येषां न प्रवणं चित्तं वासुदेवे जगन्मये ॥
ध्यानं तस्य प्रवक्ष्यामि यन्न दृष्टं हि केनचित् ।
श्रूयतां भूयकैवल्यं केवलं मलवर्जितम् ॥
यदा दीपो निवातस्थो निश्चलो वायुवर्जितः ।
प्रज्वलन्नाशयत्सर्वमन्धकारं महामते ॥
तद्वद्दोषविहीनात्मा भवत्येव न संशयः ।
निराशो निश्चलो वीर न मित्रं न रिपुः कदा ॥
शोको हर्षश्च विषादो न लोभो मत्सरो भ्रमः ।
संभ्रमास्तापमोहैश्च सुखदुःखैर्विमुच्यते ॥
विषयैश्चापि सर्वैश्च इन्द्रियाणां प्रमुच्यते ।
तदा स केवलो ज्ञानकैवल्यं प्रजायते ॥
ज्वालाकर्मप्रसङ्गेन दीपस्तैलं प्रशोषयेत् ।

वर्त्यांधारेण राजेन्द्र निर्द्वन्द्वो वायुवर्जितः॥
कज्जलं वमते पश्चात्तैलस्यापि महामते।
कृष्णा संदृश्यते रेखा दीपस्याग्रे महामते॥
स्वयमाकर्षते तैलं येनासौ निर्मलो भवेत्।
कायावतस्थितस्तद्वत्कर्म तैलं प्रशोषयेत्॥
विषयान् कज्जलं कृत्वा प्रत्यक्षात्संप्रदर्शयेत्।
ज्वालायां निर्मलो भूत्वा स्वयमेव प्रकाशते॥
क्रोधलोभादिभिः संज्ञैर्वायुभिः परिवर्जितः।
निःस्पृहो निश्चलो भूत्वा तेजश्च स्वयमुज्ज्वलेत्॥
त्रैलोक्यं पश्यति स्वच्छं स्वस्थानस्थः स्वतेजसा।
केवलज्ञानरूपोऽयं मया ते परिकीर्तितः॥
हन्त ते संप्रवक्ष्यामि यदेतदनुपृच्छसि।
योगकृत्यं महाराज पृथगेव शृणुष्व मे॥
योगकृत्यं तु योगानां ध्यानमेव परं बलम्।
तच्चापि द्विविधं ध्यानमाहुर्विद्याविदो जनाः॥
एकाग्रता च मनसः प्राणायामस्तथैव च।
प्राणायामस्तु सगुणो निर्गुणो मानसस्तथा॥
मूत्रोत्सर्गपुरीषे च भोजने च नराधिप।
निष्फलं नाभियुञ्जीत शेषं युञ्जीत तत्पर॥
विमुक्तः सर्वसङ्गेभ्यो लघ्वाहारो जितेन्द्रियः।
पूर्वरात्रेऽपरात्रे वा धारयीत मनो त्मनि॥
स्थिरीकृत्येन्द्रियग्रामं मनसा हि नरेश्वर।
मनो बुद्ध्या स्थिरं कृत्वा पाषाण इव निश्चलः॥
स्थाणुवच्चाप्यकम्प्यः स्याद्गिरिवच्चापि निश्चलः।

क्षुधा विधिविधानज्ञास्तदा मुक्तं प्रचक्षते।
न शृणोति न चाघ्राति न रस्यति न पश्यति॥
न च स्पर्शं विजानाति न संकल्पयते मनः।
न चाभिमन्यते किञ्चिन्न च बुध्यति काष्ठवत्॥
तदा प्रकृतिमापन्नं युक्तमाहुर्मनीषिणः।
महतस्तु परस्तात पारे तिष्ठन्न तामसः॥
स तमोनुद इत्युक्तः सर्वज्ञैर्वेदपारगैः।
विमलो वितमस्कश्च निर्लिङ्गो लिङ्गसंश्रितः॥
योग एष हि योगानां किमन्यद्योगलक्षणम्।
एवं पश्यन्प्रपश्यन्ति आत्मानमजरं परम्॥
योगदर्शनमेतावद्ध्यानञ्च भरतर्षभ।
सर्वशास्त्रमतेनैतदुक्तं ते तत्वतो मया॥

इति योगध्यानविधिः।

भीष्म उवाच।

पञ्च दोषान् प्रभो देहे प्रवदन्ति मनीषिणः।
मार्गगाः कापिलाः सांख्याः शृणु तानरिसूदन॥
कामक्रोधौ भयं निद्रा पञ्चमः श्वास उच्यते।
एते दोषाः शरीरेषु पश्यन्ते सर्वदेहिनाम्॥
छिन्दन्ति क्षमया क्रोधं कामं संकल्पवर्जनात्।
सत्वसंसेवनान्निद्राम प्रमादाद्भयं तथा॥
छिन्दन्ति वचनं श्वासमल्पाहारतया नृप।
यथा पुष्पफलैर्न्नित्यमृतवो मूर्त्तयस्तथा॥
एवमप्यनुमानेन ह्यलिङ्गमुपलभ्यते।
यं च विंशतिमस्तात लिङ्गेषु नियतात्मकः॥

अनादिनिधनोऽनन्तः सर्वदर्शी निरामयः ।
केवलं त्वभिमानित्वाद् गुणेषु गुण उच्यते ॥
गुणा गुणवतः सन्ति निर्गुणस्य कुतो गुणाः ।
तस्मादेवं विजानन्ति ये जना गुणदर्शिनः ॥
यदा त्वेष गुणानेतान् प्राकृतानभिमन्यते ।
तदा स गुणहीनं तु परमेवानुपश्यति ॥
अव्यक्ताच्च महानात्मा समुत्पद्यति पार्थिव ।
प्रथमं सर्गमित्येतदाहुः प्राधानिकं बुधाः ॥
महतश्चाप्यहङ्कार उत्पद्यति नराधिप ।
द्वितीयं सर्गमित्याहुरेतद्बुध्यात्मकं नृप ॥
अहङ्काराच्च संभूतं मनोभूतं गुणात्मकम् ।
तृतीयः सर्ग इत्येष आहङ्कारिक उच्यते ॥
मनसस्तु समुद्भूता महाभूता नराधिप ।
चतुर्थं सर्गमित्येतन्मानसं विद्धि मे मतः ॥
शब्दः स्पर्शश्च रूपं च रसो गन्धस्तथैव च ।
पञ्चमं सर्गमित्याहुर्भौतिकं भूतचिन्तकाः ॥
श्रोत्रं त्वक् चैव चक्षुश्च जिह्वा घ्राणश्च पञ्चमम् ।
सर्गं तु षष्ठमित्याहुर्बहुचिन्तात्मकं स्मृतम् ॥
अधः श्रोत्रेन्द्रियग्राम उत्पद्यति नराधिप ।
सप्तमं सर्गमित्याहुरेतदैन्द्रियकं स्मृतम् ॥
ऊर्द्धं स्रोतस्तथा तिर्यगुत्पद्यति नराधिप ।
अष्टमं सर्गमित्याहुरेतदार्जवकं स्मृतम् ॥
तिर्यक् स्रोतस्त्वधः स्रोत उत्पद्यति नराधिप ।
नवमं सर्गमित्याहुरेतदार्जवकं बुधाः ॥

एतानि नव सर्गाणि तत्वानि च नराधिप।
चतुर्विंशतिरुक्तानि यथाश्रुतिनिदर्शनात्॥
बुद्धीन्द्रियाणि पञ्चैव पञ्च कर्मेन्द्रियाणि च।
मनः पञ्चेन्द्रियार्थाश्च विकाराः षोडश स्मृताः॥
अव्यक्तञ्च महच्चैव तथाहङ्कार एव च।
एताः प्रकृतयस्त्वष्टौ महाभूतानि पञ्च च॥
मनश्चरति राजेन्द्र चारितं सर्वमिन्द्रियैः।
न चेन्द्रियाणि पश्यन्ति मन एवात्र पश्यति॥
मनस्युपरते राजन्निन्द्रियोपरमो भवेत्।
एवं मनःप्रधानानि इन्द्रियाणि प्रभावयेत्॥
इन्द्रियाणान्तु सर्वेषामीश्वरं मन उच्यते।
एतद्विशन्ति भूतानि सर्वाणीह महायशः॥
अध्यात्ममधिभूतं च अधिदैवं च श्रूयताम्।
पादावध्यात्ममित्याहुर्ब्राह्मणास्तत्वदर्शिनः॥
गन्तव्यमधिभूतं च विष्णुस्तत्राधिदैवतम्।
पायुरध्यात्ममित्याहुर्यथातत्वार्थदर्शिनः॥
विसर्गमधिभूतन्तु मित्रस्तत्राधिदैवतम्।
उपस्थोऽध्यात्ममित्याहुर्यथायोगप्रदर्शिनः॥
अधिभूतं तथाऽऽनन्दो दैवतं च प्रजापतिः।
हस्तावध्यात्ममित्याहुर्यथासांख्यानिदर्शिनः॥
कर्त्तव्यमधिभूतं तु इन्द्रस्तत्राधिदैवतम्।
वागध्यात्ममिति प्राहुर्यथाश्रुतिनिदर्शिनः॥
वक्तव्यमधिभूतं तु वह्निस्तत्राधिदैवतम्।
चक्षुरध्यात्ममित्याहुर्यथाश्रुतिनिदर्शिनः॥

रूपमात्राधिभूतं तु सूर्यस्तत्राधिदैवतम्।
श्रोत्रमध्यात्ममित्याहुर्यथाश्रुतिनिदर्शनाः॥
शब्दास्तत्राधिभूतं तु दिशस्तत्राधिदैवतम्।
जिह्वेत्यध्यात्ममित्याहुर्यथातत्त्वनिदर्शनाः॥
रस एवाधिभूतं तु आहुस्तत्राधिदैवतम्।
घ्राणमध्यात्ममित्याहुर्यथाश्रुतिनिदर्शनाः॥
गन्ध एवाधिभूतं तु पृथिवी त्वधिदैवतम्।
त्वगध्यात्ममिति प्राहुस्तत्त्वबुद्धिविशारदाः॥
स्पर्शमेवाधिभूतं तु पवनश्चाधिदैवतम्।
मनोऽध्यात्ममिति प्राहुर्यथाशास्त्रविशारदाः॥
मन्तव्यमधिभूतं तु चन्द्रमाश्चाधिदैवतम्।
अहङ्कारिकमध्यात्ममाहुस्तत्त्वनिदर्शिनः॥
बोद्धव्यमधिभूतं तु चेतज्ञोऽत्राधिदैवतम्।
एषा ते व्यक्तितो राजन्विभूतिरनुदर्शिता॥
आदौ मध्ये तथाचान्ते यथा तत्त्वेन तत्त्ववित्॥
प्रकृतिर्गुणान्विकुरुते स्वच्छन्देनात्मकाम्यया।
क्रीडार्थं तु महाराज शतशोऽथ सहस्रशः॥
यथा दीपसहस्राणि दीपान्मर्त्याः प्रकुर्वते॥
प्रकृतिस्तथा विकुरुते पुरुषस्य गुणान् बहून्।
सत्त्वमानन्दउद्रेकः प्रीतिः प्राकाश्यमेव च॥
सुखं बुद्धिस्तथारोग्यं सन्तोषः श्रद्दधानता।
अकार्पण्यमसंरम्भः क्षमा धृतिरहिंसता॥
समता सत्यमानृण्यमार्द्दवं ह्रीरचापलम्।
शौचमार्जवमाचारमलौल्यं हृद्यसंभ्रमः॥

इष्टानिष्टवियोगानां कृतानामविकत्थनम्।
दानेन चानुग्रहणमस्पृहत्वं परार्थतः॥
सर्वभूतदया चैव सत्त्वस्यैते गुणाः स्मृताः।
रजोगुणानां संघातो रूपमैश्वर्यविग्रहः॥
अत्याशित्वमकारुण्यं सुखदुःखोपसेवनम्।
परापवादेषु रतिर्विवादानां च सेवनम्॥
परितापोऽभिहरणं ह्रीनाशोऽनार्जवं तथा।
भेदः परुषता चैव कामः क्रोधो मदस्तथा॥
दर्पो द्वेषोऽभिवादश्च एते प्रोक्ता रजोगुणाः।
तामसानां तु संघातं प्रवक्ष्याम्युपधार्यताम्॥
मोहो प्रकाशस्तामिस्रमन्धतामिस्रसंज्ञितम्।
मरणं चान्धतामिस्रतामिस्रं क्रोध उच्यते॥
तमसो लक्षणानीह भक्षाणामतिरोचनम्।
भोजनानामपर्याप्तिस्तथा पापेष्वतृप्तता॥
गन्धवासोविहारेषु शयनेष्वासनेषु च।
दिवास्वप्नेऽतिवादे च प्रमादेषु च वै रतिः॥
नृत्यवादित्रगीतानामज्ञानाच्छ्रद्दधानता।
द्वेषो धर्मविशेषाणामेते वै तामसा गुणाः॥
एते प्रधानस्य गुणास्त्रयः पुरुषसत्तम।
कृत्स्नस्य चैव जगतस्तिष्ठन्त्यनपगाः सदा।
अव्यक्तरूपो भगवान् शतधा च सहस्रधा॥
कोटिशश्च करोत्येव प्रत्यगात्मानमात्मना।
सात्त्विकस्योत्तमं स्थानं राजसस्येह मध्यमम्॥
तामसस्याधमं स्थानं प्राहुरध्यात्मचिन्तकाः।

केवलेनेह पुण्येन गतिमूर्द्धामवाप्नुयात् ॥
पुण्यपापेन मानुष्यमधर्मेणाप्यधोगतिम् ।
द्वन्द्वमेषां त्रयाणान्तु सन्निपातं च तत्वतः ॥
सत्वस्य रजसश्चैव तमसश्च शृणुष्व मे ।
सत्वस्य तु रजोदृष्टं रजसातमसस्तथा ॥
तमसश्च तथा सत्वं सत्वस्याव्यक्त एव च ।
अव्यक्तः सत्वसंयुक्तो देवलोकमवाप्नुयात् ॥
रजः सत्त्वसमायुक्तो मानुष्येषु प्रपद्यते ।
रजस्तमोभ्यां संयुक्तस्तिर्यग्योनिषु जायते ॥
राजसैः तामसैः सत्वैर्युक्तो मानुष्य एव तत् ।
पुण्यपापविमुक्तानां स्थानमाहुर्महात्मनाम् ॥
शाश्वतं चाव्ययं चैव भवयं चामृतं च यत् ।
ज्ञानिनां संभवं श्रेष्टं स्थानमव्रणमच्युतम् ॥
अतीन्द्रियमवीजञ्च जन्ममृत्युतमोनुदम् ।
अव्यक्तस्थं परं ब्रह्म पृष्टस्तेहं नराधिप ॥
स एष प्रकृतिस्थो हि तस्थ इत्यभिधीयते ।
अचेतना चैव मता प्रकृतिश्चापि पार्थिव ॥
एतेनाधिष्ठिता चैव सृजते संहरत्यपि ।
न शक्यो निर्गुणस्तात गुणीकर्त्तुं विशाम्पते ॥
गुणवांश्चाप्यगुणवान् यथातत्वं निबोध मे ।
गुणैर्हि गुणवानेव निर्गुणश्चागुणैस्तथा ॥
प्राहुरेवं महात्मानो मुनयस्तत्वदर्शिनः ।
गुणस्वभावस्त्वव्यक्तो गुणानेवातिवर्तते ॥
उपयुंक्ते च तानेव स वै राजन् स्वभावतः ।

न मुक्तः प्ररमोऽस्तीति नित्यमेवानुमन्यते ॥
अनेन कारणेनैतदव्यक्तः स्यादचेतनः ।
नित्यत्वाच्चाक्षरत्वाच्च क्षरत्वान्न तदन्यथा ॥
यदज्ञानेन कुर्वीत गुणसर्गं पुनः पुनः ।
यदात्मानं न जानीते तदाव्यक्तेन मुच्यते ॥
कर्त्तृत्वाच्चैव तत्वानां तत्वधर्मा तथोच्यते ।
कर्त्तृत्वाच्चैष सर्गाणां सर्गधर्मा तथोच्यते ॥
जीवत्वाप्रलयत्वाच्च प्रकृतत्वात्तथैव च ।
उपेक्षकत्वादन्यत्वादभिमानाच्च केवलम् ॥
मन्यन्ते यतयः सिद्धा अध्यात्मज्ञा गतज्वराः ।
अव्यक्तैकत्वमित्याहुर्नानात्वं पुरुषस्तथा ॥
सर्वभूतदयावन्तः केवलज्ञानमास्थिताः ।
अन्यः स पुरुषो व्यक्तस्त्वध्रुवो ध्रुवसंज्ञकः ॥
यथा मुञ्ज इषीकाणां तथैवैतद्विजायते ।
अन्यच्च मशकं विन्द्यादन्यच्चोदुम्बरं तथा ॥
न चोदुम्बरसंयोगो मशकस्तत्र लिप्यते ।
अन्य एव तथा मत्स्यतदन्यमुदकं स्मृतम् ।
नचोदकस्य स्पर्शेन मत्स्यो लिप्यति सर्वशः ॥
अन्योऽप्यग्निरुषाप्यन्या नित्यमेव भवेद्विभो ।
न चोपलिप्यते सोग्निरुषा संस्पर्शनेन वा ॥
पुष्करं त्वन्यदेवात्र तथान्यदुदकं स्मृतम् ।
न चोदकस्पर्शेन लिप्यते तत्र पुष्करम् ॥
एतेषां सहवासं च निवासं चैव नित्यशः ।
याथातथ्येन पश्यन्ति नानित्यं प्राकृता जनाः

ये त्वन्यथैवं पश्यन्ति न सम्यक् तेषु दर्शनम् ॥
ते व्यक्तं निरयं घोरं प्रविशन्ति पुनः पुनः ।
सांख्यदर्शनमेतत्ते परिसंख्यातमुत्तमम् ॥
एवं हि परिसंख्याय सांख्याः केवलतां गताः ।
येऽप्यन्ये तत्वकुशलास्तेषामेतन्निदर्शनम् ॥
इति श्रीभक्तिसागरे परमार्थनिरूपणे
पराशरजनकसंवादे योगध्यानविधि-
प्रकृतिपुरुषनिरूपणन्नाम नवमस्तरङ्गः ।

भीष्म उवाच ।

अत्र ते वर्त्तयिष्यामि इतिहासं पुरातनम् ।
वशिष्टस्य संवादं करालजनकस्य च ॥
वशिष्टं श्रेष्ठमासीनमृषीणां भास्करद्युतिम् ।
पप्रच्छ जनको राजा ज्ञानं नैश्रेयसं परम् ॥
मैत्रावरुणिमासीनमभिवाद्य कृताञ्जलिः ।
पप्रच्छर्षिवरं राजा करालजनकः पुरा ॥
भगवन् श्रोतुमिच्छामि परं ब्रह्म सनातनम् ।
यस्मान्नपुनरावृत्तिमाप्नुवन्ति मनीषिणः ॥
अचराचरयोरेष द्वयोः संबन्ध इष्यते ।
स्त्रपुंसोर्वापि भगवन् सम्बन्धस्तद्वदुच्यते ॥
ऋते तु पुरुषं नेह स्त्रीगर्भं धारयत्युत ।
ऋते स्त्रियं न पुरुषो रूपं निर्वर्त्तयेत्तदा ॥
अन्योन्यस्याभिसंबन्धादन्योन्यगुणसंश्रयात् ।
रूपं निर्वर्त्तयत्येतं देवं सर्वासु योनिषु ॥
एवमेतद्द्विजश्रेष्ठ वेदे शास्त्रेषु पठ्यते ।

वेदशास्त्रद्वयं चैव प्रमाणन्तत्सनातनम् ॥
अन्योन्यगुणसंरोधादन्योन्यगुणसंश्रयात् ।
एवमेवाभिसम्बद्धौ नित्यं प्रकृतिपूरुषौ ॥
पश्यामि भगवंस्तस्मान्मोक्षधर्मो न विद्यते ।
अथवानन्तरकृतं किंचिदेव निदर्शनम् ॥
तन्ममाचक्ष्व तत्वेन प्रत्यक्षो ह्यसि सर्वदा ।
मोक्षकामा वयं वापि काङ्क्षामो यदनामयम् ॥
अदेहमजरं नित्यमतन्द्रितमनीश्वरम् ।

वशिष्ठ उवाच ।

यदेतदुक्तं भवता वेदशास्त्रनिदर्शनम् ।
एवमेतद्यथा चैतन्निगृह्णाति तथा भवान् ॥
धार्यते हि त्वया ग्रन्थउभयोर्वेदशास्त्रयोः ।
न च ग्रन्थस्य तत्वज्ञो यथावत्वं नरेश्वर ॥
यो हि वेदेषु शास्त्रेषु ग्रन्थधारणतत्परः ।
न च ग्रन्थार्थतत्त्वज्ञस्तस्य तद्धारणं वृथा ॥
भारं स वहते तस्य ग्रन्थस्यार्थं न वेत्ति यः ।
यस्तु ग्रन्थार्थतत्त्वज्ञो नास्य ग्रन्थागमो वृथा ॥
ग्रन्थस्यार्थं च पृष्टः सन् तादृशो वक्तुमर्हति ।
यथातत्वाभिगमनादर्थं तस्य स विन्दति ॥
न यः संसत्सु कथयेद् ग्रन्थार्थं स्थूलबुद्धिमान् ।
स कथं मन्दविज्ञानो ग्रन्थं वक्ष्यति निर्णयात् ॥
निर्णयन् वापि छिद्रात्मा न तं वक्ष्यति तत्वतः ।
सोऽप्युपहासार्थतामेति यः स्याच्चैवात्मवानपि ॥
तस्मात्त्वं शृणु राजेन्द्र यथैतदनुदृश्यते ।

याथातथ्येन सांख्येषु योगेषु च महात्मसु ॥
यदेव योगाः पश्यन्ति सांख्यैस्तदनुगम्यते ।
एकं सांख्यञ्च योगञ्च यः पश्यति स बुद्धिमान् ॥
एतदैन्द्रियकं तात यद्भवानिदमाह माम् ।
द्रव्याद्द्रव्यस्य निर्वृत्तिरिन्द्रियादिन्द्रियं तथा ।
देहाद्देहमवाप्नोति बीजाद्बीजं तथैव च ।
निरिन्द्रियस्य बीजस्य निर्द्रव्यस्याप्यदेहिनः ॥
कथं गुणा भविष्यन्ति निर्गुणत्वान्महात्मनः ।
गुणा गुणेषु जायन्ते तत्रैव निविशन्ति च ॥
एवं गुणाः प्रकृतितो जायन्ते न भवन्ति च ।
यस्माद्यदभिजायेत तत्रैव च प्रलीयते ॥
लीयन्ते प्रतिलोमानि सृज्यन्ते चोत्तरोत्तरम् ।
गुणा गुणेषु सततं सागरस्योर्मयो यथा ॥
सर्गप्रलय एतावान् प्रकृतेर्नृपसत्तम ।
एकत्वं प्रलये वास्य बहुत्वं च यथासृजत् ॥
श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ।
न हि प्रतीक्षते मृत्युः कृतं चास्य न वा कृतम् ॥
अनुगम्य विना शान्तेर्निवर्त्तन्तीह बान्धवाः ।
अग्नौ प्रक्षिप्य पुरुषं ज्ञातयः सुहृदस्तथा ॥
नास्तिका निरनुक्रोशान्नरान्पापमते स्थितान् ।
वामतः कुरु विस्रब्धं परं प्रेप्सुरतन्द्रितः ॥
एवमभ्याहते लोके कालेनोपनिपीडिते ।
सुमहद्धैर्यमालम्ब्य धर्मं सर्वात्मना कुरु ॥
सोपानभूतं स्वर्गस्य मानुष्यं प्राप्य दुर्लभम् ।

यथात्मानं समादध्यान्न भ्रश्यत पुनर्यथा ॥
इह लोके हि धनिनां स्वजनः स्वजनायते ।
स्वजनस्तु दरिद्राणां जीवतामपि नश्यति ॥

धनेन किं यो न ददाति नाश्नुते बलेन किं येन रिपुं न बाधते ।
श्रुतेन किं येन न धर्ममाचरेत् किमात्मना यो न जितेन्द्रियो वशी ॥

आत्मना चार्थयुक्तेन पापे निवश्यते मनः ।
स कर्म कलुषं कृत्वा क्लेशे महति धीयते ॥
दुर्भिक्षादेव दुर्भिक्षं क्लेशात् क्लेशं भयाद्भयम् ।
मृतेभ्यः प्रमृता यान्ति दरिद्राः पापकर्मिणः ॥
उत्सवादुत्सवं यान्ति स्वर्गात्स्वर्गं सुखात्सुखम् ।
येन येन यथा यद्यत्पुरा कर्मसु निश्चितम् ॥
तत्तदेवोत्तरं भुङ्क्ते नित्यं विहितमात्मनः ।
अनोद्यमानानि यथा पुष्पाणि च फलानि च ॥
स्वकालेनाभिवर्तन्ते तथा कर्म पुराकृतम् ।
संमानश्चावमानश्च लाभोऽलाभः चयाचयौ ॥
प्रवृत्तानतिवर्त्तन्ते निधनान्ताः पदे पदे ।
आत्मना विहितं दुःखमात्मना विहितं सुखम् ॥
गर्भशय्यामुपादाय भजते पूर्वदेहिकम् ।
बालो युवा व वृद्धश्च यत्करोति शुभाशुभम् ।
तस्यां तस्यामवस्थायां भुङ्क्ते जन्मनि जन्मनि ॥
यथा धेनुसहस्रेषु वत्सो विन्दति मातरम ।
तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ॥
मलिनं हि यथा वस्त्रं पश्चाच्छुध्यति कर्मणा ।
उपवासैः प्रतप्तानां दीर्घं सुखमनन्तकम् ॥

दीर्घकालेन तपसा सेवितेन महामते ।
धर्माग्निर्दग्धूतपापानां संसिद्ध्यन्ति मनोरथाः ॥
शकुनानामिवाकाशे मत्स्यानामिव चोदके ॥
पदं यथा न दृश्येत तथा पुण्यकृतां गतिः ।
अलमन्यैरुपालम्भैः कीर्तितैश्च व्यतिक्रमैः ॥
पेशलं चानुरूपं च कर्त्तव्यं हितमात्मनः ।

भीष्म उवाच ।

न हायनैर्न पलितैर्न वित्तैर्न च बन्धुभिः ।
ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान् ॥
तपोमूलमिदं सर्वं यन्मां पृच्छसि पाण्डव ।
तदिन्द्रियाणि संयम्य तपो भवति नान्यथा ॥
इन्द्रियाणां प्रसङ्गेन दोषमर्छत्यसंशयम् ।
सन्नियम्य तु तान्येव सिद्धिं प्राप्नोति मानवः ॥
अश्वमेधसहस्रस्य वाजपेयशतस्य च ।
योगस्य कलया तात न तुल्यं विद्यते फलम् ॥
न विना ज्ञानविज्ञानं मोक्षस्याधिगमो भवेत् ।
न विना गुरुसम्बन्धं ज्ञानस्याधिगमः स्मृतः ॥
गुरुः प्लावयिता तस्य ज्ञानं प्लवमिहोच्यते ।
चिराय कृत्यस्तु कृतार्थस्तदुतीभयं त्यजेत् ॥
पूर्वैराचरितो धर्मस्त्वनुराग्यस्यसंपदा ।
अनेन क्रमयोगेन बहुजातिषु कर्मणाम् ॥
हित्वा शुभाशुभं कर्म मोक्षो नामेह लभ्यते ।
भावितैः कारणैश्चायं बहुसंसारयोनिषु ॥
आसादयति शुद्धात्मा मोक्षं वै प्रथमे श्रमे ।

तमासाद्य तु मुक्तस्य दृष्टार्थस्य विपश्चितः॥
त्रिष्वाश्रमेषु कोन्वर्थो भवेत्परमभीप्सवः।
ज्योतिरात्मनि नान्यत्र सर्वजन्तुषु तत्समम्॥
स्वयं च शक्यते द्रष्टुं सुसमाहितचेतसा।
न बिभेति परो यस्मान्न बिभेति पराच्च यः॥
यश्चानेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा।
यदा भावं न कुरुते सर्वभूतेषु पापकम्॥
कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा।
संयोज्य तपसात्मानमीर्ष्यामुत्सृज्य मोहिनीम्॥
त्यक्त्वा कामञ्च मोहञ्च ततो ब्रह्म समाश्नुते।
यदा श्रव्ये च दृश्ये च सर्वभूतेषु चाव्ययम्॥
समो भवति निर्द्वन्द्वो ब्रह्म संपद्यते तदा।
यदा स्तुतिं च निन्दां च समत्वेनैव पश्यति॥
काञ्चनं चायसं चैव सुखदुःखे तथैव च।
शीतमुष्णं तथैवार्थमनर्थं प्रियमप्रियम्॥
जीविते मरणं चैव ब्रह्म संपद्यते तदा।
प्रसार्येह यथाङ्गानि कूर्मः संहरते पुनः॥
तथेन्द्रियाणि मनसा संयन्तव्यानि भिक्षुणा।
तमः परिगतं वेश्म यथा दीप्तेन दृश्यते॥
तथा बुद्धिप्रदीपेन शक्य आत्मा निरीक्षितुम्।
एतत्सर्वं च पश्यामि त्वयि बुद्धिमतां वर॥

भीष्म उवाच॥

एतावदुक्त्वा वचनं करालजनकं प्रभुः।
वशिष्ठोऽपि तपः कर्तुं जगाम स्वाश्रमं ततः॥

इति करालजनकवशिष्ठसंवादः।

भीष्म उवाच ।

संलब्ध्वा परमं देवाद्वरं सत्यवतीसुतः ।
अरणीसहिते गृह्य ममन्थाग्निचिकीर्षया ॥
अथ रूपं परं राजन् बिभ्रतीं स्वेन तेजसा ।
घृताचीं नाम प्सरसमपश्यद्भगवान् हरिः ॥
अभवद्भगवान् व्यासः सहसा काममोहितः ।
शुकी भूत्वा महाराज घृताची समुपागमत् ॥
यत्नान्नियच्छतस्तस्य मुनेरग्निचिकीर्षया ।
अरण्यामेव सहसा तस्य शुक्रमवापतत् ॥
सोऽविशंकेन तपसा तथैव द्विजसत्तमः ।
अरणीं ममन्थ ब्रह्मर्षिस्तस्यां जज्ञे शुको नृपः ॥
शुक्रे निर्मथ्यमाने स शुको जज्ञे महायशाः ।
परमर्षिर्महायोगी अरणीगर्भसंभवः ॥
एकदा नारदः श्रीमान् व्यासाश्रमसुपागमत् ।
शुकं स्वाध्यायनिरतं वेदार्थान् वक्तुमीप्सया ॥
देवर्षिन्तु शुको दृष्ट्वा नारदं समुपस्थितम् ।
अर्घपूर्वेण विधिना वेदोक्तेनाभ्यपूजयत् ॥
नारदोऽथाब्रवीत्प्रीतो ब्रूहि धर्मभृतां वर ।
केन त्वां श्रेयसा वत्स योजयामीति हृष्टवत् ॥
नारदस्य वचः श्रुत्वा शुकः प्रोवाच भारत ।
अस्मिंल्लोके हितं यत्स्यात्तेन मां योक्तुमर्हसि ॥

नारद उवाच ।

तत्वं जिज्ञासमानानामृषीणां भावितात्मनाम् ।
सनत्कुमारो भगवानिदं वचनमब्रवीत् ॥

नास्ति विद्यासमं चक्षुर्नास्ति सत्यपरं तपः ।
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम् ॥
निवृत्तिः कर्मणः पापात्सततं पुण्यशीलता ।
सद्वृत्तिः समुदाचारः श्रेय एतदनुत्तमम् ॥
नापरीक्षितचारित्रे विद्या देया कथंचन ।
यथा हि कनकं शुद्धं तापच्छेदनिकर्षणैः ॥
परीक्षेत तथा शिष्यानीक्षेत्कुलगुणादिभिः ।
अशोकं शोकनाशार्थं शास्त्रं शान्तिकरं शिवम् ॥
निशम्य लभते बुद्धिं तां बुद्धा सुखमेधते ।
अलम्परिग्रहेणेह दोषवान्हि परिग्रहः ॥
कृमिर्हि कोषकारस्तु बध्यते स्वपरिग्रहात् ।
पुत्रदारकुटुम्बेषु सक्ता सीदन्ति जन्तवः ॥
सरः पङ्कार्णवे मग्ना जीर्णा वनगजा इव ।
महाजालसमाकृष्टान् स्थले मत्स्यानिवोद्धृतान् ॥
स्नेहजालसमाकृष्टान् पश्य जन्तून् सुदुःखितान् ।
निमेषमात्रमपि च वयो गच्छन्न तिष्ठति ॥
स्वशरीरेष्वनित्येषु नित्यं किमनुचिन्तयेत् ।
यदि न स्यात्पराधीनं पुरुषस्य क्रियाफलम् ॥
संयताश्च हि दक्षाश्च मतिमन्तश्च मानवाः ।
दृश्यन्ते निःफलाः सन्तः प्रहीणः सर्वकर्मभिः ॥
वहन्ति शिविकामन्ये यान्त्यन्ये शिबिकागताः ।
मनुष्याश्च शतस्त्रीकाः शतशो विविधाः स्त्रियः ॥
द्वन्द्वारामेषु भूतेषु गच्छन्त्येकैकशो नराः ।
यश्च सर्वगतः साक्षी लोकस्यात्मेति कथ्यते ॥

भूतग्रामशरीरेषु नश्यत्सु न विनश्यति ।
अजो नित्यः शाश्वतश्च निर्गुणो निष्कलस्तथा ॥
निर्द्वादशेभ्यस्तत्वेभ्यः ख्यातो यः पञ्चविंशकः ।
पुरुषो निष्क्रियश्चैव ज्ञानदृश्यश्च कथ्यते ॥
यं प्रविश्य भवन्तीह मुक्ता वै द्विजसत्तमाः ।
स वासुदेवो विज्ञेयः परमात्मा सनातनः ॥
पश्य देवस्य माहात्म्यं महिमानं च सुव्रत ।
शुभाशुभैः कर्मभिर्यो लिप्यते न कदाचन ॥
न च जीवं विना ब्रह्मन् धातवश्चेष्टयन्त्युत ।
स जीवः परिसंख्यातः शेषः संकर्षणः प्रभुः ॥
तस्मात्सनत्कुमारत्वं योलभत्स्वेन कर्मणा ।
यस्मिंश्च सर्वभूतानि प्रलयं यान्ति संक्षये ॥
स मनः सर्वभूतानां प्रद्युम्नः परिपठ्यते ।
तस्मात्प्रसूतो यः कर्त्ता कारणं कार्यमेव च ॥
तस्मात्सर्वं संभवति जगत्स्थावरजङ्गमम् ।
सोऽनिरुद्धः स ईशानो व्यक्तः सन् सर्वकर्मसु ॥
यो वासुदेवो भगवान् क्षेत्रज्ञो निर्गुणात्मकः ।
ज्ञेयः स एव राजेन्द्र जीवः संकर्षणः प्रभुः ॥
संकर्षणाच्च प्रद्युम्नो मनोभूतः स उच्यते ।
प्रद्युम्नाद्योऽनिरुद्धस्तु सोऽहङ्कारः स ईश्वरः ॥
अनिरुद्धात्तथा ब्रह्मा तत्रादिकमलोद्भवः ।
ब्रह्मणः सर्वभूतानि चराणि स्थावराणि च ॥
मरीचिरङ्गिरावत्रिः पुलस्त्यः पुलहः क्रतुः ।
वशिष्ठ इति सप्तैते मनसा निर्मिता हि ते ॥

एते वेदविदो मुख्या वेदाचार्याश्च कल्पिताः ।
प्रवृत्तिधर्मिणश्चैव प्राजापत्ये च कल्पिताः ॥
अयं क्रियावतां पन्था व्यक्तिभूतः सनातनः ।
अनिरुद्ध इति प्रोक्तो लोकसर्गकरः प्रभुः ॥
स नः सतश्च जातश्च सनकश्च सनन्दनः ।
सनत्कुमारः कपिलः सप्तमश्च सनातनः ॥
सप्तैते मानसाः प्रोक्ताः ऋषयो ब्रह्मणः सुताः ।
स्वयमागतविज्ञाना निवृत्तिं धर्ममाश्रिताः ॥
एते योगविदो मुख्याः सांख्यज्ञानविशारदाः ।
आचार्या धर्मशास्त्रेषु मोक्षधर्मप्रवर्तकाः ॥
यो यथा निर्मितो जन्तुर्यस्मिन्यस्मिंश्च कर्मणि ।
प्रवृत्तौ वा निवृत्तौ वा तत्फलं सोऽश्नुते महत् ॥
एकपादस्थिते धर्मे यत्र क्वचन गामिनि ।
कथं कर्त्तव्यमस्माभिर्भगवंस्तद्वदस्व नः ॥
यत्र वेदाश्च यज्ञाश्च तपः सत्यं दमस्तथा ।
अहिंसा धर्मसंयुक्ताः प्रचरेयुः सुरोत्तमाः ॥
स वो देशः सेवितव्यो मा वोऽधर्मः सदा स्पृशेत् ।
इति देवान् प्रति भगवद्वाक्यम् ॥
क्षीरोदधेरुत्तरतः श्वेतद्वीपो महाप्रभुः ।
तत्र नारायणपरा मानवाश्चन्द्रवर्चसः ॥
एकान्तभावोपगतास्ते भक्ताः पुरुषोत्तमम् ।
ते सहस्राचिषं देवं प्रविशन्ति सनातनम् ॥
अतीन्द्रिया निराहारा अनिष्पन्दाः सुगन्धिनः ।
एकान्तिनस्ते पुरुषाः श्वेतद्वीपनिवासिनः ॥

२८

एकान्तिनो हि पुरुषा दुर्लभा बहवो नृप।
यद्येकान्तिभिराकीर्णं जगत्स्यात् कुरुनन्दन॥
अहिंसकैरात्मविद्भिः सर्वभूतहिते रतैः।
भवे कृतयुगप्राप्तिराशीः कर्म विवर्जितः॥
चतुर्विधास्तु पुरुषा भक्ता एव हरिप्रियाः।
तेषामेकान्तिनः श्रेष्ठा ये चैवानन्यदेवताः॥
भक्तं प्रति विशेषस्ते मया सम्यक् प्रकीर्त्तितः।
सात्त्विकः पुरुषव्याघ्र भवेन्मोक्षाय निश्चितः॥
अत्रापि स विजानाति पुरुषं ब्रह्मवित्तमम्।
नारायणपरो मोक्षस्ततो वै सात्त्विकः स्मृतः॥
सांख्ययोगेन तुल्यो हि धर्म एकान्तसेवितः।
नारायणेन दृष्टश्च प्रतिबुद्धो भवेत् पुमान्॥
एवमात्मेच्छया ब्रह्मन् प्रतिबुद्धो न जायते।
राजसी तामसी चैव व्यामिश्रे प्रकृती स्मृते॥
तदात्मकं हि पुरुषं जायमानं पुनः पुनः।
प्रवृत्तिलक्षणैर्युक्तं हरिर्नावेक्षते स्वयम्॥
पश्यत्येनं जायमानं ब्रह्मा लोकपितामहः।
रजसा तमसा चैव मानवं समभिप्लुतम्॥
कामं देवाश्च ऋषयः सत्त्वस्था मुनयस्तथा।
हीनाः सत्त्वेन सूक्ष्मेण ततो वैकारिणः स्मृताः॥
नारदस्य वचः श्रुत्वा शुकः परमबुद्धिमान्।
संचिन्त्य मनसा धीरो निश्चयं नाध्यगच्छत॥
पुत्रदारैर्महान् क्लेशः विद्याम्नाये महान् श्रमः।
किंतु स्याच्छाश्वतं स्थानमल्पक्लेशं महोदयम्॥

ततो मुहूर्त्तं संचिन्त्य निश्चितां गतिमात्मनः ।
ततः प्रदक्षिणं कृत्वा देवर्षिं नारदं ततः ॥
निवेदयामास च तं स्वयोगपरमर्षये ।

शुक उवाच ।

दृष्टो मार्गः प्रवृत्तोऽस्मि स्वस्ति तेऽस्तु तपोधन ।
त्वत्प्रसादाद्गमिष्यामि गतिमिष्टां महाद्युते ॥
नारदेनाभ्यनुज्ञातः शुको द्वैपायनात्मजः ।
अभिवाद्य पुनर्योगं चकार विधिवत्तदा ॥
स गतिं परमां प्राप्तो दुःप्रापामजितेन्द्रियैः ।
ततस्तस्मिन् पदे नित्ये निर्गुणे लिङ्गवर्जिते ॥
ब्रह्मणि प्रत्यतिष्ठत्स विधूमोऽग्निरिव ज्वलन् ।
तं प्रकामं तमाघ्राय पिता स्नेहसमन्वितः ॥
उत्तमां गतिमास्थाय पृष्ठतोऽनुससार ह ।
महायोगगतिं धन्यां व्यासः स्थित्वा महातपाः ॥
निमेषान्तरमात्रेण शुकाभिपतनं ययौ ।
स ददर्श द्विधा कृत्वा पर्वताग्रं शुकं गतम् ॥
सम्यंसुत्तर्षयस्तस्य कर्म पुत्रस्य तत्तदा ।
ततः शुकेति दीर्घेण शब्देनाक्रन्दितस्तदा ॥
स्वयं पित्रा स्वरेणोच्चैस्त्रीन् लोकाननुनाद्यव
शुकः सर्वगतो भूत्वा सर्वात्मा सर्वतोमुखः ।
प्रत्यभासत धर्मात्मा भोः शब्देनानुनादयन् ।
तत एकाक्षरं नादं भोरित्येवं समीरयन् ॥
प्रत्याहरज्जगत्सर्वमुच्चैः स्थावरजङ्गमम् ।
ततःप्रभृति वाद्यापि शब्दोनुच्चारितान्पृथक् ॥

गिरिगह्वरपृष्ठेषु व्याहरन्ति शुकं प्रति ।
अन्तर्हितः प्रभावं स दर्शयित्वा शुकस्तदा ॥
गुणान्सन्त्यज्य शब्दादीन् पदमभ्यगमत्परम् ।
महिमानं तु तं दृष्ट्वा पुत्रस्यामिततेजसः ॥
निषसाद गिरिप्रस्थे पुत्रमेवानुचिन्तयन् ।
सदेव गन्धर्ववृतो महर्षिगणपूजितः ॥
पिनाकहस्तो भगवानभ्यगच्छच्च शङ्करः ।
समुवाच महादेवः सांत्वपूर्वमिदं वचः ॥
पुत्रशोकाभिसन्तप्तं कृष्णद्वैपायनं तदा ।
यावत् स्थास्यन्ति गिरयो यावत्स्थास्यन्ति सागराः ॥
तावत्तवाक्षया कीर्तिः सपुत्रस्य भविष्यति ।
छायां सपुत्र सदृशी सर्वतोपगतां सदा ॥
द्रक्ष्यसे त्वञ्च लोकेऽस्मिन्मत्प्रसादान्महामुने ।
सोऽनुनीतो भगवता स्वयं रुद्रेण भारत ॥
छायां पश्य समावृत्तः कृपया परया मुदा ।
इति जन्मगतिश्चैव शुकस्य भरतर्षभ ॥
विस्तरेण समाख्याता यन्मां त्वं परिपृच्छसि ।
एतदाचष्ट ते राजन् देवर्षिर्नारदः पुरा ॥
व्यासश्चैव महायोगी संजल्पेषु पदे पदे ।
इतिहासमिमं पुण्यं मोक्षधर्मार्थसंहितम् ॥
धारयेद्यः शमपरः स गच्छेत्परमां गतिम् ।

इति नारदशुकसंवादः ।

नाप्राप्यं तपसः किञ्चित्त्रैलोक्येऽपि परन्तप ।
सुखिनो दुःखिनो वापि नरो लोभं परित्यजेत् ॥
अवेक्ष्य मनसा शास्त्रं बुद्ध्या च नृपसत्तम ।
असन्तोषोऽसुखायेति लोभादिन्द्रियसंभ्रमः ॥
ततोऽस्य नश्यति प्रज्ञा विद्येवाभ्यासवर्जिता ।
नष्टप्रज्ञो यदा तु स्यात्तदा न्यायं न पश्यति ॥
तस्मात्सुखक्षये प्राप्ते पुमानुग्रन्तपश्चरेत् ।
यदिष्टं तत्सुखं प्राहुर्द्वेषाद्दुःखमिहोच्यते ॥
सुखे तु वर्त्तमानो वै दुःखे वापि नरोत्तम ।
सुवृत्ताद्यो न चलते शास्त्रचक्षुः स मानवः ॥
क्रियमाणं यदा कर्म नाशं गच्छति मानुषम् ।
तेषां नान्यदृते लोके तपसः कर्म विद्यते ॥
यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम् ।
न कश्चिद्याति पुरुषं दिष्टान्तवशमागतम् ॥
सावशेषसुखं वापि कश्चिन्नैवापकर्षति ।
गृहस्थानां च सर्वेषां विनाशमभिकाङ्क्षताम् ॥
निधनं शोभनं तात पुलिनेषु क्रियावताम् ।
आपन्ने तूत्तरां काष्ठां सूर्ये यो निधनं व्रजेत् ॥
नक्षत्रे च मुहूर्त्ते च पुण्ये राजन् स पुण्यकृत् ।
विषमुद्बन्धनं दाहो दस्युहस्तात्तथा वधः ॥
दंष्ट्रिभ्यश्च पशुभ्यश्च प्राकृतो वध उच्यते ।
न चैभिः पुण्यकर्माणो युज्यन्ते चाभिसन्धिजैः ॥
एवंविधैश्च बहुभिरपरैः प्राकृतैरपि ।
ऊर्द्ध्वं भित्वा प्रतिष्ठन्ते प्राणाः पुण्यवतां नृप ॥

२५

मध्यतो मध्यपुण्यानामधो दुष्कृतकर्मणाम् ।
एकः शत्रुर्न द्वितीयोऽस्ति शत्रुरज्ञानतुल्यः पुरुषस्य राजन् ॥
येनावृत्तः कुरुते संप्रयुक्ते घोराणि कर्माणि सुदारुणानि ।
इयं हि योनिः प्रथमा यां प्राप्य जगतीपते ॥
आत्मा वै शक्यते त्रातुं कर्मभिः शुभलक्षणैः ।
छित्वा धर्ममयं पाशं यदा धर्मेऽभिरज्यते ॥
दत्वाऽभयकृतं दानं तदा सिद्धिमवाप्नुते ।
यो ददाति सहस्राणि गवां यश्च शतानि च ॥
अभयं सर्वभूतेभ्यस्तदा नमति वर्त्तते ।
वसन् त्रिषयमध्येऽपि न वसत्येव बुद्धिमान् ॥
स वसत्येव दुर्बुद्धिरसत्सु विषयेष्वपि ।
न धर्मः श्लिष्यति प्राज्ञं पयः पुष्करपर्णवत् ॥
अप्राज्ञमधिकं पापं श्लिष्यते जतुकाष्ठवत् ।
वीतरागो जितक्रोधः सम्यग्भवति यः सदा ॥
विषये वर्त्तमानोऽपि न स पापेन युज्यते ।
मर्यादायां धर्मसेतुर्निबद्धो नैव सीदति ॥
पुष्टस्रोत इवासक्तः स्फीतो भवति सञ्चयः ।
यथा भानुगतं तेजो मणिः शुद्धः समाधिना ॥
आदत्ते राजशार्दूल तथा योगः प्रवर्त्तते ।
प्रसक्तबुद्धिर्विषयेषु यो नरो न बुध्यते ह्यात्महितं कदाचन ॥
स सर्वभावानुगतेन चेतसा नृपामिषेणेव झषो विकृष्यते ।
सङ्घातवान्मर्त्यलोकः परस्परमपाश्रितः ॥
कदलीगर्भनिःसारो नौरिवाप्सु निमज्जति ।
न धर्मकालः पुरुषस्य निश्चितो न चापि मृत्युः पुरुषं प्रतीक्षते ॥

सदा हि धर्मस्य क्रियैव शोभना यदा नरो मृत्युमुखे निवर्त्तते।
यथान्धः स्वगृहे युक्ते ह्यभ्यासादेव गच्छति॥
तथा युक्तेन मनसा प्राज्ञो गच्छति तां गतिम्।
मरणं जन्मनि प्रोक्तं जन्म वै मरणाश्रितम्॥
अविद्वान्मोक्षधर्मेषु बद्धो भ्रमति चक्रवत्।
बुद्धिमार्गप्रयातस्य सुखं त्विह परत्र च॥
विस्ताराः क्लेशसंयुक्ताः संक्षेपास्तु सुखावहाः।
परार्थं विस्तराः सर्वे त्यागादात्महितं विदुः॥
परार्थे वर्त्तमानस्तु स्वं कार्यं योऽभिमन्यते।
इन्द्रियार्थेष्वसक्तः स्वकार्यात्परिहीयते॥
अहोरात्रमये लोके जरारूपेण संसरन्।
मृत्युर्ग्रसति भूतानि पवनं पन्नगो यथा॥
स्वयं कृतानि कर्माणि जातो जन्तुः प्रपद्यते।
नाकृत्वा लभते कश्चित्किञ्चिदत्र प्रियाप्रियम्॥
शयानं यान्तमासीनं प्रवृत्तं विषयेषु च।
शुभाशुभानि कर्माणि प्रपद्यन्ते नरं सदा॥
यथा भारावसन्ना हि नौर्यथाम्भसि तन्तुना।
तथा मनोऽनुयोगाद्वै शरीरं प्रविकर्षति॥
स्नेहपाशैर्बहुविधैरासक्तमनसो नराः।
प्रकृतिस्था विषीदन्ति जले सैकतवेश्मवत्॥
व्यवसायं समाश्रित्य सहायोऽधिगच्छति।
न तस्य कश्चिदारम्भः कदाचिदवसीदति॥
अद्वैतमनसं शूरं युक्तं धीरं विपश्चितम्।
न श्रीः सन्त्यजते नित्यमादित्यमिव रश्मयः॥

स्वरूपनामात्मकृतं च विस्तरं कुलान्वयं द्रव्यसमृद्धिसंचयम् ।
नरो हि सर्वं लभते यथा कृतं शुभाशुभेनात्मकृतेन कर्मणा ॥

भीष्म उवाच ।

इत्युक्तो जनको राजन् यथातथ्यं मनीषिणा ।
श्रुत्वा धर्मविदां श्रेष्ठः परां मुदमवाप ह ॥

इति पराशरजनकसंवादः ।

भीष्म उवाच ।

रागं मोहं तथा स्नेहं कामं क्रोधं च केवलम् ।
योगाच्छित्त्वादितो दोषान् पञ्चैतान् प्राप्नुवन्ति तान् ॥
यथैवानिमिषाः स्थूला जालं छित्त्वा पुनर्जलम् ।
प्राप्नुवन्ति तथा योगात्तत्पदं वीतकल्मषाः ॥
तथैव वागुरां छित्त्वा बलवन्तो यथा मृगाः ।
प्राप्नुयुर्विमलं मार्गं विमुक्ताः सर्वबन्धनैः ॥
लोभजानि तथा राजन् बन्धनानि बलान्विताः ।
छित्त्वा योगात्परं मार्गं गच्छन्ति विमलं परम् ॥
अबलाश्च मृगा राजन् वागुरासु तथा परे ।
विनश्यन्ति न सन्देहस्तद्वद्योगबलादृते ॥
यथा च शकुनाः सूक्ष्मं प्राप्य जालमरिन्दम ।
तत्र सक्ता विपद्यन्ते मुच्यन्ते न बलान्विताः ॥
अल्पकश्च यथा वह्निः स्वयं शाम्यति दुर्बलः ।
आक्रान्त इन्धनैः स्थूलैस्तद्वद्योगबलः प्रभो ॥
स एव च यथा वह्निर्विभो जातबलः पुनः ।
समीरणगतः क्षिप्रं दहेत्कृत्स्नां महीमपि ॥
तद्वज्जातबलो योगी दीप्ततेजा महाबलः ।

यावत्तीर्णो न संसारस्तावन्नः कुशलं कुतः ॥
यावन्नाधिगतं ज्ञानं यावन्न समतोदिता।
यावन्नाभ्युदितो बोधस्तावन्नः कुशलं कुतः।
आत्मलाभं विना साधो विना ज्ञानमहौषधम् ॥
उदेति पुनरेवेयं दुस्संसृतिविसूचीका।
मनागपि विचारेण चेतसः स्वस्य निग्रहः ॥
मनागपि कृतो येन तेनाप्तं जगतः फलम्।
गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतोऽपि वा ॥
न विचारपरं चेतो यस्यासौ मृत उच्यते।
अशेषेण परित्यागो वासनाया य उत्तमः ॥
मोक्ष इत्युच्यते सद्भिः स एव विमलक्रमः।
यावत्तु न प्रबुद्धस्त्वं तावच्छृणु वचस्सैव ते ॥
निश्चयो भवतूद्दामो नास्त्यविद्येति निश्चलः।
एवं जीवो हि संकल्प्य वासनारज्जुवेष्टितः ॥
दुःखजालपरीतात्मा क्रमादायाति नीचताम्।
अपर्यन्तस्य कालस्य कियानंशः प्रपच्छतम् ॥
येषां निमेषणोन्मेषैर्जगतां प्रलयोदयाः।
तादृशाः पुरुषाः सन्ति मादृशाङ्गणनैव का ॥
अपवित्रमपथ्यं च विषसंपर्कदूषितम्।
भुक्त्वा जरयति ज्ञानी क्लिष्टं नष्टं च मृष्टवत् ॥
अस्ति कल्पतरुः श्रीमान् शृङ्गे सर्वमनोहरे।
तस्य कल्पतरोर्मूर्ध्नि दक्षिणस्कन्धकोटरे ॥
कुशधौतलताप्रोते विद्यते विमलालयः।
तस्मिन्निवसति श्रीमान् भुशुण्डो नाम वायसः ॥

चिरजीवी तथा स्वर्गे न भूतो न भविष्यति।
स दीर्घायुः स नीरोगः स श्रीमान् स महामतिः॥
भुशुण्डं विहगं द्रष्टुमहं यातः कुतूहलात्।
भुशुण्डः संस्थितो यत्र मेरोः शृङ्गोत्तमोत्तमे॥
कल्पाङ्गमहमद्राक्षं निमेषार्द्धेन राघव।
भुशुण्डस्तु वशिष्ठोऽयं प्राप्त इत्येव बुद्धवान्॥
यत्र पुञ्जात् समुत्तस्थौ मेघशायी इवाचलात्।
हे मुने स्वागतमिति प्रोवाच मधुराक्षरम्॥
सङ्कल्पमात्रजाताभ्यां कराभ्यां कुसुमाञ्जलिम्।
मह्यमाशु तद्दैवादान्मेघो हैममिवोत्करम्॥
इदमासनमित्युक्त्वा नवं कल्पतरुच्छदम्।
उपानिन्ये महाबुद्धिः स्वयमेव खगाधिपः॥
तस्मिन् कल्पलतागुच्छे उपविष्टो महामुने।
अथो पाद्यादि संपाद्य भुशुण्डस्तु महानसौ॥
मामुवाच महातेजाः सौहार्दान्मधुराक्षरम्।
किमर्थमद्यागमनक्लेशेनात्मा कदर्थितः॥
वचनश्रवणोत्कानामाज्ञां नो दातुमर्हसि।
त्वत्पाददर्शनादेव सर्वं ज्ञातं महामुने॥
चिरजीवितवार्त्ताभिर्हृयं स्मृतिमागताः।
ज्ञातस्त्वदागमोप्येवं त्वां पृच्छामीति यन्मुने॥
भवद्वाक्यामृतास्वादवाञ्छा तत्रविजृम्भते।
इत्युक्तवानसौ पक्षी विहङ्गश्चिरजीवितः॥
त्रिकालामलसंवेदी तत्र प्रोक्तमिदं मया।
विहङ्गम महाराज सत्यमेतत्त्वयोच्यते॥

द्रष्टुमभ्यागतोऽस्म्यद्य त्वामेव चिरजीविनम्।
कस्मिन् कुले भवान् जातो ज्ञातज्ञेयः कथं भवान्॥
कियदायुश्च ते साधो वृत्तं स्मरसि किंच वा।
केनायं वा निवासस्ते निर्दिष्टो दीर्घदर्शिना॥
अथ रामं भुशुण्डोऽसौ न प्रहृष्टो न जिह्मधीः।
यत्पृच्छति मुने सर्वं शृणु त्वं कथयाम्यहम्।
इत्युक्त्वा विहगाधीशः सर्वं कथितवानिदम्॥

भुशुण्ड उवाच।

अलंबुसेति विख्याता माता मानद विद्यते।
तस्यास्ति वाहनं काको वैष्णव्या गरुडो यथा॥
रथहंस्यः सिता ब्राह्म्यः काकश्चालम्बुसारथः।
संजातरतयस्तत्र सर्वा हंस्यो मदालसाः॥
रेमिरे सह कालेन चण्डकेनाथ तास्तदा।
अथ ता गर्भधारिण्यो बभूवुरतितोषिताः॥
देव्यश्च कृतनृत्यास्ता प्रशान्तमदताङ्गताः।
सर्वाः सन्तुष्टमनसः स्वास्वामुपययुर्दिशम्।
अन्तर्वत्न्यो बभूवुस्ता ब्राह्मी हंस्यो मुनीश्वर।
वृत्तान्तं कथयामासुर्ब्राह्म्यै देव्यै यथास्थितम्॥
हे वत्स्यः सांप्रतं वत्सवत्यो मे रथकर्मणि।
न समर्था भवत्यो हि स्वैरं चरत सांप्रतम्॥
इति गर्भालसा हंसीरुक्त्वा देवी ह्यलंबुसा।
विविकल्पसमाधाने ब्राह्मी तस्थौ यथासुखम्॥
हंस्यो विपक्वगर्भास्ताः सुवते स्म यथाक्रमम्।
वैरञ्चे सरसि स्फारे तनयानेकविंशतिम्॥

एवं ताभ्यस्तु हंसीभ्यो जाता वयमिमे मुने ।
भ्रातरश्चण्डतनया वायसा एकविंशतिः ॥
मातृभिस्सह हंसीभिर्ब्राह्मी भगवती ततः ।
चिरमाराधितास्माभिः समाधिविरता सती ॥
प्रसादपरया काले भगवत्या ततः स्वयम् ।
तथानुगृहीता स्मो यथा मुक्ता वयं स्थिताः ॥
तिष्ठामः क्वेति निश्चित्य पितुः पार्श्वं वयं गताः ।
वन्दित्वा पितरं तत्र नत्वा देवीमलंबुषाम् ॥
तेनायं सर्वसत्वानामगम्यः कल्पपादपः ।
कथितं स्थानमस्माकं ज्ञातिना सर्वदर्शिना ॥
ततः कृतनमस्कारास्तस्माद्देशाद्विभिर्गताः ।
द्रुमं कल्पतरुं प्राप्य तिष्ठामो विगतज्वराः ॥
अद्य मे फलितं पुण्यैश्चिरकालोपसंभृतैः ।
निर्विघ्नमेव पश्यामि यद्भवन्तं मुनीश्वर ॥
तिष्ठतामिह नः कालो भूयानतिगतो मुने ।
युगानां पङ्क्तयः क्षीणाः कल्पानां च तथाऽनघ ॥
एतावताथ कालेन सर्व एव ममानु गाः ।
तनूस्तृणमिव त्यक्त्वा सर्वे परिणताः पदे ॥
दीर्घायुषो महान्तोऽपि सन्तोऽपि बलिनोऽपि च ।
सर्वे एव निगीर्यन्ते कालेनाकलितात्मना ॥
मत्संकल्पवशेनैव कल्पे कल्पे पुनः पुनः ।
अस्मिन्नेव गिरेः शृङ्गे तरुरित्थं भवत्ययम् ।
यथा तिष्ठसि पक्षीन्द्र धारणाभिरखण्डितः ।
कल्पान्तेषु तथा कस्मात्तान्ये तिष्ठन्ति योगिनः ॥

भुशुण्ड उवाच ।

ब्रह्मन्नियतिरेषा हि दुर्लङ्घ्या पारमेश्वरी ।
मयेदृशेन वै भाव्यं भाव्यमन्यैस्तु तादृशैः ॥

वशिष्ठ उवाच ।

ज्ञानविज्ञानवान् धीरो योगयोग्यमनोगतिः ।
किञ्चित् स्मरसि कल्याणं चित्रमत्र जगत्त्रये ॥
हृष्टत्तरशिला वृक्षा प्रजाततरुवीरुधम् ।
अशैलवनवृक्षौघां संस्मरामि धरामधः ॥
जन्मेन्दुभास्करादीनां इन्द्रोपेन्द्रव्यवस्थितिम् ।
हिरण्याक्षापहरणं वाराहोद्धरणं क्षितेः ॥
कल्पनं पार्थिवानां च वेदानयनमेव च ।
मन्दरोन्मूलनं वार्द्धेरमृतार्थं च मन्थनम् ॥
अजातपक्षो गरुडः सागराणां च संभवः ।
इत्यादिकाश्च स्मृतयः स्मृत्यातीतजनक्रमाः ॥
बालैरपि हि तास्तात स्मर्यन्ते तासु को ग्रहः ।
ततो जगति जातेषु भगवन् युष्मदादिषु ॥
भरद्वाजपुलस्त्यात्रिनारदेन्द्रमरीचिषु ।
गौरीसरस्वतीलक्ष्मीगायत्र्याद्यासु भूरिषु ॥
इत्यव्यतनसर्गेषु स्मरणे गणनैव का ।
मुने ते ब्रह्मपुत्रस्य जन्माष्टकमिदं किल ॥
संस्मराम्यष्टमे सर्गे तस्मिंस्त्वं मम सङ्गमः ।
कदाचिज्जायसे व्योम्नः कदाचिज्जायसे जलात् ॥
कदाचिज्जायसे शैलात् कदाचिज्जायसेऽनलात् ।
अन्तर्धानं गता वेदा वारपञ्चकमुद्धृताः ॥

स्मरामि द्वादशं वेदमद्भुताम्भोधिमन्थनम्।
वारत्रयं हिरण्याक्षनीतां च वसुधामधः॥
रेणुकात्मजजन्मतां सप्तवारमिमं हरेः।
शतं कलियुगानां च हरेर्बुद्धदशाः शतम्॥
त्रिंशत्त्रिपुरविक्षोभान् द्वौ दक्षाध्वरसंचयौ।
बाणार्थमष्टौ संग्रामान् ज्वरप्रथमनत्रयम्॥
युगं प्रतिधियां पुंसां न्यूनाधिकतया मुने।
क्रियाङ्गपाठवैचित्र्ययुक्तान् वेदान् स्मराम्यहम्॥
एकार्थानि समग्राणि बहुपाठानि वानघ।
पुराणानि प्रवर्त्तन्ते निवृत्तानि युगं प्रति॥
इतिहासमहाश्चर्यमन्यद्रामायणाभिधम्।
ग्रन्थलक्षप्रमाणं च ज्ञानशास्त्रं स्मराम्यहम्॥
वाल्मीकिनाम्ना जीवेन तेनैवान्येन वा कृतम्।
एतच्च द्वादशं वारं निर्मितं विस्मृतिं गतम्॥
द्वितीयमेतस्य समं भारतं नाम नामतः।
व्यासाभिधेन जीवेन तेनैवान्येन वा कृतम्॥
एतत्तु सप्तमं वारं निर्मितं विस्मृतिं गतम्।
राक्षसक्षतये विष्णोर्महीमवतरिष्यतः॥
अधुनैकादशं जन्म रामनाम्नो भविष्यति।
वसुदेवगृहे विष्णोर्भुवो भारनिवृत्तये॥
अधुना षोडशं जन्म भविष्यति मुनीश्वर।
जगन्मयी भ्रान्तिरियं न कदाचिन्न विद्यते॥
विद्यते न कदाचिच्च जलबुद्बुदवत्स्थिता।
दोषमुक्ताफलप्रोता वासनातन्तुसन्ततिः॥

हृदि न ग्रथिता यस्य मृत्युस्तं न जिघांसति ।
विश्वासवृंचक्रकचाः सर्वदेहलताघुणाः ॥
आधयो यं न भिन्दन्ति मृत्युस्तं न जिघांसति ।
रागद्वेषविषापूर्णः स्वमनोविलमन्दिरः ॥
लोभव्यालो न भुङ्क्ते यं तं मृत्युर्न जिघांसति ।
पीताशेषविवेकाम्बुः शरीराम्भोधिवाडवः ॥
न निर्दहति यं कोपस्तं मृत्युर्न जिघांसति ।
यन्त्रं तिलानां कषति राशिमुग्रमिवाकुलम् ॥
यं पीडयति नानङ्गस्तं मृत्युर्न जिघांसति ।
एते ब्रह्मन्महादोषाः संसारव्याधिहेतवः ॥
मनागपि न लुम्पन्ति चित्तमेकं समाहितम् ।
न भूतं न भविष्यच्च चिन्तयामि कदाचन ॥
दृष्टिमालम्ब्य तिष्ठामि वर्त्तमानामिहात्मना ।
इदमद्य मया लब्धं इदं प्राप्स्यामि सुन्दरम् ॥
इति चिन्ता न मे तेन चिरं जीवाम्यनामयः ।
न स्तौमि न च निन्दामि क्वचित्किंचित्कदाचन ॥
आत्मनोऽन्यस्य वा साधो तेन जीवाम्यनामयः ।
सुखितेऽस्मिन् सुखासीनो दुःखितो दुःखिते जने ॥
सर्वस्य प्रियमित्रं च तेन जीवाम्यनामयः ।
आपद्यचलधीरोऽस्मि जगन्मित्रं च संपदि ॥
भावाभावेषु नैवास्मि तेन जीवाम्यनामयः ।
न तुष्यति शुभप्राप्तौ नाशुभेष्वपि खिद्यति ॥
मनो मम समो नित्यं तेन जीवाम्यनामयः ।
परमं त्यागमालम्ब्य सर्वमेव सदैव हि ॥

जीविताद्दि मया त्यक्तं तेन जीवाम्यनामयः ।
आशापाशविलुनायाश्चित्तवृत्तेः समाहितः ॥
संस्पर्शं न ददाम्यन्तस्तेन जीवाम्यनामयः ।
एकस्मिन्निर्मले येन पदे परमपावने ॥
संश्रिता चित्तविश्रान्तिस्तं मृत्युर्न जिघांसति ।
आधिव्याधिसमुत्थानि चलितानि महाभ्रमैः ॥
न विलुम्पन्ति दुःखानि चित्तमेकं समाहितम् ।
एषा हि चित्ते विश्रान्तिर्यया प्राणसमाधिना ॥
क्रमेणानेन संप्राप्ता स्वयमात्मनि निर्मले ।
खेदोल्लासविलासेषु स्वात्मकर्त्तृतयैकया ॥
स्वसंकल्पे लयं याते समतैवावशिष्यते ।
समता सर्वभावेषु यासौ सत्या परा स्थितिः ॥
तस्यामवस्थितं चित्तं न भूयो जन्मभाग् भवेत् ।
अयं सोऽहमयं नाहं करोमीदमिदन्तु न ॥
इति भावानुसन्धानमयी दृष्टिर्न तुष्टये ।
सा कालसूत्रपदवी सा महावीचिवागुरा ॥
सासिपत्रवनश्रेणी या देहे ऽहमिति स्थितिः ।
सा त्याज्या सर्वभावेन सर्वनाशेऽप्युपस्थिते ॥
स्प्रष्टव्या सा न भव्येन सश्वमांसेव पुक्कसी ।
तया सुदूरोज्झितया दृष्टी पटललेखया ॥
उदेति परमा दृष्टिर्ज्योत्स्नेव विगताम्बुदा ।
ययाभ्युदितया राम तीर्यतेऽयं भवार्णवः ॥
एतत्ते कथितं ब्रह्मन् यथा ऽस्मि चिरजीवितः ।
त्वदाज्ञामात्रसिद्ध्यर्थं धाष्ट्यैंण ज्ञानपारगः ।

इति सङ्कथितं चित्रं भुशुण्डोदन्तमुत्तमम् ॥
श्रुत्वा विचार्य चैवान्तर्यत् युक्तं तत्समाचर ।

इति वसिष्ठभुशुण्डसंवादः ।

मुक्तिमिच्छसि चेत्तात विषयान्विषवत्त्यज ।
क्षमार्जवदयातोषसत्यं पीयूषवद्भज ॥
न पृथ्वी न जलं नाग्निर्न वायुर्द्यौर्न वा भवान् ।
एषां साक्षिणमात्मानं चिद्रूपं विद्धि मुक्तये ॥
यदि देहं परित्यज्य चिति विश्रम्य तिष्ठसि ।
अधुनैव सुखी शान्तो बन्धमुक्तो भविष्यसि ॥
न त्वं विप्रादिको वर्णो नाश्रमी नाक्षगोचरः ।
असङ्गोऽसि निराकारो विश्वसाक्षी सुखी भव ॥
धर्माधर्मौ सुखं दुःखं मानसानि न ते विभो ।
न कर्त्तासि न भोक्तासि मुक्त एवासि सर्वदा ॥
एको द्रष्टासि सर्वस्य मुक्तप्रायोसि सर्वदा ।
अयमेव हि ते बन्धो द्रष्टारं पश्यसीतरम् ॥
अहं कर्त्तेत्यहंमानमहाकृष्णाहिदंशितः ।
नाहं कर्त्तेति विश्वासामृतं पीत्वा सुखी भव ॥
एको विशुद्धबोधोऽहमितिनिश्चयवह्निना ।
प्रज्वाल्य ज्ञानगहनं वीतशोकः सुखी भव ॥
मुक्ताभिमानी मुक्तोऽहं बद्धो बद्धाभिमान्यपि ।
किंवदन्तीह सत्येह या मतिः सा गतिर्भवेत् ॥
आत्मा साक्षी विभुः पूर्ण एको मुक्तश्चिदक्रियः ।
असङ्गो निःस्पृहः शान्तो भ्रमात्संसारवानिव ॥
हरो यद्युपदेष्टा ते हरिः कमलजोऽपि वा ।

तथापि न तव स्वस्थं सर्वविस्मरणाद्दते ॥
तेन ज्ञानफलं प्राप्तं योगाभ्यासफलं तथा ।
तृप्तः स्वस्थेन्द्रियो नित्यमेकाकी रमते तु यः ॥
मुक्तो न विषयद्वेष्टा न वा विषयलोलुपः ।
असंसक्तमना नित्यं प्राप्तं प्राप्तमुपाश्नुते ॥
अहो साहसमुग्रन्तु पश्यन्तु विबुधाः स्फुटम् ।
वैष्णव्या मायया ग्रस्ता विचारविमुखाः कृताः ॥

एकादशस्कन्धे श्रीकृष्णोद्धवसंवादे ।

श्रीउद्धव उवाच ।

यमः कतिविधः प्रोक्तो नियमो वा ऽरिकर्षन ।
कः शमः को दमः कृष्ण का तितिक्षा धृतिः प्रभो ॥
किं दानं किं तपः शौर्यं किं सत्यमृतमुच्यते ।
कस्त्यागः किं धनं चेष्टं को यज्ञः का च दक्षिणा ॥
पुंसः किंस्विद्बलं श्रीमन् दया लाभश्च केशव ।
का विद्या ह्रीः परा का श्रीः किं सुखं दुःखमेव वा ॥
कः पण्डितः कश्च मूर्खः कः पन्था उत्पथश्च कः ।
कः स्वर्गो नरकः कःस्वित्को बन्धुरुत किं गृहम् ॥
क आढ्यः को दरिद्रो वा कृपणः क ईश्वरः ।
एतान् प्रश्नान् मम ब्रूहि विपरीतांश्च सत्पते ॥

श्रीभगवानुवाच ।

अहिंसा सत्यमस्तेयमसङ्गो ह्रीरसञ्चयः ।
आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाऽभयम् ॥
शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्चनम् ।
तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनम् ॥

एते यमाः सनियमा उभयोर्द्वादश स्मृताः ।
पुंसामुपासितास्तात यथाकामं दुहन्ति हि ॥
शमो मन्निष्ठता बुद्धेर्दम इन्द्रियसंयमः ।
तितिक्षा दुःखसंमर्षो जिह्वोपस्थजयो धृतिः ॥
दण्डन्यासः परं दानं कामत्यागस्तपः स्मृतम् ।
स्वभावविजयः शौर्यं सत्यं च समदर्शनम् ॥
ऋतञ्च सूनृता वाणी कविभिः परिकीर्त्तिता ।
कर्मस्वसङ्गमः शौचं त्यागः संन्यास उच्यते ॥
धर्मं इष्टं धनं नृणां यज्ञोऽहं भगवत्तमः ।
दक्षिणा ज्ञानसंदेशः प्राणायामः परं बलम् ॥
भगो मे ईश्वरो भावो लाभो मद्भक्तिरुत्तमः ।
विद्यात्मनि भिदाबाधो जुगुप्सा ह्रीरकर्मसु ॥
श्रीर्गुणा नैरपेक्षाद्याः सुखं दुःखसुखात्ययः ।
दुःखं कामसुखापेक्षा पण्डितो बन्धमोक्षवित् ॥
मूर्खो देहाद्यहंबुद्धिः पन्था मन्निगमः स्मृतः ।
उत्पथश्चित्तविक्षेपः स्वर्गः सत्त्वगुणोदयः ॥
नरकस्तमउन्नाहो बन्धुर्गुरुरहं सखे ।
गृहं शरीरं मानुष्यं गुणाढ्यो ह्याढ्य उच्यते ॥
दरिद्रो यस्त्वसन्तुष्टः कृपणो यो जितेन्द्रियः ।
गुणेष्वसक्तधीरीशो गुणसंगो विपर्ययः ॥
एत उद्धव ते प्रश्नाः सर्वे साधु निरूपिताः ।
किं वर्णितेन बहुना लक्षणं गुणदोषयोः ॥
गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः ।
योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ॥

ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योस्ति कुत्रचित्।
निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु॥
तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनाम्।
यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्॥
न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः।
तावत्कर्माणि कुर्वीत न निर्विद्येत यावता॥
मत्कथाश्रवणे वापि श्रद्धा यावन्न जायते।
स्वधर्मस्थो यजन् यज्ञैरनाशीः काम उद्धव॥
न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत्।
अस्मिल्लोके वर्त्तमानः स्वधर्मस्थोऽनघः शुचिः॥
ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया।
स्वर्गिणोऽप्येनमिच्छन्ति लोकं निरयिणस्तथा॥
साधकं ज्ञानभक्तिभ्यामुभयं तदसाधकम्।
ना नरः स्वर्गतिं कांक्षेन्नारकीं च विचक्षणः॥
नेमं लोकं च कांक्षेत देहावेशात्प्रमाद्यति।
एतद्विदन् पुरा मृत्योरभवाय घटेत सः॥
अप्रमत्त इति ज्ञात्वा मर्त्यमप्यर्थसिद्धिदम्।
नृदेहमाद्यं सुलभं दुर्लभं प्लवं सुकल्पं गुरुकर्णधारम्॥
मयाऽनुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत्स आत्महा।
यदि कुर्यात्प्रमादेन योगी कर्म विगर्हितम्॥
योगेनैव दहेदंहो नान्यत्तत्र कदाचन।
स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः॥
कर्मणां जात्यशुद्धानामनेन नियमः कृतः।
गुणदोषविधानेन सङ्गानां त्याजनेच्छया॥

भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि मयि दृष्टेऽखिलात्मनि ॥
न मय्येकान्तभक्तानां गुणदोषोद्भवा गुणाः ।
साधूनां समचित्तानां बुद्धेः परमुपेयुषाम् ॥
एवमेतान्मयादिष्टा ननु तिष्ठन्ति मे पथः ।
क्षेमं विन्दन्ति मत्स्थानं यद् ब्रह्म परमं विदुः ॥

इति कृष्णोद्धवसंवादः ।

तज्ज्ञानं यत्र गोविन्दः सा कथा यत्र केशवः ।
तत्कर्म यत्तदर्थाय किमन्यैर्बहुभाषितैः ॥
न तत्पिता तु पुत्राय न शिष्याय गुरुस्तथा ।
परमार्थं परं ब्रूयाद्यदेतत्ते मयोदितम् ॥
एतत्पवित्रमारोग्यं धन्यं दुःस्वप्ननाशनम् ।
सुखप्रीतिकरं नृणां मोक्षकृद्यत्तवेरितम् ॥
अहन्यहनि श्रृण्वन्ति ये नरा भक्तिसागरम् ।
श्लोकार्द्धं श्लोकमेकं वा गोप्रदानाद्विशिष्यते ॥
अहोरात्रकृतं पापं श्रोतुमिच्छुः प्रणश्यति ।
श्रृण्वन्विप्रो वेदवित् स्यात् क्षत्रियः पृथिवीपतिः ॥
ऋद्धिं प्रयाति वैश्यश्च शूद्रश्चारोग्यमृच्छति ।
दिव्यान्तरिक्षभौमाद्यदुस्वप्नाद्यभिवारकान् ॥
यच्चान्यद् दुरितं किंचित्तत्सर्वं हन्ति केशवः ।
प्रवृत्तं च निवृत्तं च धर्मविद्यादयात्मकम् ॥
ब्रह्मविद्याद्वयोपेतं भुक्तिदं मुक्तिदं महत् ।
कथितं विचक्षुना सम्यक् पाण्डवाय सुपृच्छते ॥
पुराणार्णवसंगूढकथाद्भुतरसमुद्भवम् ।

सद्धर्मरत्नं पश्यन्तु बुधाः सन्दर्शितं मया ॥

अस्माभिर्द्धर्मविषये प्रोक्तमत्र विविच्य यत्।
विचारयन्तु मात्सर्यमपास्य सुधियश्च तत् ॥

श्रीभक्तिसागरग्रन्थे दूरीकृतविसंमते।
विचरन्तु जना धर्ममार्गे परमसत्कृते ॥

स्तनेषु संस्थितं दुग्धं साधु गृह्णाति युक्तितः।
जलौका तत्र संलग्ना गृह्णाति रुधिरं बहु ॥

एवं सदसतोर्व्यक्तिस्वभावो दुरतिक्रमः।

माहेश्वरीवंशविभूषणस्य दामोदरस्याङ्गसमुद्भवस्य ॥
चौहत्थसाधोरभवन्नियोगान्मे भक्तिसिन्धुं रचितुं प्रयत्नः ॥१॥
दानेषु शौर्येषु शमेषु वित्तः सत्येषु शौचेषु शमेषु युक्तः।
सद्धर्मसद्भक्तिविशुद्धबुद्धिश्चौहत्थमल्लः किल धर्ममूर्तिः ॥ २ ॥

श्रीनारायणभट्टेन देवभट्टस्य सूनुना।
भारताचार्यमुख्येन रचितो भक्तिसागरः ॥

नन्देषु रसभूसंज्ञे विक्रमार्कस्य वत्सरे।
मार्गशीर्षे शुक्लपक्षे पञ्चम्यां चन्द्रवासरे ॥

संपूर्णतां समगमद् ग्रन्थोऽयं भक्तिसागरः।
सीताकटाक्षविक्षेपमधुपैरुपशोभितम् ॥

रामचन्द्रपदाम्भोजं भूयान्मम मुदे सदा।

इति श्रीदेवभट्टसुतनारायणभट्टविरचिते भक्तिसागरे करालजनक-
वशिष्ठसंवाद-वशिष्ठभुशुण्डसंवाद-कृष्णोद्धवसंवादग्रन्थ-
श्रवणफलस्तुतिपरमार्थनिरूपणन्नाम
दशमस्तरङ्गः ॥ १० ॥

समाप्तम् ॥